Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

[त्रैमासिकी]

015m N
M5.40

४० वर्षे
१-२ अङ्कौ

ज्येष्ठ–भाद्रपदपूर्णिमे
जून–सितम्बर, १९८५

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

015mN 8373
M5.40
Tripathi, Bhagirath
Prasad
Saraswati sushma.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

015m N
M5.40
8373

SHRI JAGADGURU VISHWARADHYA JNANAMANDIR
(LIBRARY)
JANGAMAWADIMATH, VARANASI

Please return this volume on or before the date last stamped
Overdue volume will be charged 1/- per day.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

[त्रैमासिकी]

सम्पादकः

डॉ० भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'

अनुसन्धानसंस्थाननिदेशकः

उप-सम्पादकः

डॉ० हरिश्चन्द्रमणित्रिपाठी

प्रकाशनाधिकारी

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY
Jangamwadi Math, Varanasi
ACC No. ....

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः
श्रुतम् मे गोपाय

४० वर्षे
१-२ अङ्कौ

वार्षिकं मूल्यम्—१० रूप्यकाणि
जून-सितम्बर, १९८५

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

परामर्शदातृसम्पादकमण्डलम्

प्रो० वि० वेङ्कटाचलम्, कुलपतिः, अध्यक्षः

१. डॉ० श्रीकृष्णचन्द्रद्विवेदी,
वेदवेदाङ्गसंकायाध्यक्षः

२. डॉ० रामजीमालवीयः,
दर्शनसंकायाध्यक्षः

३. डॉ० कैलासपतित्रिपाठी,
साहित्य-संस्कृति-संकायाध्यक्षः

४. प्रो० रामशंकरत्रिपाठी,
श्रमणविद्या-संकायाध्यक्षः

५. डॉ० सत्यव्रतशर्मा,
आधुनिक-ज्ञान-विज्ञान-संकायाध्यक्षः

६. डॉ० भागीरथप्रसादत्रिपाठी
'वागीशः शास्त्री' संयोजकः

***

015m N
M540

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY
Jangamwadi Math, Varanasi
ACC No. 8373

प्रकाशकः—
डॉ० हरिश्चन्द्रमणित्रिपाठी,
प्रकाशनाधिकारी,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

मुद्रकः—
विजय प्रेस,
सरसौली, वाराणसी

प्राप्तिस्थानम्—
विक्रय-विभागः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य, वाराणसी-२२१ ००२.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कुलपतेः शुभसङ्कल्पः

कस्यापि विश्वविद्यालयस्य सारस्वती पत्रिका निकषायते तत्राधिकृतानां विदुषां वैदुष्यस्य। अनया दृष्ट्या अस्मिन्नङ्के प्रकाश्यमानेषु द्वाविंशतौ लेखेषु भूयान् भाग इहत्यैरेव विद्वद्भिः शोधच्छात्रैश्च समुपहृतः, इतीदं नूनं प्रमाणीकरोति विश्वविद्यालयीयविदुषां सारस्वतकार्यरुचिं लेखनप्रवणताञ्च। एवमेवास्मिन्नङ्के पदं लभन्ते त्रयो लेखा इतः सेवाकार्यं परिसमाप्य प्राप्तावकाशानामाचार्याणां, ये खलु दृढं प्रमाणीकुर्वन्ति विद्वन्मूर्धन्यानां पत्रिकाया अस्याः प्रतिष्ठासंवर्धनपरिकरबन्धम्। अत्रत्यै-रध्यापकैः शोधच्छात्रैश्च संदृब्धेषु निबन्धेष्वस्ति महद् वैचित्र्यं विषयविभागानाम्, इत्येतदपि आवहति मनस्तोषभूमानम्। एकतो यत्र अनुसन्धाननिदेशकः स्वयमुपहरति निबन्धमेकम्, तदा अपरतो न्याय-मीमांसा-वेदान्त-व्याकरण-साहित्य-ज्यौतिष-बौद्धदर्शन-विभागेष्वधिकृता आचार्योपाचार्यप्राध्यापकशोधच्छात्रा अपि स्वैः स्वैर्निबन्धैः पोषयन्ति सुषमां 'सारस्वती सुषमा'–पत्रिकाया इति सत्यं निर्वृणोति नश्चेतः।

विश्वविद्यालयशिक्षायास्तत्त्वविमर्शनचणः 'कार्डिनल न्यू मैन'-नामा प्रख्यातः पाश्चात्यलेखकः स्पष्टमिदं परिबभाषे यद् विश्वविद्यालयो नाम तादृशमपूर्वस्थानम्, यत्र नानादिग्भ्यः समागता विद्वांसः छात्राश्च एकत्र समवयन्ति। यावत् कश्चिद् विश्वविद्यालयो नेदीयसो दवीयसश्च गुरून् शिष्यांश्च नाक्रष्टुं क्षमते, तावत् स विश्व-विद्यालयगणनामेव नार्हतीति। कस्यापि विश्वविद्यालयस्य गौरवमस्मादेवानुमातुं पार्यते यत् तत्र देशस्य नानाभागेभ्यः कियन्तो वा विद्वांसः, कियन्तो वाऽन्तेवासिनः स्वयमुपसर्पन्ति ज्ञानकुतूहलिनः। अनया दृष्ट्यापि अस्मत्पत्रिकाया अयमङ्को धारयति विशिष्टं सौभाग्यम्। अत्र हि बिहारप्रदेशाद्, राजस्थानाद्, आन्ध्रप्रदेशाद्, उत्कल-प्रदेशाद्, हिमाचलप्रदेशाच्च समागता लेखाः सन्ति सन्दृब्धा विपश्चिदपश्चिमानाम्। उत्तरप्रदेशस्यापि सुदूरवर्तिभ्यो नैनीताल-लक्ष्मणपुर–प्रतापगढ़प्रभृतिभ्यः स्थानेभ्योऽपि सम्प्राप्ता लेखा भूषयन्ति सुषमां सारस्वतीं 'सारस्वती सुषमा' पत्रिकायाः। तदिदं नूनमुपचाययति पत्रिकायाः प्रतिष्ठागौरवम्, प्रमाणयति च विद्वज्जनसमादरभरमस्याः पत्रिकायाः समग्रराष्ट्रव्यापिनम्।

तदीदृग्विधां नानादेशप्रसूतविद्वज्जनवैदग्धीदिग्धां नानाविषयवैचित्र्यचित्रितां पत्रिकामेनां सहृदयपाठककरेषु उपहरन् दृढं प्रत्येमि यदियं कल्पिष्यते बहुजनपरितो-षायेति।

इत्थं सुधीविधेयः

काश्याम्,
श्रीशङ्कराचार्यजयन्त्याम्,
२०४६ वैक्रमाब्दे

(वि० वेङ्कटाचलम्)
कुलपतिः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सम्पादकीयम्

एकोनत्रिंशतो हायनानि समतीत्य संस्कृतानुसन्धानपत्रिकेयं 'सारस्वती सुषमा' नाम प्राज्यानुच्चावचाँल्लोकाचरितान् संस्कृतोत्कर्षापकर्षाननुभवन्ती सुरगवीसमुपासकसमाराधनतपोजुष्टपूतज्ञाननिकरप्रसूनैरात्मानं सम्भावयन्ती, सुधाशभावोपासकाभासकारुन्तुदव्यवहारैस्तुदती, साम्प्रतं चत्वारिंशं हर्षम्लानिकरम्भकं संवत्सरं प्रविशती मोमुदीति।

त्रिसप्ततितमाद्धायनात् प्रभृति समुपक्रान्तस्य विश्वसंस्कृतसम्मेलनस्येमं सप्तमं समारम्भं हालैण्डदेशे समायोज्यमानं विभावयतां संस्कृतजगतामिह भारते वर्षे नवीनशिक्षाक्रमनीतेरसन्तोषो महत्यै तन्म्लान्यै जाजायते। विश्वस्मिन् कामदुहः सुरगव्याः सहायताया विश्वजनीनविविधसमस्याः समाधातुमुत्का विलोक्यन्ते शेमुषीजुषः। भारते वर्षे तु कण्ठचामीकरन्यायमाश्रित्य तस्या अनायासेन समासादिताया उपेक्षां प्रत्यक्षमनुभवन्ति लोकाः। आचार्यप्रवराणां पण्डितपट्टाभिरामशास्त्रिपादानामिह 'वयं किं कुर्मः' इत्याह्वो निबन्धस्तु संस्कृतसंस्थानां संस्कृतसंस्थासंचालकानां तत्रत्यानामन्तेवासिविसराणां च काञ्चिदन्यादृशीमेव स्थितिमाविष्कुर्वाणो विचारकाणां साधीयो दृष्टिमाकर्षति। एतन्निबन्धवस्तुतत्त्वमनुध्याय स्वस्वात्मनिरीक्षणार्थं नूनं सम्प्रेरितः स्यात् संस्कृतसंस्थासदस्यसन्दोहः।

निरवग्रहे स्वातन्त्र्यभाजि भारतविग्रहे न कोऽपि संस्थासु स्वोत्तरदायित्वं वोढुमाकाङ्क्षतीति शास्त्रिवर्याणामाकूतम्। वेदशास्त्राध्ययनाध्यापनपरम्पराह्रासं क्रमशो जायमानं सन्दर्शयतां तेषां दोदूयतेऽतान्तं स्वान्तनिशान्तम्। संस्कृताध्ययनाध्यापनदुर्दशायाः संस्कृतसंस्थाप्रशासनदौर्विध्यस्य च सूल्बणमिह चित्रमाकृतमास्ते।

लोकभाषा संस्कृतं परवर्तिनीषु भाषासु विभ्रंशतया परिणतिमुपगतं सत् तावदद्यापि तत्र जीवति। तासां तासां प्रादेशिकीनां भाषाणां साहाय्येन संस्कृतज्ञैर्व्याकरणादिशास्त्राणां दुरूहा अर्थाः प्रत्यभिज्ञानीयाः स्युरिति धिया निबद्ध आचार्यप्रवराणां पण्डितबलदेवोपाध्यायमहाभागानां महाभाष्यग्रन्थो भोजपुरी चेति निबन्धो निकाममुद्बोधकः सेत्स्यति। तन्त्रशास्त्राणां सामयिक उपयोग इत्याख्य आचार्यव्रजवल्लभद्विवेदानां निबन्धे तन्त्रशास्त्रस्य लोकोपयोगित्वविषये प्रकाशनिपातो नूनं तज्जिज्ञासूनां चित्तमाक्रष्टुं प्रभवेत्। वाल्मीकीयरामायणे कृदन्तक्रियारूपाणां यन्निरूपणं व्यधायि डॉ० देसराजशर्मणा, तत् तदीयां गवेषणारुचिमायासं च निरूपयितुमलम्। यद्यपि शब्दतत्त्वव्याक्रियानिपुणं व्याकरणम्, तथापि निर्वचनप्रधाने निरुक्ते कीदृशं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शब्दतत्त्वमभिव्यज्यते विलक्षणमिति सोहापोहं विवेचितमिह डॉ० रामाशीषपाण्डेयेन। भगवतः परशुरामस्य जीवनादिकमुद्दिश्य विविधानां विवादपरिप्लुतानां पक्षाणां पुराणादिग्रन्थेषु सन्दृब्धत्वान्नेदमित्थन्तया तदवतारचरितं विनिर्णेतुमर्हन्ति विचक्षणाः। डॉ० पुरुषोत्तमलालभार्गवमहोदयेन विषयेऽस्मिन् 'भगवान् परशुरामः' इत्याख्येन गवेषणाप्रधानेन लघुना निबन्धेन मन्ये बहूपकृताः पुराणविद्यारसिकाः सुधीजनाः। अग्निपुराणोक्तं ध्वनिवर्णपदवाक्यात्मकं वाङ्मयमधिकृत्य डॉ० पारसनाथद्विवेदिभिर्विहितो विषयोपन्यासो बुधजनमनोमोदार्थमनुसन्धित्सुजनहितार्थं च सम्पद्येत। एवमेव न्यायदर्शनदिशा प्रत्यभिज्ञाविमर्शः, अनुपलब्धेः प्रमाणान्तरत्वविमर्शः, आचारमीमांसा शक्तिविशिष्टाद्वैतवेदान्ते, वैदिकं खगोलविज्ञानम्, बालारिष्टयोगविवेचनम् इत्यादयो निबन्धा नूनं नव्यानां भव्यानां चानुसन्धानप्रतिभानामाविर्भावकाश्चकासति।

संस्कृतकाव्यवाङ्मये स्वराष्ट्रानुरागोत्प्रेरिकाणां रचनानामभावेन विषीदन्ति केचिदालोचकाः। डॉ० हरिनारायणदीक्षितप्रणीतः 'संस्कृतकाव्यानां भरतवाक्येषु स्वदेशानुरागः' इत्याख्यो निबन्धस्तेषामन्तःक्लेशं शमयेदेवेति नः प्रत्ययः। नाट्यशास्त्रे यद्यपि सामवेदस्योपवेदतया प्रथितस्य गान्धर्ववेदस्य शास्त्रं विलसति संगीतशास्त्रमिति, तथापि नाट्यशास्त्रात् प्राचीनानां तद्विषयकग्रन्थानामनुपलम्भात् संगीतशास्त्रस्य पुरातनत्वं नाभ्युपेयते। डॉ० टि. जि. अनन्तसुब्रह्मण्यमहोदयस्य 'नाट्यशास्त्रे संगीतम्' इत्यभिधेन निबन्धेन विभावितो नाट्यशास्त्रे संगीततत्त्वान्वेषणप्रयासस्तावदस्यां दिशि तज्जिज्ञासूनुत्प्रेरयेत्। सौन्दर्यविमर्शाख्यो गद्यपद्यात्मको निबन्धो निबन्द्धुः कामपि नव्यां हार्दीमभिख्यामभिव्यनक्ति। 'पूर्वाकाराधिकतररुचा सङ्गतः कान्तयाऽसौ' इति रघुवंशपद्यांशविवरणाय साधु प्रयत्तं निबन्द्ध्रा। व्यञ्जनाभिव्यञ्जनयोस्तुलनात्मकं समीक्षणमित्यत्र चिन्तकेन प्राच्यपाश्चात्यमतान्यालोड्य विषयं यथायथमुपपादयितुं प्रयत्नः समास्थितः।

गुणवृत्तिविमर्शाख्ये निबन्धे प्राचीनाचार्याणां पक्षानुपस्थाप्य विवेचितं श्रीकमलाकान्तत्रिपाठिना। 'धर्मस्य प्रायोगिकः पक्षः' इति निबन्धस्तु धर्मसमुच्चयाभिधेयग्रन्थगतविषयविवेचनरूपः। पर्यन्ते महर्षिकात्यायनप्रणीतः प्रतिज्ञापरिशिष्टमिति लघुग्रन्थः प्रकाश्यमानो जिज्ञासूनुपकुर्यादिति सम्भावयति

भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विषयानुक्रमणी

१. वयं किं कुर्मः ?—आचार्यश्रीपट्टाभिरामशास्त्री १-६

२. महाभाष्यग्रन्थो भोजपुरी च—आचार्यश्रीबलदेवोपाध्यायः ७-९

३. तन्त्रशास्त्राणां सामयिक उपयोगः—आचार्यश्रीव्रजवल्लभद्विवेदः १०-२०

४. कृदन्तक्रियारूपाणामैतिहासिक०—डॉ० देसराजशर्मा २१-३६

५. निरुक्ते शब्दतत्त्वम्—डॉ० रामाशीषपाण्डेयः ३७-४५

६. भगवान् परशुरामः—डॉ० पुरुषोत्तमलालभार्गवः ४६-४८

७. राष्ट्रियास्मितामनुरुध्य प्रवृत्तायाः०—
डॉ० भागीरथप्रसादत्रिपाठी ४९-५४

८. वाङ्मयविमर्शः—डॉ० पारसनाथद्विवेदी ५५-६३

९. न्यायदर्शनदिशा प्रत्यभिज्ञाविमर्शः—डॉ० सुधाकरदीक्षितः ६४-६८

१०. अनुपलब्धेः प्रमाणान्तरत्वविमर्शः—
डॉ० एन्० आर० श्रीकृष्णताताचार्यः ६९-७६

११. शक्तिविशिष्टाद्वैतवेदान्ते आचारमीमांसा—
डॉ० चन्द्रशेखरशर्माहिरेमठः ७७-८५

१२. वैदिकं खगोलविज्ञानम्—डॉ० नागेन्द्रपाण्डेयः ८६-१००

१३. बालारिष्टयोगविवेचनम्—डॉ० कु० स्निग्धासेन १०१-११०

१४. कालिदासस्य विरहोन्मादः—डॉ० वनेश्वरपाठकः १११-१२१

१५. संस्कृतदृश्यकाव्यानां भरतवाक्येषु०—डॉ० हरिनारायणदीक्षितः १२२-१३४

१६. नाटचशास्त्रे संगीतम्—डॉ० टि० जि० अनन्तसुब्रह्मण्यन् १३५-१४४

१७. सौन्दर्यविमर्शः—श्रीशिवजीउपाध्यायः १४५-१५३

१८. पूर्वाकाराधिकतररुचा सङ्गतः कान्तयाऽसौ—
डॉ० गिरधारीलालचतुर्वेदी १५४-१५७

१९. व्यञ्जनाऽभिव्यञ्जनयोस्तुलनात्मकं समीक्षणम्—
श्रीरमाशङ्करमिश्रः १५८-१६८

२०. गुणवृत्तिविमर्शः—श्रीकमलाकान्तत्रिपाठी १६९-१७६

२१. धर्मस्य प्रायोगिकः पक्षः—डॉ० विजयशंकरचौबे १७७-१८४

लघुग्रन्थमाला—

प्रतिज्ञापरिशिष्टम्—महर्षिकात्यायनप्रणीतम् १-१०

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

४० वर्षे | ज्येष्ठ–भाद्रपदपूर्णिमे, वि० सं० २०४२ | १–२ अङ्कौ

वयं किं कुर्मः ?

पण्डितश्री पी० एन्० पट्टाभिरामशास्त्री 'पद्मभूषणम्'

साहित्यविभागाध्यक्षचरः,

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

वाराणसी

❀ ❀ ❀

वेदोऽस्माकं शासकश्शिक्षकश्च । प्रभोराचार्यस्य च शासकत्वं शिक्षकत्वं च धर्मः । यथा शास्ति प्रभुः, यथा च शिक्षयत्याचार्यस्तथा तदनुयायिभिस्सेवकैरन्तेवासिभिश्च वर्तितव्यमिति तेषां धर्मः । धर्मोऽयं तेषां धारको भवति । धारयतीति हि धर्मो भवति । धारणं च स्थिरतायै, स्थिरता च पारम्पर्येण परिप्राप्तस्य सतः पदार्थस्याचारस्य वा देशसमुन्नत्याधायकस्य स्थूणानिखननवत् परिरक्षणेन सिध्यति । पारम्पर्यपरिरक्षणं नाम महान् गुणः । 'विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम्' इति खलु न्यायः । सत्यं परम्परायां कानिचन प्रदूषणानि प्रविष्टानि भवेयुः; तानि परम्परया प्राप्तानीति न निश्चेतव्यम् । तेषां दूरीकरणं न दोषाय । नैकविधासु साध्वीषु परम्परासु भारते वेदशास्त्राध्ययनाध्यापनपरम्पराऽनिदम्प्रथमताकात् कालात् प्रवर्तमानाऽऽसीदस्ति चेति सर्वविदितमिदम् । अविच्छिन्नगुरुशिष्यपारम्पर्येण विद्याप्राप्तिश्चिरन्तनैस्सम्प्रदायत्वेन पर्यगण्यत । वेदान् शास्त्राणि च देशस्य शेवधित्वेन निश्चिन्वानाः प्राञ्चस्तद्रक्षणे जागरूका अभवन् । य एव नाधीते वेदान् शास्त्राणि च, तं दूरतो व्रात्यत्वेन पर्यहरन् । आसीद् भारते तादृशश्शोभनस्समयो यस्मिन् वियति तारा ग्रहा इव नार्यो नराश्च यथायथं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ययामर्यादं च स्वस्वाधिकारानुसारेण नियते पथि सञ्चरन्तः साधूनि कर्माण्याचरन्तो नैतिकीं वृत्तिमाश्रित्य श्रोत्रियाननूचानांश्च सत्कुर्वन्तो वृद्धोपसेविन आसन्। परिवर्तनशीले संसारचक्रे लोकाः क्रमेणायुषा बलेन बुद्धया विवेकेन श्रद्धया भक्त्या तपसा च ह्रासमुपगताः साध्वीभिः परम्पराभिर्विच्युताः सतः पथः प्रच्युताः स्वस्वबुद्ध्यनुसारेण वर्तितुमारभन्त। तेन च चिरन्तनैः प्रवर्तितासु परम्परासु नैकविधानि प्रदूषणानि प्रवेशमलभन्त।

तत्र वेदशास्त्राध्ययनाध्यापनपरम्परां विलोकयामः—सर्वप्रथमं साङ्गान् सरहस्यांश्चतुरो वेदान् चत्वारि च शास्त्राणि समधीत्य चिरन्तनास्सहायनिरपेक्षा वेदविहितनित्यनैमित्तिककर्माणि यथायथं समाचरन्तो देशसमाजहितङ्करान् विषयान् ग्राहयन्त आसन्। केचन चतुरस्त्रीन् वा वेदान् शास्त्राणि चाधीत्य, अपरे च द्वौ वेदौ शास्त्राणि च समधीत्य कालमनयन्। अत एव चाधुना 'चतुर्वेदिनः', 'द्विवेदिनः' इति नाम्ना परम्परातस्समागतान् पुरुषानुपलभामहे। कालान्तरे एकवेदाध्यायिनां परम्परा प्राचलत्। परम्परायामस्यां समागता 'एकवेदी' इति नामधारणं व्रीडायै स्यादिति मन्यमानाः कुलपूर्वपुरुषाः 'मिश्रः', 'शुक्लः' इत्येवमादीनि कुलनामानि प्रवर्तितवन्त इति प्रतिभाति। यया कयाचन विधया वेदशास्त्रसम्बद्धास्सर्व एवासन्। गच्छति काले 'वेदाध्यायिनः', 'शास्त्राध्यायिनः' इति द्विधा विभक्ता अभवन्। एवं समये व्यतीते पौरोहित्याय यावानपेक्षितो वेदभागस्तन्मात्राध्यायिनो निर्गताः, शास्त्राध्यायिषु भाषान्तरेणानूदितान् शास्त्रीयान् कतिपयान् विषयानधिगत्य वयं शास्त्रिण इति सभासु प्रवेष्टुमारभन्त। तदानीन्तने समाजे ये कन्यापितरस्ते प्रथमं सलक्षणवेदाध्यायिने सुशीलाय कन्यां प्रादुः, तदनु शास्त्राध्यायिने कन्यादानाय स्पृहयन्ति स्म। घनपाठी संस्कृतं न जानाति, शास्त्री च वेदमन्त्रैरपरिचितः। एतादृशः कालः।

अत्र काञ्चन कथां श्रावयितुमिच्छामि—एकस्य श्रोत्रियस्य द्वे कन्यके आस्ताम्। प्रथमकन्याया वरः कश्चन घनपाठी। सप्ताष्टवर्षानन्तरं श्रोत्रियः कस्मैचन शास्त्राध्यायिने विदुषे द्वितीयां कन्यां प्रददौ। द्वितीयजामाता क्वचिदप्यध्यापकपदमलभमानः पुराणप्रवचने प्रावीण्यमवाप्य तत्र तत्र भागवत-रामायण-गीतादिप्रवचनं कुर्वन् समाजे लब्धप्रतिष्ठो बभूव। एकदा श्वशुरग्रामवासिनस्तं भागवतसप्ताहानुष्ठानाय प्रार्थितवन्तः। तदनुरोधेन श्वशुरजनपदमागत्य श्वशुरगृहे निवसन् भागवतपारायणं प्रवचनञ्च कुर्वन्नासीत्। प्रवचनस्थलं नातिदूर एवासीत्। ज्येष्ठजामाता तु श्वशुरगृह एव वसंस्तत्र तत्र वेदपारायणपौरोहित्यसञ्चालनाय ग्रामाद् ग्रामं पर्यटन् लब्धेन धनेन जीवनयात्रां करोति स्म। सप्ताहदिनेषु ज्येष्ठोऽपि तत्रैवासीत्। कनिष्ठस्य प्रवचनेन ग्रामवासिनस्सन्तृप्तास्तं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विशेषेण सत्कुर्वन्ति स्म। इदं विलोक्य श्वशुरगृहेऽपि विशेषसत्कारं प्राप्नोत्। ज्येष्ठविषये साधारण एवासीत् सत्कारः। एकदा निशि जलस्पर्शार्थं निर्गतः कनिष्ठो गमनागमनाय कल्पिते गृहप्राङ्गणे कटे शयानस्य ज्येष्ठस्योपरि निपत्योत्थाय 'क्षमध्वम्' इत्यभिधायागच्छत्। आगमनावसरेऽपि पादेन स्पृष्टो ज्येष्ठः 'क्षमध्वम्' इति कनिष्ठेन प्रार्थितः। द्वितीयेऽह्न्यपि रात्रावेवमेवाभवत्। 'क्षमध्वम्' इत्यभिधाय,गतागतमकरोत् कनिष्ठः। ज्येष्ठस्तु 'क्षमध्वम्' इत्यस्यार्थं नाजानात्। तस्य क्रोधस्समजनि 'प्रत्यहं मां पदा स्पृशन् क्षमध्वमिति ब्रवीति, एनमहं पाठयामि। रात्रावेवायमेवं करोति, दिवैवैनं निगृह्णामि इति निश्चित्य सभास्थले जनसमूहमध्ये समुपविष्टस्य कनिष्ठस्य नातिदूर उपविष्टो ज्येष्ठः पदे पदे गच्छन्नागच्छंश्च कनिष्ठं पदा स्पृशन् 'द्वितीयास्तृतीयेषु श्रयध्वम्' इति मन्त्रे पठितं श्रयध्वमिति पदमुच्चारयामास। 'श्रयध्वम्' इत्यस्यार्थं नाजानात् कनिष्ठः। एवं घनपाठिनां शास्त्रिणाञ्च स्थितिरासीत्। तदनन्तरं सुमहत् परिवर्तनं विलोकयामः —

वेदास्सञ्जातखेदास्स्मृतिरपि मृतिमापास्ति नो शास्त्रजालं
ए बी सी डीति विद्या जगति विजयते सर्वतः कालदोषात्।
कन्यादानस्य पात्रं न तु निगमविदः किन्तु एफ्-ए समर्थो
बी०ए०बी-एल्० परीक्षास्वधिगतयशसः पङ्क्तिमाद्यां विशन्ति॥

एवमादिभिः प्रदूषणैस्सङ्क्रान्तायां चिरन्तनवेदशास्त्राध्ययनाध्यापनपरम्परायां सम्प्रत्यांशिकाध्ययनेन सर्वज्ञत्वं प्रख्यापयन्तः केचन सभासु प्रवेष्टुमुपचक्रमिरे। कतिपये कतिपयानि पद्यानि विरचय्य मधुरस्वरेण संश्राव्यात्मनो वैदुष्यं प्रकटयितुमारेभिरे। अपरे च कतिपयस्थलानां परिष्कारान् वाचोविधेयान् विधाय,

न भेतव्यं न बोद्धव्यं न श्राव्यं वादिनो वचः।
झटिति प्रतिवक्तव्यं सभासु विजिगीषुभिः॥

इति न्यायमवलम्ब्य सभासु विजयिनो भवन्ति। अन्ये च—

उच्चैरुद्घोष्य वक्तव्यं मध्यस्थश्चेदपण्डितः।
पण्डितो यदि तत्रैव पक्षपातोऽधिरोप्यताम्॥

इति रीतिमाश्रिताः। एवमादिभिः प्रदूषणैः प्रदूषितायां वेदशास्त्राध्ययनाध्यापनपरम्परायां विद्यालयेषु विश्वासां विद्यानामालयेषु चाध्यापका अध्यापनकार्यं कथं परिचालयेयुरिति प्रश्नस्योत्तरं सुलभम्—

वाच्यतां समयोऽतीतः स्पष्टमग्रे भविष्यति।
इति पाठ्यतां ग्रन्थे काठिन्यं कुत्र विद्यते॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

परीक्षापिशाचिकया खलु ग्रस्ताश्छात्रा अध्यापकाश्च । 'वाच्यतां समयोऽतीतः' इत्यनुक्त्वा किं कुर्युः ? अस्मादृते नापरः पन्थाः किल विद्यते । छात्रा अपि तपस्विनः किं विदधीरन् ? यथा वाचनमनुष्ठितम्, तथैव परीक्षासु ग्रन्थगताः पङ्क्तीः पञ्जिकासु लिखन्ति । पञ्जिकापरिशोधकाश्च तानि तानि पुस्तकानि सविधे विन्यस्य वाचनानुसारेण ग्रन्थगताः पङ्क्तयो विन्यस्ता न वेति मात्रं परीक्ष्याङ्कान् प्रददति । अङ्कप्रदाने परीक्षकेण सङ्कोचश्चेत् कृतः, छात्राः पुनः परीक्षणायावेदयन्ति— अस्माभिर्यथाग्रन्थं यथा चाध्यापितं तथैवोत्तराणि दत्तानि, तथाप्यङ्कानां न्यूनता, परीक्षकेण पक्षपातः कृतः । पाठचक्रमे नियतो भागोऽध्यापकेन नाध्यापितः । 'वाच्यताम्' इति न्यायेन केवलं वाचनं कारितम्, तथैव लेखनमपि जातमिति । छात्राणामिदमावेदनमस्थाने ! इति कथनं नोचितम् । ते हि सत्यवाचः ।

अध्यापकेषु पृष्टेषु ते वदन्ति—वयं किं कुर्मः ? वत्सरान्ते परीक्षाणामारम्भः, वत्सरान्तरान्ते परीक्षाफलप्रकाशनम् । कार्यालयीयकर्मचारिण एवमाचरन्ति । सत्रारम्भस्य कथैव नोदेति । कान् विनेयान् कस्यां श्रेण्यां पाठयामः ? कार्यालयो यथासमयं यत् कर्तव्यम्, तन्नाचरति । 'वाच्यतां समयोऽतीतः' इति पन्था एवानुसर्तव्यो भवति । तत्तच्छ्रेण्यां छात्रेष्वनागतेषु मक्षिकापसारणं कुर्वन्तो वयं किं तिष्ठामः ? अध्यापनकार्यं भवतु वा मा वा, नियतं वेतनं लब्धव्यमेव । पारतन्त्र्यनिगडबन्धनादुन्मुक्ते समग्रे देशे स्वातन्त्र्यसुखमनुभवति केवलं वयमेवाध्यापकाः पारतन्त्र्यक्लेशं कथमिवानुभवामः ? कार्यालयाधिकारिणो यथासमयं कार्याणि निर्वर्तयन्तु, यथासमयश्च सत्रारम्भो भवतु । वयमस्मदीयं कार्यं यथायथं कुर्मः । कार्यालयः परीक्षाफलं समये प्रकाशयतु । सत्रारम्भसमये परीक्षारम्भः, सत्रावसाने परीक्षाफलप्रकाशनं चेद् वयं किं कुर्मः ?

कार्यालयाधिकारिषु पृष्टेषु ते निगदन्ति—वयं किं कुर्मः ? आन्दोलनकर्तारश्छात्राः कार्यालयबन्धनाय बलात्कारेण निर्बध्नन्ति, भर्त्संयन्ति, धिक्कुर्वन्ति, अध्यापकाश्च वेतनग्रहणाय, यातायातशुल्कग्रहणाय, परीक्षापारिश्रमिकद्रव्यावाप्तये त्वरयन्ति । लब्धाङ्कग्राहका मक्षिका इवावरुन्धन्ति, त्वरया कार्याणि सम्पादयितुं द्रव्यमपि किञ्चिन्न ददति, किं परीक्षाफलप्रकाशनमेकमेवास्माकं कार्यम् ? नानाविधेषु कार्येषु व्यापृतैरस्माभिर्भवितव्यम् । तत्रापि परीक्षकास्समय उत्तरपञ्जिका, लब्धाङ्कपत्रं च न प्रेषयन्ति । वयं किं कुर्मः ?

परीक्षकेषु पृष्टेषु वयं किं कुर्मः ? पञ्चवर्षेभ्यः पारिश्रमिकद्रव्यं कार्यालयान्न लब्धम् । कथं वयमुत्तरपञ्जिका लब्धाङ्कपत्रञ्च प्रेषयितुं शक्नुमः ? किं वयं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कार्यालयस्य भृत्यास्तदादेशं पालयितुम्। विश्वासां विद्यानामालयो गर्ते वा निपततु, पातालं वा प्रविशतु। वयं किं कुर्मः ?

वित्ताधिकारिणि पृष्टे स रोदिति—अहं किं करोमि ? एतदर्थं यावद्द्रव्यं कल्पितम्, तस्यान्यत्र विनियोगो जातः। कथमहं वितरामि ? अन्यत्र विनियोगः कथं जात इत्यस्य प्रश्नस्योत्तरं लभ्यते—सर्वोच्चाधिकारी प्रष्टव्य इति।

सर्वोच्चाधिकारवति पृष्टे सः प्रतिवक्ति—वत्सरत्रयार्थमहं नियुक्तः। अयञ्च विश्वासां विद्यानामालयो वर्तते। सर्वा अपि विद्याः परिरक्षणीयाः। तदर्थं स्वीकृतपदाभावेऽपि लोकान् नियुनज्मि। नियोगस्वीकारार्थं शासनाय पत्रं प्रेषयामि। अध्यापकान् कर्मचारिणश्चादिशामि यथायथं कार्याणि निर्वर्तयितुम्। मयापि वत्सरत्रयमवस्थातव्यम्। लोकप्रियो यदि न भवामि, कथमत्र स्थातुं शक्नोमि। मदीये वचने न तिष्ठन्ति लोकाः। अत इतस्ततो द्रव्यपरिवर्तनेन स्वीयां स्थितिं दृढीकरोमि। अहमेकाकी कार्यालयस्य, अध्यापकानाम्, छात्राणां च कार्याणि कथं कर्तुं शक्नोमि ? तस्य तस्य कार्यं तेनैव खलु कर्तव्यम्। एवं सर्वोच्चाधिकारी विपरीतावस्थामव्यवस्थां च परिकल्प्य कथञ्चिन्निर्दिष्टसमयं यापयतीत्यपरस्स-र्वोच्चाधिकारी समागच्छति। सोऽपि पूर्वप्रवर्तितां परम्परामनुसरन् वत्सरत्रयं यापयति। एवं तृतीयश्चतुर्थः। वेदशास्त्राध्ययनपरम्परायां लुप्तायामपि सर्वासां विद्यानामालयीयसञ्चालनपरम्परा तु संरक्ष्यत इति सन्तोष्टव्यम्।

अस्या अनर्थपरम्पराया विषयं सर्वविश्वविद्यालयाधिकारी जानात्येव। तस्मिन् पृष्टेऽहं किं करोमि ? लोकतन्त्रशासनमिदम्। लोकतन्त्रे सर्वेऽपि समानाः। नात्र दण्डनीतेरवसरः। राजनीत्यैव लोकतन्त्रं परिचालयितुं शक्यम्। राज्यशासने या नीतिस्सैव शिक्षणसंस्थासञ्चालनेऽपि। लोकतन्त्रमिदृशं वर्तते। अहं किं करोमि ? इत्युत्तरं लभ्यते। अन्ततोऽस्या अनर्थपरम्परायाः प्रदूषणानां च निवारणे जगन्नियन्तारमेव शरणं गच्छामः। स किं वदिष्यतीति पश्यामः—भगवन् जगन्नियन्तः ! दयासिन्धो ! करुणावरुणालय ! किमेवमेव देशस्स्थास्यति ? किमेवमेव वेदशास्त्राध्ययनाध्यापनपरम्परा प्रदूषिता भविष्यति ? अनैतिकतायाः प्रदूषणसङ्क्रमणस्योत्सादनाय पुरेव नैतिकताया दूषणरहितचिरन्तनवेदशास्त्रा-ध्ययनाध्यापनपरम्परायाः प्रवर्तनाय च कोऽप्युपायः किं नास्ति ? इति पृष्टे भगवति भगवानपि कथयेत् किमहं करोमि ? इति। सृष्टिस्थितिलयेषु सामर्थ्य-मावहन्नपि भगवान् किं कुर्यात् ? स हि सर्वान् प्राणिनस्संसृज्य आत्मरक्षणाय साधनानि कल्पयामास। शरीरे कण्ड्वां समुत्पन्नायां तदपनोदनाय भगवान् किं कथयेत्—अहं किं करोमि ? तदपनोदनाय साधनान्यहमदाम्। तैस्तत् साध्यरवे-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

त्येव ब्रूयात्। सर्वेभ्यः सत्त्वेभ्यो विभिन्नानि नख-दन्त-शृङ्ग-चञ्चुप्रभृतीनि साधनान्यहं प्रादाम्। शरीरमात्मानं ये मन्यन्ते, शरीरेन्द्रियाद्यतिरिक्तमात्मानं येऽवधारयन्ति, ये च देशं राष्ट्रं वाऽऽत्मानं निश्चिन्वन्ति मानवास्तेभ्यस्तत्तदात्मरक्षणाय 'विवेकं' साधनं दत्तवानहम्। विवेकेन मानवस्तस्य तस्य रक्षणं विदध्यात्।

ये च शिक्षणसंस्थासु विश्वासां विद्यानामालयेषु च सम्बद्धाश्छात्रा अध्यापकाः कार्यालयाधिकारिणः सर्वोच्चाधिकारी वा, तेषामात्मा सा सा शिक्षणसंस्था, विश्वासां विद्यानामालयश्च। विशेषतः संस्कृतसंस्थानां विश्वविद्यालयानां च संस्कृतं जीवातुः। संस्कृतमपि स्वात्मा। प्राणोऽपि देवतात्मा। तद्रक्षणायापि साधनं विवेकः। शरीरे सन्ति नानावयवाः। ते न मिथः कलहमाचरन्ति। शरीरञ्चेदात्मा संस्कृतसंस्थानानि विश्वासां विद्यानां चालयाश्चास्माकं शरीराणि। तेषां छात्रा अध्यापकाः कर्मचारिणश्चावयवाः। किमवयवानां मिथः कलहाय, आरोपप्रत्यारोपणाय चास्मभ्यं भगवता विवेको दत्तः? राज्यस्य राष्ट्रस्य वा शासने कामं राजनीतिरुपयुज्यताम्। शिक्षणसंस्थासु राजनीतेः क्वावसरः? शासने शास्यशासकभावः शिक्षणसंस्थासु च गुरुशिष्यभावः। संस्कृतं भारतीयसंस्कृतेर्मूलम्। संस्कृतशिक्षणसंस्थास्वेव यदीयमनर्थपरम्परा तर्हि संस्कृतं भारतीयसंस्कृतेर्मूलं कथं परिगण्येत? नवीनशिक्षाक्रमे संस्कृतं योजयितुं सर्वे वयं कामयामहे। अनुरुन्ध्मश्चाधिकारिणो नवीनशिक्षाक्रमे संस्कृतस्य विशिष्टं स्थानमारक्षणीयमिति। किन्तु ते वदेयुः—वयं किं कुर्मः? संस्कृतस्यैव केवलं शिक्षणाय सङ्ख्यातीतानि संस्थानानि अनेके विश्वविद्यालयाश्च सन्ति। एतेषु ये दुराचारा व्यभिचारा भ्रष्टाचाराश्चानुभूयन्ते, तेऽन्यत्र शिक्षणसंस्थासु नानुभूयन्त इति लोकेषु वदत्सु वयं किं कुर्मः? कथञ्च नवीनशिक्षाक्रमे संस्कृतं निवेशयामः? कस्मै च प्रयोजनाय संस्कृतं योजयामः? यत् प्रयोजनं संस्कृतस्य, तस्मिन् संस्कृतसंस्थानेष्वनुपलभ्यमाने नवीनशिक्षाक्रमे तस्य निवेशे को लाभः? संस्कृताध्ययनं द्रव्यार्जनौपयिकं न भवतीति सर्वस्वसंवेद्यम्। भारतीयसंस्कृतिप्रसारौपयिकन्तु तदिति सत्यम्; किन्तु संस्कृतसंस्थानैः संस्कृतविश्वविद्यालयैश्च तन्न क्रियत इति प्रत्यक्षमीक्षामहे। एवं सति वयं किं कुर्मः? इत्यधिकारिषु वदत्सु तावदस्माभिरपि वक्तव्यं भवति—वयं किं कुर्मः? इति।

●

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

महाभाष्यग्रन्थो भोजपुरी च

'पद्मभूषणम्' आचार्यश्रीबलदेवोपाध्यायः
भू० पू० निदेशकः,
अनुसन्धानसंस्थानस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
वाराणसी

❀ ❀ ❀

अस्य लेखस्य शीर्षकं दृष्ट्वा पाठका आश्चर्यचकिता भविष्यन्ति। एषा स्थितिः स्वाभाविकी। क्व संस्कृतव्याकरणस्य सर्वतो भावेन महामान्यो महर्षि-पतञ्जलिविरचितो महाभाष्यग्रन्थः! क्व चोत्तरप्रदेशस्य पूर्वसीमायां प्रचलिता लोकभाषा (भदेसिया) भोजपुरी!! द्वयोः सम्पर्कस्य कापि सम्भावनैव नास्ति। भोजपुरीभाषायाः सहयोगेन महाभाष्यस्य विषमशास्त्रीयग्रन्थीनां स्फोटने कस्यापि विचारशीलस्य जनस्य ध्यानाकर्षणं नितान्तमाश्चर्यजनकमस्ति। परञ्च वस्तुस्थितिस्त्वेतादृश्येव आश्चर्यप्रसविनी अस्ति।

एतन्नितान्तं सत्यमस्ति यत् कस्यापि प्रदेशविशेषस्य भाषाभाषिषु तत्प्रदेशे व्यवहृताया देववाण्या भाषाशास्त्रीयाणां वाग्योगानां (भाषायाः प्रकृष्टयोगानां) प्रभावमन्वेष्टुं क्षमः। कार्यं दुरूहमस्ति, परञ्चासम्भवं नास्ति। पतञ्जलिना संस्कृतं शिष्टजनानां भाषा प्रतिपादिता, परञ्च संस्कृतं तद्युगस्य लोकभाषायाः पदे प्रतिष्ठिताऽऽसीत्—साधारणा जना अपि वार्त्तालापेऽस्या भाषायाः प्रयोगं कुर्वन्ति स्म।

पूर्वलेखे (निबन्धे) निर्दिष्टमस्ति यत् पतञ्जलेः परिचितं भूमिखण्डं काशीमण्डलमस्ति यद् वाराणसीमारभ्य पाटलिपुत्रपर्यन्तं विस्तृतमासीत्, यच्चाधुना 'भोजपुर'मण्डलनाम्ना व्यवहरन्ति लोकाः। तैरङ्कितं देवदत्तस्य जीवनवृत्तमस्यैव भूमिभागस्य प्रतिनिधिभूतस्य सामान्यजनस्य जीवनचरित-मस्ति। फलतः पतञ्जलिना निर्दिष्टानां संस्कृतस्य वाग्योगानां प्रयोगा अस्य मण्डलस्य लोकभाषायां भोजपुर्यां विद्यमाना घटना अस्मान् आश्चर्यचकितान् न करोति। इयं भाषाशास्त्रीया परम्पराऽद्याप्यक्षुण्णरूपेण विराजमाना वर्तते। साम्प्रतिकी (आधुनिकी) कौरवी-उपभाषायाः (खड़ी बोली इति नाम्न्याः)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मूलस्थानमस्मात् प्रदेशाद् अतिदूरे पश्चिमदिशि सम्भवात् संस्कृतस्य वाग्योगानां (मुहावरा इति लोकभाषायाम्) अस्यामुपभाषायां प्रचलनं व्यवहारो वा न मिलति, तन्मेलनस्य चाऽऽशापि नास्ति। परञ्च काशी-मण्डलस्य लोकभाषायां जनवाण्या वाग्योगानां प्रयोगः समुचितरूपेण मिलति। अस्या लोकभाषाया भाषयितार इमां सूक्तिं जानन्तु न वा जानन्तु। भोजपुरी-भाषायामीदृशीनां सूक्तीनामस्तित्वमस्ति, यस्या मूलसंस्कृतभाषया सम्बन्धो वर्तते। तथ्यमिदमुदाहृत्य परिज्ञानस्य प्रयासः क्रियते।

महर्षिणा पतञ्जलिना धातूनामनेकार्थकस्थितितथ्यं सम्यगवबोधितम्। सामान्यरीत्या धातोर्योऽर्थः प्रतिपाद्यते धातुपाठे, तस्मादपि भिन्नेऽर्थे लोकव्यवहारे तत्प्रयोगप्राप्तिरसामान्या स्थितिर्न विद्यते। उदाहरणाय 'कृ धातोः' अर्थं विचारयन्तु। 'कृ' धातोः सामान्योऽर्थोऽस्ति—'करणम्', इति। कस्यापि नवीनवस्तुनः सम्पादनम् 'विरचनम्' आदिः। 'कृ' इत्यस्य साधारणोऽर्थोऽस्ति—अभूतप्रादुर्भावः। यद्वस्तु न स्यात्, तदुत्पत्तिकरणम् इति तदर्थः। परञ्च नेयता मात्रेण तस्यार्थस्य गतार्थता भवति। तस्यैकोऽर्थो निर्मलीकरणमप्यस्ति। स्वच्छीकरणम्, निर्मलतानिष्पादनं वेति तदर्थः। अस्यार्थे पतञ्जलिना तावदुदाहरणार्थं वाक्यद्वयं प्रयुक्तम्—'पृष्ठं कुरु', 'पादौ कुरु'। यस्यार्थोऽस्ति—पृष्ठदेशं निर्मलं (मलरहितं) कुरु, प्रोञ्छय चरणौ, स्वच्छीकुरु। अस्मिन्नेव विशिष्टेऽर्थे मुख्येयं सूक्तिः प्रचलिताऽस्ति।

महाभाष्यस्य कथनमस्ति—

करोतिरभूतप्रादुर्भावे दृष्टः। निर्मलीकरणं चापि विद्यते पृष्ठं कुरु, पादौ कुरु, उन्मृदानेति गम्यते (महाभा० १।३।१।) सूत्रोपरि महाभाष्ये।

अत्र ध्यातव्यं विचारणीयश्चास्ति यद् अद्यायं प्रयोगः कस्यामुपभाषायां प्रचलितोऽस्ति। कौरवी-भाषायां पादौ कुरु इत्यस्याक्षरशोऽर्थो भविष्यति 'पैरों को करो', परञ्चास्य वाक्यस्य कोऽपि समुचितोऽर्थः तात्पर्यं वा न निस्सरति। अस्मिन् प्रसङ्गे 'भोजपुरी' अस्य पदप्रयोगस्यार्थं मीमांसायै अस्माकं सर्वविधसाहाय्यं कर्त्तुं प्रस्तुता विद्यते। भोजपुर्यामुपभाषायां 'पादौ कुरु' इत्यस्यार्थो भविष्यति 'गोड़ करना' अर्थात् पादयोः निर्मलीकरणम्। अपि चैतत् पदं भोजपुरस्य लोकव्यवहारे अद्यापि व्यवहृतमस्ति। अस्मिन् अर्थनिरूपणप्रसंगे एकमनुभूतं लघुप्रसङ्गमुपस्थापयामि—

उत्तरप्रदेशस्य सुदूरपूर्वभागे स्थितस्य बलियाजनपदस्य दवीयसोऽञ्चलस्य वास्तव्य एको ग्रामीणः सेवकः काश्यामानीतो मया। तस्योपरि नागरिक्या

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भाषायाः प्रतिबिम्बमपि न पतितमासीत्। सः मूलतो 'भोजपुरी' उपभाषया (या ग्रामेषु विशुद्धरूपेण व्यवह्रियते) एव परिचित आसीत्। स्वामिना यदा स गृहस्यानेककार्याणि कर्त्तुमागृहीतः, तदा स रोषं प्राप्य मानसीम् अरुचिकरीं स्थिति प्रदर्शयन् भोजपुर्यामवदत्—एतत् सर्वं कार्यं कर्तुं नाहं समागतः, (ई कुली काम करे हम नईखी आइल)। अहम् पादौ प्रक्षालयिष्यामि (हम गोड करबी) पृष्ठं मर्दयिष्यामि (पीठ करबी) मस्तकसेवां करिष्यामि (माथा करबी) अन्यत् किमपि न करिष्यामि। अस्य वाक्यस्य स्पष्टोऽर्थोऽस्ति—स पादौ प्रक्षालयिष्यति, पृष्ठभागस्य मर्दनं करिष्यति; अपि च मस्तकस्य लघ्वायासेन सेवां करिष्यति, इत्यलमन्यत् किमपि कार्यं न करिष्यति। फलतोऽत्र 'गोड करबी, पीठ करवी' वाक्येषु पतञ्जलिना निर्दिष्टोऽर्थः स्पष्टतोऽभिव्यक्तो भवति। अयं परम्परागतोऽर्थोऽस्ति, यो भोजपुरीभाषां पतञ्जलिकालीनसंस्कृतस्य भाषणोपभाषणेन सम्मेलयति। ध्यातव्यमेतद् यल्लोकवाणीकारणेनैव 'भोजपुरी' देववाण्या भावधारायाः प्रातिनिध्यं कर्त्तुं सर्वथा समर्थाऽस्ति।

पर्यन्त इदमेव कथनमस्ति यद् धन्येयमस्माकं 'भोजपुरी' उपभाषा (लोकभाषा, लोकवाणी वा), यस्याः साहाय्येन महाभाष्यस्य विषमपङ्क्त्याः यथाविहितोऽर्थः सम्भवति। धारावाहिक्याः परम्पराया ज्ञानं भवति। यद्यस्याः सहायता प्राप्ता न भवेत्, तदा पण्डितजना भाषाया आपणे निर्निमेषभावेन स्थिता एव स्युः, महाभाष्यस्य च महार्घ्यं क्रेतव्यं वस्तु क्रेतुं कोऽपि जनो न मिलेत्। इयं सूक्तिः सर्वथा सत्यास्ति—

पातञ्जलमहाभाष्यव्याख्याममर्मप्रकाशिका ।
जीयाद् भोजपुरी भाषा भव्यभावानुवर्तिनी ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तन्त्रशास्त्राणां सामयिक उपयोगः

श्रीव्रजवल्लभद्विवेदः
भू० पू० सांख्ययोगतन्त्रागमविभागाध्यक्षः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी

❀❀❀

विशालस्य भारतीयवाङ्मयवटवृक्षस्य सन्ति सुदृढं प्ररूढाः शाखाप्रशाखाः। तासु तन्त्रशास्त्रशाखामधिरुह्य वयमत्र विचाराय समवेताः स्मः। प्रस्तुतेऽस्मिन् निबन्धे न कश्चन शास्त्रीयो गवेषणाभरितो व विषयश्चचर्च्यंत इति शीर्षकावलोकनेनैव ज्ञातं स्याच्छ्रीमद्भिः। विविधदेशवेशभूषा–भाषा–धर्म–वर्ग–वादायुपाधिभिर्विभाजितो मानवसमाजः कथं नाम सुखेन शान्त्या च जीवेत् परमाण्वस्त्रभीत्या त्रासित इति वर्तते साम्प्रतिकी विषमा समस्याऽस्माकं समक्षम्। सति समये समाधानमस्या अपेक्षितमिति तदेवात्र विचार्यंते तन्त्रशास्त्रसरण्या। प्रत्नेऽप्यस्मिन् शासने पिहितानि वर्तन्ते साम्प्रतिकमानवीयसमस्यानां समाधानबीजानीति तान्यत्र प्रकाश्यन्ते।

सर्वप्रथमं तावदस्माभिः परिधिरस्य शास्त्रस्य नूनं निर्धारणीयः। त्रिविभागं चतुष्पादं शासनमेतत्। संहितापदेन परिगृहीता वैष्णवागमाः, आगमपदेन संगृहीताः शैवागमाः, तन्त्रपदाभिलप्यानि च शाक्तानि, शैवानि, बौद्धानि तन्त्राणीति भिन्नान्येतानि शास्त्राणीति प्रतिपाद्यते कैश्चन विपश्चिद्भिः। मतमेतदविचारितरमणीयमिति साधितमस्माभिरिदम्प्रथमतया मराठीभाषायां प्रकाशिते[1] 'आगम आणि तन्त्रशास्त्र' इत्याख्ये निबन्धे। वस्तुतस्तु संहितागमतन्त्रपदाभिलप्यं त्रिविभागमिदं सम्पूर्णं तान्त्रिकं वाङ्मयं शैवाद्यागमेषु विद्या-क्रिया-योग-चर्याख्येषु चतुर्षु पादेषु प्रतिपादितान् सर्वान् विषयान् पादभेदेनाभेदेन वा क्वचन नामभेदेन वा वर्णयतीति नात्र काचन विचिकित्सा। एवं च[2] वैखानस-

१. पुण्यपत्तनस्थ (पूना) वेदशास्त्रोत्तेजकसभया १९७८ ई० वर्षे प्रकाशिते 'प्राचीन भारतीय विद्येचे पुनर्दर्शन' इत्याख्ये ग्रन्थे १८१-१९६ पृष्ठेषु प्रकाशितोऽयं निबन्धः। अस्य हिन्दीरूपान्तरम् "आगम और तन्त्रशास्त्र" इत्याख्ये ग्रन्थे (पृ० १-१२५) द्रष्टव्यम्।

२. "पाञ्चरात्रं भागवतं तथा वैखानशाभिधम्" नित्याषोडशिकार्णवसेतुबन्धे (पृ०५) भास्कररायेण समुद्धृतम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पाञ्चरात्र-भागवतभेदभिन्ना वैष्णवागमाः, पाशुपत-सिद्धान्त-कालामुख-कापालिक-कौलप्रत्यभिज्ञा - वीरशैवादिभेदभिन्नाः शैवागमाः, नानाविधोपासनाविधायकाः शाक्तागमाः, क्रियाचर्यायोगानुत्तरभेदभिन्ना बौद्धागमाः, पद्मावत्यादिसमुपासना-विधायका जैनागमाश्च सर्वे एते तन्त्रशास्त्रपदाभिलप्या अपि भवन्ति ।

तदेतस्यागमशास्त्रस्य तन्त्रशास्त्रपदाभिलप्यस्य विशालं वाङ्मयमास्ते, इति जानीमो वयम् । पाञ्चरात्रस्य पाशुपतस्य च मतस्य प्राचीनताविषये[1] डॉ० आर० जी० भाण्डारकर-डॉ० हेमचन्द्ररायचौधुरी[2]-महोदयाभ्यां सम्यग् विचारितम् । प्राचीने बौद्धवाङ्मये समुपलभ्यते[3] पाञ्चरात्राणां पाशुपतानां[4] चाचाराणां समुल्लेखो यत्र तत्र । शतपथब्राह्मणे (१३।६।१) पाञ्चरात्रसत्रं वर्ण्यते । छान्दोग्योपनिषदि (७।१।२) श्रुता तावदेकायनविद्या पाञ्चरात्रागमस्यैव नामान्तरम् ।[5] महाभारते नारायणीयोपाख्याने स्फुटमेवोच्यते—

सांख्यं योगः पाञ्चरात्रं वेदाः पाशुपतं तथा ।
ज्ञानान्येतानि राजर्षे विद्धि नानामतानि वै ।। इति ।

अत्रैव (३४९।६५-६८) सांख्यस्य कपिलः, योगस्य हिरण्यगर्भः, वेदाना-मपान्तरतमाः, पाशुपतस्य श्रीकण्ठः, पाञ्चरात्रस्य च स्वयं भगवान् वक्तेति प्रतिपाद्यते । अन्यत्राप्युच्यते –

सांख्यं योगः पाञ्चरात्रं वेदाः पाशुपतं तथा ।
स्वयंप्रमाणान्येतानि न हातव्यानि हेतुभिः ।। इति ।

पाञ्चरात्रमतानुयायी राजा वसुरूपपरिचरोऽहिंसकेन सत्रेण नारायणमीड-यामासेति महाभारत एव[6] नारायणीयोपाख्याने वर्णितम् । प्राचीनतमेषु शिला-शासनेषु पाणिन्यादिग्रन्थेषु च समुल्लिखिता वासुदेवोपासना[7] इतिहासज्ञैरप्यङ्गी-कृता, तदेतस्यैव धर्मस्याङ्गम् । कृष्णशुक्लयजुर्वेदयो.[8] शतरुद्रियाध्याये वर्ण्यते रुद्रस्य महिमा । अत्र रुद्रः स्तेनानां तस्कराणां शूद्राणामतिशूद्राणां चाप्याराध्यतया

१. "वैष्णविज्म, शैविज्म एण्ड अदर माइनर रिलीजस सिस्टम्स" इत्याख्ये ग्रन्थे ।

२. "अर्ली डिस्ट्री आफ दि वैष्णव सेक्ट" इत्याख्ये ग्रन्थे ।

३. वैष्णविज्म०, पृ० ३; ४. धम्मपदे १४१ गाथा द्रष्टव्या ।

५. शान्तिपर्वणि ३४९ अध्याये, ६४ श्लोकोऽयम् ।

६. शान्तिपर्वणि ३३६ अध्याये, १०-११ श्लोकौ द्रष्टव्यौ ।

७. वैष्णविज्म०, पृ० ३-४ ।

८. तैत्तिरीयसंहितायां चतुर्थकाण्डे पञ्चमः प्रपाठकः, माध्यन्दिनसंहितायां षोडशाध्यायश्च ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वर्णितः।[१] कृष्णयजुर्वेद-संहितारण्यकयो रुद्रस्याघोरवामदेवादिपञ्चस्वरूपाणां दृश्यते तादृगेव स्वरूपम्, यादृशं हि वर्ण्यते पाशुपतसूत्रकारेण। श्रीकण्ठः पाशुपतमतस्याद्यः प्रवक्तेत्यनुपदमेव प्रदर्शितेन महाभारतवचनेन सिद्धयति।

त इमे पाञ्चरात्रपाशुपतमते एव परवर्तिनो वैष्णवस्य शैवस्य च धर्मस्य आधारस्तम्भरूपे। बौद्धजैनधर्मयोराविर्भावात् प्राग् आभ्यां भारतीयायां संस्कृतौ वैदिके धर्मे चावश्यकं संशोधनं परिवर्तनं च सम्पादितम्। तदेवं कुर्वद्भ्यामप्याभ्यां बौद्धानां जैनानामिव च न वैदिको धर्मः सर्वथा प्रत्याख्यातः; किन्तु तत्प्रामाण्याङ्गीकारमुखेनैव तत्र किमप्यौज्ज्वल्यमाहितम्। अस्मिन् प्रसङ्गे वसुरूपपरिचरस्योपाख्यानं निदर्शनतया समुपस्थापयितुं शक्यते, यत्र हि नारायणोपासकस्य गगनविहारसामर्थ्यवतस्तस्य हिंसकयागसमर्थनेन तत्सामर्थ्यनाशः समुपवर्णितः[२]।

पाञ्चरात्रं पाशुपतं च वाङ्मयमागमपदाभिलप्यं भवति। तदनेन वाङ्मयेन न केवलं वैदिके धर्मे; अपि तु कालपरिपाकेन बौद्धधर्मेऽपि परिष्कारः सम्पादितः। तेन हि तत्र महायानशाखा प्रसूतिं लेभे। अपि च, तदनुप्राणिता एव सन्ति मूर्ति-स्थापत्य-चित्र-संगीतादिकाः कलाः। विद्या-क्रिया-योग-चर्याख्येषु चतुर्षु पादेषु प्रायो विभक्तानि सन्त्यागमशास्त्राणि। विद्यापादे ज्ञानस्य (दर्शनस्य), क्रियाचर्यापादयोः प्रसङ्गतः कलानाम्, योगपादे च योगस्य विधिर्वर्णितः। परवर्तिनां शैवानां शाक्तानां बौद्धादीनां च तन्त्राणां विकासभूमिरागमशास्त्रमेव। फलत आगमशास्त्राणि तन्त्रशास्त्राणि चेति नार्थान्तरम्।

डॉ० रामकृष्णगोपालभाण्डारकरमहोदयेन स्वकीये ग्रन्थे न केवलं वैष्णवस्य शैवस्य च मतस्य, अपि तु शाक्त–गाणपत्य–सौरस्कन्दसम्प्रदायानामपि स्वरूपपरिचय उपस्थापितः। ततः परं यद्यपि वैष्णवानां शैवानां शाक्तानां बौद्धानां चागमेषु तन्त्रेषु च पृथक् पृथगनुशीलनं समजायत, तथापि सर्वेषामेवैषां तान्त्रिकाणां सम्प्रदायानां परस्परानुस्यूततायां तावन्नावहितं कैश्चिदपि विपश्चिद्भिः। साम्प्रतं सर्वेषामागमशास्त्राणां तन्त्रशास्त्राणां च समन्वयात्मकस्यानुशीलनस्य समारम्भः श्रीमद्भिः श्रद्धेयचरणैर्महामहोपाध्यायपण्डितगोपीनाथकविराजमहोदयैरक्रियतेति प्रायो जानन्त्येव विद्वांसः।

---

१. मैत्रायणीयसंहितायां २।९।१, २।९।१० तथा तैत्तिरीयारण्यके १०।४३-४७ स्थलं द्रष्टव्यम्।

२. महाभारते शान्तिपर्वणि नारायणीयोपाख्याने ३३७, १-१७।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्राक्तने वैदिके धर्मे कदाचन वर्णाश्रमव्यवस्थाया हिंसाबहुलानां यागादीनां च प्राबल्यमासीत्। औपनिषद-तान्त्रिक-बौद्ध-जैनसिद्धान्तैः प्रवृत्तेरस्याः प्रतिरोधोऽक्रियत। गच्छता कालेन औपनिषदाः सिद्धान्ता वैदिके ज्ञानकाण्डे समावेशमापुः, बौद्ध-जैन-दृष्टिभ्यां च सर्वथा वेदस्याप्रामाण्यमुद्घोषितम्। तदनयोर्मध्यवर्तिन आसन् तान्त्रिका विचाराः[1]। महाभारतकालादारभ्य महिम्नःस्तोत्रकर्तुः पुष्पदन्तस्य कालं यावद् भारतीये वाङ्मये वेद-सांख्ययोग-पाञ्चरात्र-पाशुपतशास्त्राणां समानं प्रामाण्यमभिप्रेतमासीत्। रामायणे, महाभारते, भगवद्गीतासु, पुराणेषु च मतानामेषां परस्परं समन्वयः समजायत। परवर्तिभिर्धर्मशास्त्रनिबन्धकारैरपि वेदमनु स्मृतिवत् तन्त्रशास्त्राणां प्रामाण्यमूरीकृतम्। वैष्णव-शैव-शाक्तागमसदृशी योगस्योपासनायाश्च विशिष्टा पद्धतिर्बौद्धेषु जैनेषु च विकासमाप। सर्वेष्वेतेषु मौलिकाः सिद्धान्ताः समाना एव। साम्प्रतिकेषु भारतीयेषु सभ्यता-संस्कृति-धर्मेषु वैदिकविधीनामपेक्षया तन्त्रशास्त्रपद्धतीनां वर्तते महीयान् प्रभाव इत्यङ्गीकर्तव्यमेव।

तन्त्रशास्त्रमिति प्राचीनाया भारतीयायाः संस्कृतेः काचन विशिष्टा पद्धतिः। प्रागैतिहासिकीषु संस्कृतिषु तस्या मूलमामनन्ति मनीषिणः। अथर्ववेदे यजुर्वेदे च तस्याः प्राचीनं स्वरूपमवलोक्यते। ऐतरेयारण्यकादिषु—'अकारो वै सर्वा वाक्' (२।३।६), 'अ इति ब्रह्म' (३।३।८) इत्यादिप्रतिपादनं शैव–शाक्त-बौद्धतन्त्रेषून्मीलितं मातृकास्वरूपं स्मारयति। वैदिकवाङ्मये वैष्णवानां शैवानां च सिद्धान्तानामुल्लेखो वर्तत इति साधयन्त्येव विद्वांसः; किन्तु ते पाञ्चरात्र-पाशुपतशब्दावप्रयुज्य तत्स्थाने वैष्णव-शैवशब्दो प्रयुञ्जते। वस्तुतस्तु पराक्कालिकाविमौ शब्दौ पौराणिकीं संस्कृतिमभिव्यञ्जयतः। पुराणेषु किल न कस्यापि नूतनस्य दर्शनस्य सिद्धान्तस्य वा प्रतिपादनं विद्यते; किन्तु वेद-योग-सांख्य-पाञ्चरात्र-पाशुपतमतानामथ च बौद्धानां जैनानां चाप्युत्कृष्टविचाराणाम्, तदानीं प्रसृतानां शाक्त-गाणपत्य-स्कान्द-सौर-सम्प्रदायानां च सिद्धान्तानां समन्वयमुखेन भारतीयायाः संस्कृतेर्नूतनं स्वरूपं तत्रोन्मीलितम्। विभिन्नेषु मतेषु सम्प्रदायेषु चाविरोधापादनमेव पुराणानां प्रमुखं प्रयोजनम्। तदनयैव दृशा पुराणानामनुशीलने समाचरिते भारतीयानां धर्माणां संस्कृतेश्चैतिहासिकं स्वरूपमधिगन्तुं शक्यते। न केवलं पुराणानामपि तु वैष्णव-शैव-शाक्त-योग-वेदान्ताद्युपनिषदामप्यनयैव पद्धत्याऽनुशीलनमुचितम्। पुराणेषु साम्प्रदायिकोपनिषत्सु च समये समये भारतीयायां संस्कृतौ प्रादुर्भूतानां नूतनानां स्रोतसां तस्या अनारतं प्रवहता प्रवाहेण संयोजनस्यैव प्रयासः समवलोक्यते। हालैण्डदेशीयेन प्रथितेन विदुषा डॉ० जे० खोण्डामहोदयेन स्वकीये ग्रन्थे तदेतत् तत्त्वं सम्यगुन्मीलितम्।

१, 'आगम और तन्त्रशास्त्र' इत्यत्र ९-१० पृष्ठयोः प्रमाणवचनानि द्रष्टव्यानि।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तान्त्रिक्यामुपासनायां दीक्षितस्य मानवमात्रस्याधिकारो वर्तते। न ह्यत्र वर्णाश्रमादिकृतः कोऽपि प्रतिबन्धः। एतद्दृष्ट्या छान्दोग्योपनिषदस्य शास्त्रस्यातीव साम्यं धत्ते। अत्र हि सत्यकामस्य जाबालस्य (४।४), महीधरस्य ऐतरेयस्य (३।१६), रैक्वजानश्रुतेश्चोपाख्यानानि (४।१।२) तमिमं तान्त्रिकं सिद्धान्तमेव पोषयन्ति। देवकीपुत्रस्य घोराङ्गिरसस्य च संवादः सत्यमेव पाञ्चरात्रसिद्धान्तान् स्मारयति। अत्रोल्लिखिता (७।१।२) एकायनविद्या पाञ्चरात्रश्रुतेरेवापरं नामेति पूर्वमुक्तमेव। अत्र वर्णिता ध्रुवा स्मृतिरेव रामानुजीये वेदान्ते भक्तिप्रपत्तिशब्दाभ्यां व्याख्याता। श्रीमद्भगवद्गीता[1] पाञ्चरात्रमतानुप्राणितेति साधयन्ति विद्वांसः।

विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः॥' (५।८) इति।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परांगतिम्' (९।३२)।

इति च तत्र प्रतिपाद्यते। लकुलीशपाशुपतमतव्यवस्थापकोऽष्टाविंशतिपाशुपतयोगाचार्येष्वन्तिमो लकुलीशः कायावरोहणतीर्थे लब्धजन्मा खल्वैतिहासिकः पुरुषो द्वितीयशताब्दीभव इति निर्धारयन्ति विद्वांसः[2]। "सर्वदेवमयः कायः' इति[3] सिद्धान्तं स प्रतिष्ठापयति। तदनुप्राणितान्येव पिण्डब्रह्माण्डयोरैक्यावबोधकानि वचनानि श्रूयन्ते। पिण्डब्रह्माण्डयोरभेदापादनाय वर्तते काचिदान्तरयजनप्रक्रिया तान्त्रिकी। उपर्युक्ता आगमतन्त्राणां सर्वाः शाखाप्रशाखा भगवद्गीताया लकुलीशस्य च तानेतान् सिद्धान्तानुपजीवन्ति।

सर्वाण्यागमतन्त्रशास्त्राणि बाह्यशुद्धेरपेक्षयाऽऽन्तरशुद्धिं प्रशस्ततरां मन्वते। मानसिकवेगानां रागद्वेषलोभमोहकामक्रोधादीनां विशोधनाय समनुष्ठीयते तदिदमान्तरं यजनम्। शिवानन्दामृतानन्दभास्कररायप्रभृतीनां सुभगोदयवासनासौभाग्यहृदयस्तोत्र-चिद्विलासस्तव-वरिवस्यारहस्यादिषु विज्ञानभैरव-संकेतपद्धतिप्रभृतिग्रन्थेषु च तदेतस्या आन्तरवरिवस्यायाः स्वरूपमुन्मील्यते। बौद्धतन्त्रेष्वपि

१. लोकमान्य-बालगंगाधर-तिलक-विरचितस्य गीतारहस्यस्य उपोद्घाते 'भागवत धर्म का उदय और गीता' इत्याख्यं प्रकरणं द्रष्टव्यम्।

२. डॉ० कान्तिचन्द्र पाण्डेय विरचितस्य 'शैवदर्शनबिन्दुः'' इत्याख्यस्य ग्रन्थस्य २७-२९ पृष्ठानि द्रष्टव्यानि।

३. सर्वदेवमयः कायः सर्वप्राणिष्विति स्फुटम्।
श्रीमद्भिर्नकुलेशाद्यैरप्येतत् सुनिरूपितम्॥
(तन्त्रालोके, १५.६०४)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पापदेशना-पुण्यानुमोदना - पुण्यपरिणामना - त्रिशरणगमन-आत्मभावनिर्यातन - अध्येषण-बोधिचित्तोत्पादनाख्यसप्तविधानुत्तरपूजारूपेण 'आध्यात्मिकी पूजा निष्पाद्यते। चतुर्ब्रह्मविहारभावना, सर्वधर्मप्रकृतिपरिशुद्धता, सर्वधर्मशून्यता-भावना च तस्या आन्तरपूजाया एवाङ्गम्। बौद्धतन्त्रेषु वर्णिता चतुर्ब्रह्मविहार-भावना पातञ्जलयोगसूत्रे—"मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्य-विषयाणां भावनातश्चित्तप्रसादनम्" (१।३३) इत्येवमिदम्प्रथमतया चित्तप्रसा-दनोपायतया वर्ण्यते। एतदभिप्रायकं वचनं जैनाचार्येण उमास्वामिना संदृब्धे तत्त्वार्थसूत्रेऽपि (७।११) दृश्यते। "वाग्विशुद्धः" (५।२७) इति च वर्तते पाशुपतं सूत्रम्। वाग्विशुद्धिश्चित्तविशुद्धिश्च कस्य नाम नाभिप्रेता।

अपि चाभिनवगुप्ताचार्यस्तन्त्रालोके—"इह तावत् समस्तोऽयं व्यवहारः पुरातनः। प्रसिद्धिमनुसन्धाय सैव चागम उच्यते।" (३५।१-२) इति, "प्रसिद्धि-श्चाविगानोत्था प्रतीतिः शब्दनात्मिका" (३५।१९) इति चागमपदव्युत्पत्तिं प्रदर्शयति, ईश्वरप्रत्यभिज्ञाविवृत्तिविमर्शिन्यां च सर्वागमानां प्रामाण्यमित्थमुप-पादयति–आगमो हि नामायं शब्दनसंक्रान्तिशरीरः। यथाह भगवाननन्तः—"परत्र स्वबोधसंक्रान्तये शब्देनोपदिश्यते" (भा० ३, पृ० ८९), "स च यो यस्य हृदये निरूढिमागतः स एव" (भा० ।२।९६), "नहि बुद्धो नाम नियतः कश्चित्। अपि तु भावनाबलप्रतिलब्धक्षणिकादिदृढविमर्शः। तस्य क्षणिकादिभावनोपदेशी गुरुः पूर्वबुद्धः, तस्याप्यन्य इति क्रमेणानियतवक्तृकत्वात् पारमेश्वरविमर्शमयतैव वस्तुतः। एवं चतुर्विंशतितत्त्वभावनाभावितः कपिलो मन्तव्यः। अत एव सर्वागमा अनादय एव" (भा० ३, पृ० ९७-९८) इति, यथाह वराहमिहिरः—

विष्णोर्भागवता मघाश्च सवितुः शम्भोः सभस्मद्विजा
मातॄणामथ मातृमण्डलविदो विप्रास्त्वथा ब्रह्मणः।
शाक्याः सत्त्वहिताय बुद्धवपुषो नग्नास्तथैवार्हतो
यैर्यो देव उपास्यते स्वविधिना तैस्तस्य कार्या क्रिया॥

(भा० ३, पृ० १००)

इति च। एवं च विश्वस्मिन् प्रवर्तमानानां सर्वेषां धर्माणामाकरग्रन्था आगमपदाभिलप्याः, सर्वे च भावनाबललब्धप्रातिभज्ञाना धर्मोपदेष्टार आप्तपदा-भिलप्या भवितुमर्हन्तीति नात्र संशीतिलवलेशोऽपि मनसि धार्यः।

"तस्मादात्मैव देवताः[१]", "[२]स्वात्मैव देवता प्रोक्ता ललिता विश्वविग्रहा"

---

१. प्रज्ञोपायविनिश्चयसिद्धौ, ५।३३।

२. महार्थमञ्जरीपरिमले, पृ० ११९, तन्त्रराज (कादिमत) तन्त्रे ३५।१३ च।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इति च बौद्धेषु शाक्तेषु च तन्त्रेषु दृश्यते। "प्रकाशो देवतात्मकः[१]" इत्यद्वयवज्रो भणति। प्रत्यभिज्ञादर्शने च प्रकाशविमर्शात्मकः स प्रतिपाद्यते। तथाहि— "प्रकाशलक्षणः स्वात्मा।·····स एव हि अहंभावात्मा विमर्शः। प्रकाशरूपता ज्ञानम्। तत्रैव स्वातन्त्र्यात्मा विमर्शः क्रिया। विमर्शस्वान्तः कृतप्रकाश इति विमर्श एव परावस्थायां ज्ञानक्रिये।·····सर्वथा तु विमर्श एव ज्ञानम्" (ई० प्र० वि० I, पृ० ४२३-४२४) इति, "प्रकाश एव संविदां परमार्थः" (ई० प्र०वि०वि० II, पृ० ४३३), "इह भावानां सत्त्वमसत्त्वं वा व्यवतिष्ठमानं संविद्विश्रान्तिमन्तरेण नोपपद्यते। संविद्विश्रान्ता हि भावाः प्रकाशमाना भवन्ति। प्रकाश एव संविद्यत" (ई० प्र० वि० वि I, पृ० ४-५), "प्रकाशस्वातन्त्र्यमिह बोधसंवेदनादिशब्दवाच्यम्" (ई० प्र० वि० वि० I, पृ० ८२) इत्यादिना प्रकाशस्य संविद्बोधसंवेदनादिशब्दवाच्यत्वमभिधाय "प्रकाशात्मकः शिवः" (तन्त्रा० १।५२) इति, "सा (देवता) युक्तिपर्यालोचनायां स्वात्मसंवित्स्फुरत्ता-मात्रस्वरूपेति प्रकाश एव विश्वोपास्या देवता" (म० प० प०, पृ० ४-५), "स्वात्मैव देवता" (म० म० प०, पृ० ११९) इति च सबलं तत्र प्रतिपाद्यते। परतत्त्वस्य परिभाषामेनां मन्ये चार्वाक आधुनिको वैज्ञानिकश्च नैव प्रतिषेधेताम्।

"मुक्तिरेकेन जन्मना" इति सिद्धान्तं च शैव - शाक्त - बौद्धतन्त्राणि मानयन्ति। तथाहि—

यत्तीर्थिकैर्जगति जन्मभिरप्रमेयै-
र्नासाद्यते पदमिति स्वमतेषु गीतम्।
तच्चैकजन्मिकमिति ब्रुवता निगृह्य
तेषां त्वया ननु कृतश्चरणः शिरस्सु॥ (श्लो० ३०)

इति तत्रभवानवधूतसिद्धः प्राह भक्तिस्तोत्रे। मुक्तिरेकेन जन्मनेति शिवधर्मे, इहैकभविको मोक्ष इति च शिवधर्मोत्तरे पठ्यते। "अस्मिन्नेकेन जन्मना" (४।५८), "अनेन जन्मना सिद्धिं यः कश्चिदभिवाञ्छति" (५।६) इति गुह्यसिद्धौ, "चण्डरोषपदं धत्ते जन्मन्यत्रैव योगवित्" इति च चण्डमहारोषणतन्त्रे षष्ठे पटले। साम्प्रतं मोहम्मदीयाः, ख्रीष्टमतानुयायिनः, अन्ये च केचन न मानयन्ति जन्मान्तरव्यवस्थाम्। एकेनैव जन्मना मुक्तिं वर्णयद्भिस्तदेतैस्तन्त्रागमवचनै-रीदृशानां सिद्धान्तानां सामञ्जस्यमापादयितुं शक्यते।

प्रत्यभिज्ञादर्शने जनस्याप्युपकारमिच्छता भट्टोत्पलेन[२] आगमेषु द्वैत-

१. अद्वयवज्रसंग्रहे, पृ० ५७।

२. ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिन्यां तृतीये भागे ४०५ पृष्ठमवलोकनीयम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

व्याख्यानमपास्य, ब्रह्मवादेऽविद्यां मायाशक्तीकृत्य, विज्ञानाद्वयवादमात्मेश्वराभिप्रायेण निरूप्य सुगमः पन्थाः प्रदर्शितो दुःखनिवृत्तेः। तद्वदेवाधुना तन्त्रागमीयां समतादृष्टिं शुद्धयशुद्धिव्यवस्थां विधिनिषेधमीमांसां चावलम्ब्य, जात्यादिदुराग्रहान् दूरीकृत्य, सत्तर्कस्वानुभवयोर्गरीयस्त्वं च स्वीकृत्य सम्पूर्णोऽपि मानवो लोक एकस्मिन् नीडे संघटयितुं शक्यते।

तन्त्रालोकेऽभिनवगुप्तेन स्मृतं तद्विवेके (४।२७४) महार्थमञ्जरीपरिमले (पृ० १६८) चोद्धृतं त्रिकशासनस्य श्लोकद्वयं समता सर्वदेवानामित्यादिकमष्टविधां समतां प्रतिपादयति। समताष्टकमार्गोऽयं शक्तिसङ्गमतन्त्रे (II, १८।२१) सूच्यते। सर्वभावानां वृत्तीनां द्रव्याणां भूमिकानाम् ओवल्लीनां देवानां वर्णानां च समता तत्र समताष्टकमार्गपदेनोक्ता। तस्मिन् मार्गे प्रविष्टो हि जनः समतामिमामष्टविधां भावयति। तदस्यां समतादृष्टौ बाधका भवन्ति पाशा आग्रहा वा। तन्त्रालोक एव—

"जातिविद्याकुलाचारदेहदेशगुणार्थजान् ।
ग्रहान् ग्रहानिवाष्टौ द्राक् त्यजेद् गह्वरदर्शितान् ॥
तथा श्रीनिशिचारादौ हेयत्वेनोपदर्शितान् ॥"

इत्यत्र जात्यादिप्रयुक्ता ग्रहा आग्रहा वा निरूपिताः।

"घृणा शङ्का भयं लज्जा जुगुप्सा चेति पञ्चमी।
कुलं जातिश्च शीलं चेत्यष्टौ पाशाः प्रकीर्तिताः ॥"

इति च पाशाष्टकं कुलार्णव (१३।९०) पठितं महार्थमञ्जरीपरिमले (पृ० १४५), योगिनीहृदयदीपिकायां (१।७२) च वर्ण्यते। तदेतेषु ग्रहाष्टकेषु वा जातिग्रहस्य शङ्कायाश्च वैशिष्ट्येन वर्णनं दृश्यते।

"ब्राह्मणोऽहं मया वेदशास्त्रोक्तादपरं कथम्। अनुष्ठेयमयं जातिग्रहः परनिरोधकः" (१५।५९७), "संवित्स्वभावे नो जातिप्रभृतिः कापि कल्पना" (१५।५९९) इत्यादिना तन्त्रालोके निशिचार-कुलगह्वर-स्वच्छन्दतन्त्र-आनन्दशासन-नकुलेशादिप्रामाण्येन, परात्रिंशिकाव्याख्यायां च—"जातीनां च ब्राह्मणादीनां नास्ति स्थितिः, कल्पितत्वात्" (पृ० २३७) इत्यादिना जात्याग्रहः समालोच्यते, मोक्षधर्म-मुकुटसंहिता-स्वच्छन्दतन्त्रादीनां वचनानि चात्र प्रमाणत्वेनोपादीयन्ते। क्षेमराजो भैरवागमानां जात्युद्धारकत्वं वर्णयति (स्व० उ० २।१३६), महेश्वरानन्देन च ब्राह्मणचाण्डालादिव्यवस्थापरित्यागार्थमागमः स्वानुभवश्च प्रमाणीक्रियते (म० म० प, पृ० १४५)। अपि च, विकल्पात् शङ्का जायते। सा च बन्धरूपिणी भवति। विकल्पजां शङ्कां विहाय न ह्यन्यः कश्चन

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

बन्धो नाम। विकल्पायासयुक्तस्य शङ्काशीलस्य श्रेयसी गतिः कदापि न भवितुमर्हतीति सा यत्नेन परित्याज्येति तन्त्रालोके (१२।२०-२५), परात्रिंशिकाविवृतौ (पृ० २३५-२३६) च प्रतिपाद्यते"।

अज्ञानात् शङ्कते लोकस्ततः सृष्टिश्च संहृतिः।

इति सर्ववीरवचने शङ्काया एव जननमरणकारणत्वं वर्ण्यते। अत एव क्रमसद्भावे – "शङ्काशून्यो भवेत् सदा' इत्युपपाद्यते, "निःशङ्कः सिद्धिमाप्नोति" इति च तत्त्वार्थचिन्तामणौ। सर्ववीरभट्टारकेऽपि पेयापेयमित्यादिना शङ्काकारणानि निरस्य "इच्छामुत्पादयेदात्मा कथं शङ्का विधीयते" इत्येवं शिष्यः प्रबोध्यते। शङ्काया अस्या निरासायैव तन्त्रागमेषु विधि-निषेध-भक्ष्याभक्ष्य-शुद्धयशुद्धिविषयका विचाराः प्रतन्यन्ते।

महेश्वरानन्दः—"तत्र सन्ध्योपास्त्यादौ विधिः, कलञ्जभक्षणादौ निषेधश्चेत्युच्यते।......तत्र किं तज्ज्ञानमात्रेण ते प्रवर्तन्ते निवर्तन्ते च, उत स्वेच्छानुगुण्यात्? यदि ज्ञानमात्रेण, सन्ध्यानुपासकः कलञ्जभक्षको वा न कश्चिदुपलभ्येत। यदि तु स्वेच्छानुगुण्यात्, तदाऽनुष्ठातॄणां रुचिमेव विधिनिषेधावनुवर्तते इत्यर्थो भवति। ततश्च तेषां सन्ध्योपासनादावर्थे यत्र रुचिस्तत्र विधिः, यत्र वा कलञ्जभक्षणादौ न रुचिस्तत्र निषेध इत्यनया भङ्ग्या सन्ध्योपासनादावेवारुचिश्चेत् तत्र निषेधः, कलञ्जभक्षणादावेव चेद् रुचिस्तत्र च विधिरित्यर्थतत्त्वनिश्चयः स्यात्" (म म० प०, पृ० २१-२२) इत्येवं विधिनिषेधमीमांसामातनोति। अत्र प्रमाणतया सः—

"त्यागः शक्यक्रियो यस्य स हेय इति निश्चयः।
त्यक्तुं न शक्यते यच्च तदुपादेयमित्यपि"॥

इति संवित्प्रकाशवचनम्।

प्रामाणिकी विधिनिषेधकथा यदि
स्यात् पर्यन्ततः परम एव शिवः प्रमाणम्।
सर्वोत्तरः स खलु तत्र विधिं निषिद्धे
कर्तुं क्षमेत विहिते च विभुर्निषेधम्॥

इति संविदुल्लासश्लोकं च समुपस्थापयति। अत्र संवित्प्रकाशे प्रयुक्ते हेयोपादेयपदे विधिनिषधार्थके मन्तव्ये। अत एव—"न च भक्ष्याभक्ष्य-शुद्धयशुद्ध्यादिविवेचनया वस्तुधर्मोज्झितया कल्पनामात्रसारया स्वात्मा खेदनीयः। नहि शुद्धिर्वस्तुनो रूपं नीलत्ववत्, अन्यत्र तस्यैवाशुद्धिचोदनात् तस्माद् वैदिकात् प्रभृति परमेश्वर-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सिद्धान्ततन्त्रकुलोच्छुष्मादिशास्त्रोक्तोऽपि यो नियमो विधिर्वा निषेधो वा, सोऽप्यत्र यावदकिञ्चित्कर एव मन्तव्यः" (पृ० ३१-३२), इत्यभिनवगुप्तीया तन्त्रसारोक्तिः संगच्छते। सर्वेऽपीमे विषया बौद्धतन्त्रेष्वपि वर्ण्यन्त इति नातिचित्रम्।

सत्तर्कस्वानुभवयोराधारेणैव सर्वमेतन्निर्णेतुं शक्यते। तन्त्रालोके मालिनी-विजय (१७।१८) प्रामाण्येन "तर्को योगाङ्गमुत्तमम्" (४।१५) इति सविशेषं प्रतिपाद्यते। तत्रैव (१।१०६) स्वसंवित्–सत्तर्को प्रमाणीक्रियते। तदनयोः सत्तर्कस्वानुभवयोः स्वरूपं तन्त्रालोके (४।३४-८६) द्रष्टव्यम्। तत्रैव—

"किरणायां यदप्युक्तं गुरुतः शास्त्रतः स्वतः" (४।४१)

इत्यादिना,

"त्रिप्रत्ययमिदं ज्ञानं गुरुतः शास्त्रतः स्वतः" (४।७८)

इत्यन्तेन ग्रन्थेन किरणागम–पूर्वशास्त्र - परात्रिंशिका - ब्रह्मयामल - निशाटनादि-प्रामाण्येन स्वपरामर्शस्य प्रामाण्योत्कर्षं उद्घोष्यते। अत्र "तत्रोत्तरोत्तरं मुख्यं पूर्वपूर्वं उपायकः" (४।४२) इति ग्रन्थं व्याकुर्वाणो जयरथ आह—"तत्र उत्तरोत्तरं मुख्यं विवक्षितम्। यथा गुरुतः शास्त्रम्, ततोऽपि स्वपरामर्श......... गुरुः शास्त्रे उपायः, तदपि स्वपरामर्शे। एवम्—

"उपादायापि ये हेयास्तानुपायान् प्रचक्षते।"

इत्याद्युक्तयुक्त्या गुरुशास्त्रयोरुपायत्वादमुख्यत्वमिति स्वपरामर्शस्यैव प्रामाण्यम्" (पृ० ४५-४६) इति। अत एव—

संविद्व्यापार एवैका युक्तिः सर्वत्र साधनी।
भोगे वाऽप्यथवा मोक्षे..... .... ॥

इति मुकुटसंहिता प्रतिपादयति।

शास्त्रार्थैर्बुद्ध्यते नात्मा गुरोर्वचनतो न च।
बुद्ध्यते स्वयमेवैष स्वबोधवशतः स्वतः॥

(नि०पू०४१।१५) इति योगवासिष्ठेऽपि वर्ण्यते।

'प्रायो हि मैथुने मद्ये मांसे च परिदृश्यते।
आसक्तिः सर्वभूतानाम् ... ...'॥

इति महार्थमञ्जरीपरिमल (पृ० ११६) धृतमहानयप्रकाशदिशा, 'यदन्नः पुरुषो भवति तदन्नास्तस्य देवताः' (अ० १०३।३०) इति वाल्मीकिरामायण-वचनानुसारेण च तथाविधानां जनानां कृते स्वात्मदेवतायाः प्रीत्यर्थमलिपिशित-पुरन्ध्रीणां स्वीकारो भवतु नाम, किन्तु 'निवृत्तिस्तु महाफला' (५।५६) इति

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मनुवचनप्रवणेन जनेन प्रत्यभिज्ञादर्शनप्रतिपादितायां विश्वाहन्तायामस्याद्वयदर्शनस्य विनियोगो विधेयः। एवं च वैदिकेषु वर्णाश्रमाचारेषु जातिग्रहं शङ्कां च किञ्चिदिव शिथिलीकृत्य, तान्त्रिकमौष्ठ्यान्त्यत्रितयसेवनं योगशास्त्रात् पृथक्कृत्य, बाह्याचापेक्षयाऽऽन्तरवरिवस्यां प्रधानीकृत्य, अहन्ताप्रवणं दर्शनं च विश्वाहन्तायां विनियोज्याऽस्मिन्नेव जन्मनि सिद्धयेदेष जन इति हि वर्तते तन्त्रशास्त्रमनुशीलयतामस्माकमुद्घोषः। एष एव च तन्त्रशास्त्राणां सामयिक उपयोगः।

निबन्धमिममुपसंहरन्तो वयं किञ्चिदिव विवक्षामः। सर्वानेतान् परिशील्य, स्वस्वधर्मसंस्कृतिदेशकालानुगुणं तत्र सामञ्जस्यमापाद्य चास्माभिरेकस्या विश्वसंस्कृतेर्निर्माणाय प्रयतनीयम्। एतदन्तरा परस्पराविश्वासग्रस्तेऽस्मिन् जगति न स्थापयितुं शक्यतेऽखण्डैक्यम्। प्रथमं द्वैतदृष्टिमवलम्ब्य "परस्परदेवो भव" इत्युपनिषत्कल्पवाक्यदिशा परस्परं समुद्भूतमविश्वासमलमपास्य श्रद्धाभरितेन जनेन चित्तशुद्धिर्विधेया, तदनु चाद्वैतसरणिमनुसरता तेन विश्वाहन्ताप्रवणेन भाव्यम्। तदैव नूनं संयुक्तराष्ट्रसंवसदृशानां विश्वसंस्थानानां सार्थक्यं सम्पद्येत, तद्द्वारा विश्वस्मिन् राजनीतिकमैक्यं स्थाप्येत, विश्वनागरिकतायाः साम्प्रतं प्रसृता उच्चावचा भेदाश्च निरस्येरन्। देशकालादिभेदेषु सत्स्वपि मानवी विचारधारा सममेव सर्वत्र प्रवर्तते। यूनानदेशीयानां च विदुषां विचारसाम्यं तदस्य निदर्शनम्। सम्पूर्णस्य विश्वस्य प्राचीन आधुनिके च वाङ्मये साम्यमीदृशमवलोकयितुं शक्यते। एतदर्थं सम्पूर्णमपि विश्ववाङ्मयं देशधर्मादिसीमा अतीत्य कालक्रमेण प्रसृतमिति निश्चित्य, गौणीकृत्य धर्मम्, देशपदस्य स्थानार्थतामङ्गीकृत्य, तदनुसारिणं च कालक्रमं प्रधानीकृत्याध्येतव्यम्। तदैव मानवमनसो विकासक्रमः सम्यक् स्फुटीभवेत्। कालक्रमेण देश-(स्थान) क्रमेण च विकसत्सु भारतीयेषु वैदिक-बौद्ध-जैनवाङ्मयेषु वर्ततेऽद्भुतं साम्यम्। तत्र गजनिमीलिकामाचरद्भिर्विद्वद्भिर्धर्माधृतमेवानुशीलनमाचर्यते। फलतस्तैरेकस्मिन्नेव धर्मे कथं विभिन्ना दृष्टयः प्रतिफलिता इति प्रश्नस्य नैव सम्यक् समाधानं कर्तुं शक्यते। अतः संकीर्णां धार्मिकदृष्टिमधरीकृत्य परलोकचिन्तां च किञ्चिदिव शिथिलीकृत्य वर्तमानस्यैव लोकस्य परिष्कारायाद्यावधि समुपार्जितस्य सम्पूर्णस्य मानवीयज्ञानस्य सदुपयोगो विधातव्यः। अखण्डाया मानवसंस्कृतेस्तदैव विकासो जायेत, राज्य–राष्ट्र–भाषा–जाति–धर्म–सम्प्रदायादिखण्डेषु विभक्तो मानवस्तदैव संघबद्धो भवेत्, राष्ट्राणां विभाजनप्रक्रिया तदैवावरुद्धयेत, विभिन्नेषु भूखण्डेषु स्थितानि राष्ट्राणि चैकीकृतानि स्युः। यूरोपीया जना विषयेऽस्मिन्नग्रेसरा भवन्तु नामेति किल वर्ततेऽस्माकं मनोरथः। इति शम्॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कृदन्तक्रियारूपाणामैतिहासिकपृष्ठभूम्यामादिकाव्यस्य कृदन्तक्रियारूपाणि

डॉ० देसराजशर्मा

प्राध्यापकः, संस्कृतविभागस्य,

ठाकुरकेशोदासमहाविद्यालये;

ढलियारा, कांगड़ा, (हि० प्र०)

❀ ❀ ❀

कृदन्तक्रियारूपाणि धातुभिः सह कृत्प्रत्ययानां योगेन सिद्धचन्ति। कृत्-प्रत्यया द्विविधा भवन्ति – (१) नामार्थककृत्प्रत्ययाः, (२) क्रियार्थककृत्प्रत्ययाश्च। नामार्थककृत्प्रत्यया विशेषणसंज्ञाभ्यां बोधका भवन्ति; परं क्रियार्थककृत्प्रत्ययाः क्रियावाचका विशेषणवाचकाश्च भवन्ति। क्रियार्थकृत्प्रत्ययाः प्रसङ्गानुसारेण कर्तृकर्मभावलिङ्गकालप्रवर्तनाबोधका भवन्ति। तिङन्तक्रियारूपाणि कृदन्तक्रिया-रूपेभ्यो वक्ष्यमाणप्रकारेण भिन्नानि भवन्ति। तिङन्तक्रियारूपेषु लिङ्गभेदो नोपलभ्यते; परं पुरुषभेदः प्राप्यते। इतो विपरीतं कृदन्तक्रियारूपेषु पुरुषभेदो न परिलक्ष्यते; अपि तु लिङ्गभेदः प्राप्यते। कृदन्तक्रियारूपाण्यधोलिखितषड्वर्गेषु विभज्यन्ते[1]—

(१) भूतकालिककृदन्त-क्रियारूपाणि।

(२) वर्तमानकालिककृदन्त-क्रियारूपाणि।

(३) भविष्यत्कालिककृदन्त-क्रियारूपाणि।

(४) विध्यर्थककृदन्त-क्रियारूपाणि।

(५) पूर्वकालिककृदन्त-क्रियारूपाणि।

(६) भावार्थककृदन्त-क्रियारुपाणि।

वैदिक्यां लौकिक्यां च वाङ्मयपरम्परायामुक्तषड्विधानि कृदन्तक्रियारूपा-ण्युपलभ्यन्ते; परं कृदन्त-क्रियारूपाणामध्ययनेन वयं पश्यामो यल्लौकिक्या अपेक्षया वैदिक्यामेतेषां क्रियारूपाणां प्रयोगक्षेत्रं विस्तृतमस्ति। प्रस्तुतनिबन्धे संस्कृत-भाषायाः क्रियारूपाणामैतिहासिकपृष्ठभूम्यां वाल्मीकिरामायणप्रयुक्तकृदन्तक्रिया-रूपाणामध्ययनं कृतमस्ति।

---

१. डॉ० बलदेवसिंहः, पदपदार्थसमीक्षा, पृष्ठ—५९।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आदिकाव्ये वक्ष्यमाणानां ३२९ कृदन्तधातूनां १२२१२ कृदन्तक्रियारूपाण्युपलभ्यन्ते[1]—अट्, अर्च् (१)[2], अर्च् (१०), अर्थ्, अर्द्, अश्, अस् (२), अस् (४), आप्, आस्, इङ्, इण्, इष्, (४), इष्, (६), ई, ईक्ष्, ईर, उह्, ऊह्, ऋ, एष्, कण्ठ्, कत्थ्, कथ्, कम्प्, कम्, कर्ण्, (१)[3], कल्, काङ्, काश्, कुच्, कुञ्च्, कुप्, कूज्, कूल्, कृ, कृत, कृत्, कृप्, कृष्, कॄ, कॄत्, क्रम्, क्रीड्, क्रुध्, क्रुश्, क्लिश्, (९), क्लेश्, क्षम्, क्षर्, क्षल्, क्षिप्, क्षुद्, क्षुभ्, क्ष्विड्, क्ष्वेल्, खण्ड्, खन्, खाद्, ख्या, गण्, गद्, गम्, गर्ज्, गर्व्, गर्ह्, गाह्, गुप्, गुह्, गॄ, गै, ग्रस्, ग्रह्, घट्ट् (१०), घुष्, घ्रा, चर् (१), चर् (१०), चल्, चि, चिन्त्, चुद्, चुर्, चेष्ट्, च्यु, छद्, छिद्, जन्, जप्, जल्प्, जागृ, जि, जीव्, जृम्भ्, जृष, ज्ञप्, ज्ञा (९), ज्ञा, (१०), ज्वल्, तड्, तन्. तप् (१), तप् (४), तप् (१०), तर्क्, तर्ज्, तुद्, तुल्, तुष्, तृप्, तॄ, त्यज्, त्रस्. त्रै, त्वर्, दंश्, दह्, दाण्, दिव्, दिश्, दीप्, दृङ्, दृश्, दॄ, द्रु, द्विष्, धा, धाव्, धु (५), धू, (५), धृ, धृष्, (१), धृष् (१०), ध्या, ध्यै, ध्वंस्, नद्, नन्द्, नभ्, नर्द्, नश्, नह्, निन्द, नी, नुद्, पट्, पठ्, पत्, पद्, पा, पाल्, पिष्, पीड्, पूज्, पूर्, पॄ, प्रच्छ्, प्रीङ्, पीञ्, प्रेष्, प्लु, बन्ध् (१), बन्ध् (९), बर्ह्, बाध्, बुध्, ब्रू, भक्ष्, (१), भक्ष् (१०), भज्, भञ्ज्, भर्त्स्, भाष्, भास्, भिन्द्, भिद्, भी, भुज्, भू (१), भू (१०), भूष्, भृ, भ्रम्, भ्राज्, मन्त्र्, मन्थ्, मन्, मस्ज्, मही (११), मान्, मार्ग्, मुच्, मुद्, मूर्च्छ्, मुह्, मृ, मृज्, मृद्, मृश्, मृष्, मृद्ग्, मोक्ष्, यज्, यत्, यम्, या, याच्, युज्, युध्, रक्ष्, रञ्ज्, रभ्, रम्, राज्, रु, रुद्, रुध्, रुह्, रूप्, लक्ष्. लङ्घ्, लप्, लम्ब्, लभ्, लल् (१), लल् (१०), लस्, लस्ज्, लिख्, लिङ्ग्, लिह्, ली, लुप्, लुभ्, लोक् (१), लोक् (१०), लोड्, वच्, वञ्च्, वद्, वन्द्, वध्, वस्, वर्ण्, वस् (१), वस् (२), वह्, वाश् (१), वाश् (४), वास्, विद् (२), विद् (६), विद् (७), विद् (१०), विश्, वृञ्, वृ, वृत्, वृध्, वृष्, वेप्, वेष्ट्, व्यथ्, व्यध्, व्रज्, शंस्, शङ्क्, शक्, शद्, शप्, शम्, (४), शम् (१०), शस् (१), शास्, शिष्, शी, शुच्, शुध्, शुभ्, शॄ, श्रण्, श्रम्, श्रि, श्रु, श्लाघ्, श्लिष्, श्वस्, सञ्ज्, सद् (६), सद् (१०), समाज्, सह्, साध्, सान्त्व्,

१. डॉ० देसराजशर्मा—वाल्मीकि के क्रियारूप—एक भाषिक अध्ययन–पृष्ठ–२६१-३६७, (हिमाचल प्रदेश विश्वविद्यालय, शिमला द्वारा पी-एच्० डी० उपाधये स्वीकृत: शोधप्रबन्धः)।

२. गणस्पष्टताया आवश्यकस्थलेषु कोष्ठान्तर्गतसंख्याभिर्धातूनां गणा निर्दिष्टाः ।

३. यैर्धातुभिः सह पाणिनिभिन्नगणानां निर्देशः कृतस्तेषु धातुषु गणव्यत्ययो विद्यते ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सिच्, सिध्, सूद्, सृ, सृज्, सृप्, सेव्, सेव्, स्तम्भ्, स्तु, स्था, स्ना, स्पन्द्, स्पृश्, स्फुट्, स्फुर, स्मि, स्मृ, स्रु, स्वञ्ज्, स्वद्, स्वप्, हन् (२), हस्, हा, हिंस् (१), हु, हृ, हृष् (१), हृष् (४), हेड्, ह्लाद्, ह्वल्, ह्वे।

भूतकालिककृदन्तक्रियारूपाणि—

संस्कृतभाषाया भूतकालिककृदन्तक्रियारूपाणि क्वसु-कानच्-क्त-क्तवतु-प्रत्ययानां योगेन सिद्ध्यन्ति। क्वसुकानच्प्रत्ययौ परोक्षभूते, क्तक्तवतुप्रत्ययौ च सामान्यभूतकालिकक्रियाया बोधकौ भवतः। एतेषां प्रत्ययानां विवरणं वक्ष्यमाण-प्रकारेणास्ति।

(क) क्वसुप्रत्ययः—

परस्मैपदे लिङ्परे क्वसुप्रत्ययः प्रयुज्यते[1]। वैदिक्यां पञ्चाशदधिकान्येतादृशानि कृदन्तक्रियारूपाण्युपलभ्यन्ते। यथा—चकृवस्, जगन्वस्, जघन्वस्, जिगीवस्, तस्थिवस्, इत्यादयः[2]। आदिकाव्ये क्वसुप्रत्ययस्य अष्टविंशतिकृदन्त-क्रियारूपाण्युपलभ्यन्ते।

(ख) कानच्-प्रत्ययः—

आत्मनेपदे लिटः परे कानच् (आन) प्रत्ययस्य प्रयोगो भवति[3]। वैदिक्यां कानच्प्रत्ययस्याशीत्यधिकानि कृदन्तक्रियारूपाणि प्राप्यन्ते, यथा - जग्मान, जज्ञान, तस्थान, ददृशान—इत्यादयः। वैदिक्यामिव लौकिक्यामस्य प्रत्ययस्य क्षेत्रं विस्तृतं नास्ति। रामायणे कानच्प्रत्ययो न प्रयुक्तोऽस्ति।

(ग) क्त-प्रत्ययः—

सामान्यभूतकालिकक्रियाया बोधनार्थं कर्मभावयोर्धातुना सह क्तप्रत्ययः प्रयुज्यते[4], यथा तैत्तिरीयसंहितायां (२।६।९।३) "इष्टा देवता अध कतम एते देवा इति" इत्यादयः। पाणिनिमतानुसारेण गत्यर्थकश्लिष्शीङादिधातुभिः सह कर्तर्यपि क्तप्रत्ययस्य प्रयोगो भवति[5]। वैदिक्यां कर्तृवाच्यस्यैतादृशानि कृदन्तक्रियारूपाण्युपलभ्यन्ते, यथा ऋग्वेदसंहितायां (१।८१।५) "न त्वावां इन्द्र कश्चन न जातो न जनिष्यते"। लौकिक्यामपि क्तप्रत्ययस्य कृदन्तक्रियारूपाणि प्राप्यन्ते।

---

१. 'क्वसुश्च' पाणिनिः-३।२।१०७; २. डॉ० रामगोपाल, वैदिक-व्याकरण, पृ० ७५९।

३. 'लिटः कानज्वा' पा० अ० ३।२।१०६।

४. 'निष्ठा, तयोरेव कृत्यक्तखलर्थाः' पा० अ० ३।२।१०२, ३।४।७०।

५. (क) 'आदि कर्मणि क्तः, कर्तरि च' पा० अ० ३।४।७१।

(ख) 'गत्यर्थाकर्मकश्लिष्शीङ्स्थासवसजनरुहजीर्यतिभ्यश्च' पा० अ० ३।४।७२।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आदिकाव्ये क्तप्रत्ययस्य ३७३ कृदन्तक्रियारूपाणि दृग्गोचरीभवन्ति। समासेऽसमासे चोपसर्गस्थषकार-रेफाभ्यां परे धातोर्नकारस्य; णकारादेशो भवति[1]; परं रामायणस्य क्तप्रत्ययान्ते प्रनष्टरूपे[2] नियमोऽयं नानुसृतः।

(घ) क्तवतुप्रत्ययः—

भूतकालस्य कर्तृवाच्यस्य च बोधनाय धातुभिः सह क्तवतु (तवत्) प्रत्ययस्य योगो भवति[3]। वैदिक्या मन्त्रभागे ब्राह्मणसाहित्ये चायं प्रत्ययोऽत्यधिकविरलरूपेण प्रयुक्तोऽस्ति, यथा—ऐतरेयब्राह्मणे (१।२०) पूतवन्तः, कौषीतकीब्राह्मणे—पीतवान् इत्यादयः प्रयोगा वेदितव्याः। परवर्तिन्यां वैदिक्यां लौकिक्यां च क्तवत्प्रत्यययुक्तक्रियारूपाणां प्रयोगक्षेत्रं विस्तृतं भवितुमारभत। आदिकाव्येऽस्य प्रत्ययस्य ८५ कृदन्तक्रियारूपाणि प्राप्यन्ते।

अतः सुनिश्चितं भवति यदादिकाव्ये भूतकालिकप्रत्ययेषु क्तप्रत्ययस्य प्रयोगः प्रचुरः, क्वसुप्रत्ययस्य च प्रयोगो विरलोऽस्ति।

(२) वर्तमानकालिककृदन्तक्रियारूपाणि—

वर्तमानकालिककृदन्तक्रियारूपाणि द्विविधा भवन्ति—(क) शतृ-प्रत्ययान्त-कृदन्तक्रियारूपाणि; (ख) शानच्-प्रत्ययान्त-कृदन्तक्रियारूपाणि।

(क) आदिकाव्ये शतृप्रत्ययस्य १३३७, शानच्प्रत्ययस्य च ४९५ कृदन्तक्रियारूपाणि प्राप्यन्ते।

(ख) शतृप्रत्ययान्तकृदन्तक्रियारूपाणि—

परस्मैपदिधातुभिः सह शतृप्रत्ययः प्रयुज्यते[4]। वैदिक्यां लौकिक्यां च वाङ्मयपरम्परायां शतृप्रत्ययान्त-कृदन्तक्रियारूपाणि प्राप्यन्ते। परं वैदिक्यामुपलब्धशतृप्रत्ययान्तकृदन्तक्रियारूपाणि कतिपयानियमिततायुक्तान्यपि सन्ति। यतो वाल्मीकिरामायणं लौकिक्या आदिकाव्यमस्ति। अतोऽस्मिन् काव्येऽप्यधोलिखितानियमिततानि शतृप्रत्ययान्तकृदन्तक्रियारूपाणि प्राप्यन्ते—

(१) 'निष्क्रामन्' इत्येतत् क्रमधातोः शतृप्रत्ययान्त-कृदन्तक्रियारूपस्य स्थाने वाल्मीकिकाव्ये दीर्घाभावयुक्तं 'निष्क्रमन्[5]' रूपमुपलभ्यते।

---

१. उपसर्गादसमासेऽपि णोपदेशस्य। पा० अ० ८।४।१४।

२. तस्य तस्मिन् वने बालको दशवार्षिकः।
प्रणष्टो जीवितान्ताय क्रुद्धस्तेन महामुनिः। वा० रा० ४।४७।११।

३. कर्तरि कृत्। पा० अ० ३।४।६७।

४. लटः शतृशानचावप्रथमासमानाधिकरणे—पा० अ० ३।२।१२४।

५. प्रविशन्नभ्रजालानि निष्क्रमंश्च पुनः पुनः।
प्रकाशश्चाप्रकाशश्च चन्द्रमा इव दृश्यते। वा० रा० ५।५५।७।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(२) यदा शतृप्रत्ययात् परतो नदीसंज्ञा शी च प्रयुज्यते, तदा भ्वादिचुरादिदिवादिगणीयधातूनां नित्यस्तुदादिगणीयधातूनां च विकल्पेन नुमागमो भवति[१]; परं रामायणस्य कतिपयधातूनां शतृप्रत्ययान्तकृदन्तक्रियारूपेष्वस्यागमस्य व्यत्यय उपलभ्यते[२]। भ्वादिगणस्य ईक्ष्, क्रुश, गम्, गर्ज, दृश्, ध्यै, मृज्, वस्, शुच्, सृप् इति धातूनां चुरादिगणस्य च चिन्त् इति धातोर्नुमागमो भवत्येव, परमेतेषां क्रमशः ईक्षती,[३] क्रोशती,[४] अनुगच्छती,[५] गर्जती,[६] अपश्यती[७] ध्यायती,[८] परिमार्जती,[९] वसती,[१०] शोचती,[११] चिन्तयती,[१२] चेत्यादिरूपेषु नुमागमाभावः प्राप्यते।

इतो विपरीतम् अदादिगणस्य√ ब्रू,√या, √रुद् इत्येतेषाम्, स्वादिगणस्य च√ चि धातोः पाणिनिना नुमागमो न मतः। परमेतेषां क्रमशः ब्रुवन्ती,[१३] आयान्ती,[१४] रुदन्ती,[१५] रुदन्त्यः[१६] विचिन्वन्त्यः इत्यादि रूपेष्वपाणिनीयनुमागमः प्राप्यते।

रामायणस्य शतृप्रत्ययान्ते ब्रुवन्[१७] इति रूपे वचनव्यत्यय उपलभ्यते। अत्र प्रथमरूपबहुवचनस्य कर्त्तास्ति, तथाप्येकवचनस्य क्रियायाः प्रयोगो वर्तते। अस्या अनियमिततायाः परिहारार्थं चेदेतद् रूपं लङ्-लकारप्रथमपुरुषबहुवचनस्य मन्येत, तर्ह्यत्राऽडागमाभावो मन्येत।

शानच्-प्रत्ययः —

आत्मनेपदिधातुभिः सह शानच् (आन) प्रत्ययः प्रयुज्यते[१८]। अदन्ताङ्गात् परतः शानच्प्रत्ययस्य मुगागमो भवति[१९]। अनेन प्रकारेण शानच्प्रत्ययस्य द्वे रूपे

१. शप्-श्यनो नित्यम्—पा० अ० ७।१।८१।
२. ईक्ष्, क्रुश्, गम्, गर्ज्, चि, चिन्त्, दृश्, ध्यै, ब्रू, मृज्, या, रुद्, सृप्।
३. क्वचिदङ्के शिरः कृत्वा रुरोद मुखमीक्षती। ६।९८।१०।
४. ४।१९।२७, ५।२४।३; ५. ३।१२।४; ६. ५।२२।२३।
७. ३।५०।४२, ३।५२।१, ४।२९।८; ६।३७।१०, ७।४८।२६।
८. ५।११।१३; ९. ५।२५।१५, ५।३६।२१; १०. ३।४६।१३।
११. ५।२४।२; १२. ५।२३।९; १३. पा० अ० ५।२९।१; १४. ७।२६।३६।
१५. १।५३।७, २।१८।१६, २।८९।७, ३।५७।८, ४।२०।२५, ५।१७।३, ७।७१।१८।
१६. २।४५।५, २।५९।२४, २।६०।१५, २।७०।२२, २।८१।६; १७. ६।९८।३६।
१८. आकाशमिव दुष्पारं सागरं प्रेक्ष्य वानराः।
विषेदुः सहिताः सर्वे कथं कार्यमिति ब्रुवन्॥ वा० रा० ४।६३।८।
१९. लटः शतृशानचावप्रथमासमानाधिकरणे—पा० अ० ३।२।१२४।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भवतः—(i) आन, (ii) मान। भ्वादिदिवादितुदादिचुरादिगणानां धातुभिः सह सार्वधातुकलकारेषु शप्-श्यन्-श-णिच् + शब्विकरणानां योगेनैतेषां गणानां धातवोऽदन्ता भवन्ति, अत एतेषां गणानां धातुभ्यः परे शानच् (आन) प्रत्ययस्य मुगागमो भवति[1]। एवं कर्मवाच्येऽपि शानच्प्रत्ययस्य मानरूपमेव प्रयुज्यते। परं प्रारम्भिकवैदिक्यां कर्मवाच्यस्यैतादृशानि शानच्प्रत्ययान्तकृदन्तक्रियारूपाण्यपि प्राप्यन्ते, येषु शानच्प्रत्ययस्य मानरूपं न प्रयुक्तमस्ति। यथर्ग्वेदसंहितायां (७।९६।३) स्तुवानाः, (९।८७।१) 'पुनानः' इत्यादीनि। लौकिक्यामेतादृशान्यनियमितक्रियारूपाणि न प्राप्यन्ते; परमादिकाव्ये√ ईर,√ चिन्त्, √चुद,√ भ्रम्,√ विद्,√ स्फुर्,√ स्मि इत्येतेषां धातूनां क्रमश उदीरयानः,[2] चिन्तयानः,[3] विचिन्तयानः,[4] संचोदयानः,[5] भ्रामयाणः,[6] वेदयानः,[7] विस्फारयाणः,[8] अविस्मयानः[9] इत्यादि रूपेषु शानच्-प्रत्ययस्य मानरूपस्य स्थाने आनरूपं प्रयुक्तमस्ति।

√ज्ञा-धातोः शानच्प्रत्ययान्तस्य 'जानाना' इति रूपस्य स्थाने रामायणेऽपाणिनीयं जानमाना[10] इति रूपमुपलभ्यते।

(ग) वस्-प्रत्ययः —

ज्ञानार्थकेन विद्धातुना सह वस्प्रत्ययः प्रयुज्यते[11], यथाविद्वस्। आदिकाव्ये वस्प्रत्ययस्य कृदन्तक्रियारूपाणि नोपलभ्यन्ते।

(३) भविष्यत्कालिककृदन्तक्रियारूपाणि —

शतृ - शानच् - प्रत्ययान्तभविष्यत्कालिककृदन्तक्रियारूपाणि लृडङ्गेन सिद्ध्यन्ति[12], यथा-करिष्यन्, करिष्यमाण इति। वैदिक्या लौकिक्याश्च भविष्यत्कालिककृदन्तक्रियारूपेषु किमपि विशिष्टान्तर्यं नोपलभ्यते। आदिकाव्ये नवशतृप्रत्ययान्तभविष्यत्कालिककृदन्तक्रियारूपाणि प्राप्यन्ते।

इन्-प्रत्ययः —

इन्-प्रत्यययोगेनापि भविष्यत्कालिककृदन्तक्रियारूपाणि व्युत्पन्नानि भवन्ति, यथा गमिन्, भाविन् इत्यादीनि। आदिकाव्ये इन्प्रत्ययो नैव प्रयुक्तोऽस्ति।

---

१. आने मुक्—पा० अ० ७।२।८२ ; २. तत्रैव ; ३. ५।२५।३८।
४. ३।२३।२, ७।८।९, ७।७६।१५ ; ५. २।७७।२३ ; ६. ६।७७।६।
७. ७।३२।४५ ; ८. ६।५५।१९ ; ९. ५।४२।३ ; १०. ६।४७।९२।
११. जानमाना मां विशालाक्षी रावणं कामरूपिणम्। वा० रा० ५।२८।२१।
१२. लृटः सद्वा—पा० अ० ३।३।१४।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(४) विध्यर्थककृदन्तक्रियारूपाणि —

कर्तुं योग्यमित्यर्थं बोधयितुं धातुभिः सह निम्नलिखितविध्यर्थककृत्-प्रत्ययाः प्रयुज्यन्ते ।

(क) य-प्रत्ययः —

य-प्रत्यययुक्तानि कृदन्तक्रियारूपाणि सम्पूर्णवैदिकसाहित्ये प्राप्यन्ते । ऋग्वेद-संहितायामस्य प्रत्ययस्य चत्वारिंशद्, अथर्ववेदसंहितायां च षष्टि कृदन्त-क्रियारूपाण्युपलभ्यन्ते[१] । संहितासु ब्राह्मणश्रौतादिसूत्रग्रन्थेषु चास्य प्रत्ययस्य प्रचुरप्रयोग उपलभ्यते । अस्य प्रत्ययस्य त्रीणि रूपाणि भवन्ति—

(१) यत्-प्रत्ययः —

अजन्तधातुभिः सह यत्प्रत्ययस्य प्रयोगो भवति[२], यथा नव्य, हव्य इत्यादयः। वैदिक्यां यत्-प्रत्ययेन केवलम् अजन्तधातुभिः सह प्रयुक्तोऽपितु कतिपयवैदिक-प्रयोगेष्वकारोपध्मवर्गान्त-अकारान्तहलन्तधातुभ्यः पश्चादप्यस्य प्रयोगो दृश्यते[३], यथा-खन्य, चक्ष्य इत्यादयः । लौकिक्यामुपरोक्तवैदिकानियमितता नोपलभ्यते ।

(२) ण्यत्-प्रत्ययः —

हलन्तधातुभिः सह ण्यत्प्रत्ययः प्रयुज्यते[४], यथा—खान्य, कार्यं, ग्राह्य-इत्यादयः ।

(३) क्यप्प्रत्ययः —

येषु यप्रत्ययान्तरूपेषु धातोः स्वरस्य गुणोऽथवा वृद्धिर्न भवति, तानि रूपाणि क्यप्प्रत्यययुक्तानि भवन्ति[५], यथा-जुष्य, शिष्य इत्यादीनि। ह्रस्व-स्वरान्तधातोः क्यप्प्रत्ययपरे सति तुगागमो भवति[६], यथा-इत्य, चित्य, श्रुत्य इत्यादयः ।

वैदिक्यां लौकिक्यां च ण्यत्-क्यप्-प्रत्यययुक्तानां क्रियारूपाणां रूपरचनायां किमपि विशिष्टमान्तर्यं नोपलभ्यते ।

आदिकाव्ये यप्रत्ययस्य २६६ कृदन्तक्रियारूपाणि प्राप्यन्ते ।

---

१. वैदिक-व्याकरण, पृ०—७६८ ।

२. अचो यत्—पा० अ० ३।३।१७९ ।

३. भव्यप्रवध्यौ च छन्दसि—पा० अ० ६।१।८६ ।

४. ऋहलोर्ण्यत्—पा० अ० ३।१।१२४ ।

५. वदः सुपि क्यप्—पा० अ० ३।१।१०६, ११३ ।

६. ह्रस्वस्य पिति कृति तुक्—पा० अ० ६।१।७१ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(ख) आय्य-प्रत्ययः —

वैदिक्यां विध्यर्थककृदन्तक्रियारूपाणि तावद् आय्य-प्रत्ययस्य योगेनापि सिद्ध्यन्ति[1]। सम्पूर्णवैदिकसाहित्येऽस्य प्रत्ययस्य द्वादशक्रियारूपाण्युपलभ्यन्ते[2]। यथा—ऋग्वेदसंहितायां त्रयाय्य, दक्षाय्य इत्यादीनि। परवर्तिवैदिक्यामयं प्रत्ययोऽत्यधिकविरलरूपेण प्रयुक्तोऽस्ति। लौकिक्यामस्य प्रत्ययस्यास्तित्वं न विद्यते।

(ग) सेय्य-प्रत्ययः —

ऋग्वेदसंहितायां (१०।१२०।६) स्तु-धातुना सह स्तुषेयय्यम् इति रूपे सेय्यप्रत्ययः प्रयुक्तोऽस्ति। लौकिक्यामस्य प्रत्ययस्य रूपं नोपलभ्यते।

(घ) एन्य-प्रत्ययः —

वैदिक्यां द्वादशाधिकेषु कृदन्तक्रियारूपेषु तावद् एन्य-प्रत्ययः प्रयुक्तोऽस्ति, यथा—ऋग्वेदसंहितायाम् ईक्षेण्यम्, वरेण्यम्, दृशेन्य इत्यादयः। लौकिक्यामस्य प्रत्ययस्य प्रयोगो नोपलभ्यते।

(ङ) त्वन्-प्रत्ययः —

कस्यचिन्मतानुसारेण वैदिक्या द्वादशकृदन्तक्रियारूपेषु त्वन्प्रत्ययस्य प्रयोगो विद्यते[3], यथा ऋग्वेदसंहितायां भवीत्व, कर्त्व, जेत्व इत्यादयः। लौकिक्यां त्वन्प्रत्ययो न प्रयुक्तोऽस्ति।

(च) तव्य-प्रत्ययः —

ऋग्वेदसंहितायां तव्यप्रत्ययस्य कृदन्तक्रियारूपं नोपलभ्यते। अथर्ववेदसंहिताया द्वयोः क्रियारूपयोस्तव्यप्रत्ययः प्रयुक्तोऽस्ति—(४।२३।७) जनितव्यः, (५।१८।६) हिंसितव्य इति। यजुर्वेदस्य संहितानां ब्राह्मणभागेषु सूत्रग्रन्थेषु चास्य प्रत्ययस्य प्रचुरप्रयोगः प्राप्यते, यथा—तैत्तिरीयकाठकसंहितयोः कर्त्तव्यः, मैत्रायणी-काठकसंहितयोर्भवितव्यः, जैमिनीय-ब्राह्मणे च गमयितव्य इत्यादयः। परवर्तिवैदिक्यां तव्यप्रत्ययस्य प्रयोगः समृद्धतरोऽभवत्, लौकिक्यां चास्य प्रत्ययस्य प्रचुरप्रयोग उपलभ्यते। आदिकाव्येऽस्य प्रत्ययस्य २९४ कृदन्तक्रियारूपाण्युपलभ्यन्ते।

यतो वैदिक्यां स्वरभेदोऽप्युपलभ्यत इति पाणिनिना वैदिक्यां तव्यत्-प्रत्ययस्य विधानमपि कृतमस्ति[4]। लौकिक्यामयं स्वरभेदो नोपलभ्यत इति तत्र तव्यत्प्रत्ययप्रयोगस्य प्रश्न एव नोदेति।

---

१. आनाय्योऽनित्ये—पा० अ० ३।१।१२७-१३१।

२. वैदिक-व्याकरण, पृ० ७७१. ३. पूर्वोद्धृत—पृ० ७७१।

४. तव्यत्तव्यानीयरः—तित्स्वरितम्—पा० अ० ३।१।९६, ८।१।१८५।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(छ) अनीयर-प्रत्ययः —

ऋग्वेदयजुर्वेदसंहितयोरनीयरप्रत्ययो न प्रयुक्तोऽस्ति; परमथर्ववेदसंहितायामस्य प्रत्ययस्य द्वे क्रियारूपे प्राप्येते (८।७।७) उपजीवनीय, (८।१०।२२) आमन्त्रणीय इति। परवर्तिवैदिक्या ब्राह्मणसाहित्ये सूत्रसाहित्ये चानीयरप्रत्ययस्य प्रचुरप्रयोगः प्राप्यते, यथा—तैत्तिरीय-जैमिनीयब्राह्मणयोर्दर्शनीय इति, ऐतरेयाश्वलायनारण्यकयोश्च करणीय इत्यादयः। लौकिक्याम् अनीयरप्रत्ययस्य कृदन्तक्रियारूपाणि प्रचुरमात्रायामुपलभ्यन्ते। आदिकाव्येऽस्य प्रत्ययस्य षोडशकृदन्तक्रियारूपाणि प्राप्यन्ते।

पूर्वकालिकक्रियार्थककृदन्तक्रियारूपाणि—

यत्र कर्त्ता खल्वेकक्रियाया अनन्तरं द्वितीयां क्रियां करोति, तत्र पूर्वक्रियां बोधयितुं धातुभिः सह क्रियार्थककृदन्तप्रत्ययाः प्रयुज्यन्ते। पूर्वकालिकक्रियाया द्योतकानां प्रत्ययानां विवरणं वक्ष्यमाणमस्ति—

(क) त्वाय-प्रत्ययः —

ऋग्वेदसंहितायां त्वायप्रत्ययस्य तावदष्टकृदन्तक्रियारूपाण्युपलभ्यन्ते[1], यथा–गत्वाय, हित्वाय इत्यादयः। अन्यसंहितानां ब्राह्मणग्रन्थानां च द्वादशप्रयोगेषु त्वाप्रत्ययस्य यगागमो भवति[2], यथा—वाजसनेयिसंहितायां कृत्वाय, तैत्तिरीयसंहितायां वृत्वाय इत्यादयः। शतपथब्राह्मणेऽपि त्वायप्रत्ययस्य प्रयोगः प्राप्यते, यथा—स्पाशयित्वाय इत्यादयः। परमथर्ववेदसंहितायां नियमितरूपेण त्वायस्थाने त्वाप्रत्यय एव प्रयुक्तोऽस्ति, यथा—हित्वा, भूत्वा इत्यादयः।

(ख) त्वी-प्रत्ययः —

ऋग्वेदसंहितायाः पञ्चदशकृदन्तक्रियारूपेषु त्वा-स्थाने त्वी-प्रत्ययः प्रयुक्तोऽस्ति[3], यथा—गत्वी, कृत्वी, जनित्वी, हित्वी-इत्यादयः। सामवेदसंहिताया द्वयोः मन्त्रयोस्त्वीप्रत्ययप्रयोगः प्राप्यते। परमत्रायं त्वारूपे परिवर्तितोऽस्ति। यजुर्वेदस्य विविधसंहितासु त्वीप्रत्ययो विरलरूपेण प्रेयुक्तोऽस्ति[4], यथा—मैत्रायणीकाठकसंहितयोः 'स्नात्वी' इत्यादयः। अथर्ववेदसंहितायां त्वीप्रत्ययस्थाने नियमितरूपेण त्वा-प्रत्यय एव प्रयुक्तोऽस्ति। लौकिक्यामपि त्वाप्रत्ययस्य प्रयोगो विद्यते।

---

१. वैदिक-व्याकरण, पृ०—७७२ ;
२. क्त्वो यक्—पा० अ० ३।१।४७।
३. स्नात्वादयश्च—पा० अ० ७।१।४९;
४. वैदिक-व्याकरण, पृ०—७७३।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(ग) त्वीन्-प्रत्ययः —

काशिकाकारमतानुसारेण वैदिक्यां त्वीन्-प्रत्ययोऽपि प्रयुक्तोऽस्ति[१], यथा-पीत्वीन् इत्यादयः। लौकिक्यामस्य प्रत्ययस्य प्रयोगो नोपलभ्यते।

(घ) त्वा-प्रत्ययः —

ऋग्वेदसंहितायां त्वा-प्रत्ययस्य प्रयोगो नव धातुभिः सह, अथर्ववेदसंहितायां च त्रिंशद्धातुभिः सह वर्तते। अन्यवैदिकसंहितासु विभिन्नब्राह्मणग्रन्थेषु चास्य प्रत्ययस्य प्रयोगः क्रमशो वृद्धिमवाप्नोत्। लौकिक्यामपि त्वा-प्रत्यय एव प्रयुक्तोऽस्ति। आदिकाव्ये त्वा-प्रत्ययस्य २२९० कृदन्तक्रियारूपाण्युपलभ्यन्ते। एतेषु क्रियारूपेषु कतिपयक्रियारूपाण्यनियमिततानुक्तान्यपि सन्ति, येषां विवरण-मधोलिखितप्रकारेणास्ति—

नञ्भिन्नसमासे धातोः पश्चात् त्वा-प्रत्ययस्य ल्यबादेशो भवति[२]; परम-वैदिक्यां कतिपयसमासयुक्तरूपेष्वपि त्वा-प्रत्यय एव प्रयुक्तोऽस्ति,[३]यथा—काठक-संहितायां परिधापयित्वा, अथर्ववेदसंहितायां प्रत्यर्पयित्वा, तैत्तिरीयारण्यके च वीरोचयित्वा इत्यादीनि। वैदिकपरम्परावद् रामायणकाव्येऽप्येतादृशानि कृदन्त-क्रियारूपाण्युपलभ्यन्ते—समर्चयित्वा[४], नमस्कृत्वा[५] पेशीकृत्वा[६], भस्मीकृत्वा[७], भस्मसात्कृत्वा,[८] शीतीकृत्वा,[९] श्यामीकृत्वा,[१०] उदकंकृत्वा,[११] अतिक्रामयित्वा,[१२] संक्षोदयित्वा,[१३] अधिगत्वा,[१४] विचित्वा[१५] प्रज्वालयित्वा,[१६] संत्यक्त्वा,[१७] निदर्शयित्वा,[१८] प्रदर्शयित्वा,[१९] विनर्दित्वा,[२०] आनाययित्वा,[२१] उत्पाटयित्वा,[२२] निपातयित्वा,[२३] विमुक्त्वा,[२४] विमोचयित्वा,[२५] संयोजयित्वा,[२६] आरोपयित्वा,[२७]

---

१. इष्टीनीमति च। काशिका, पा० ७।१।४८।

२. समासेऽनञ्पूर्वे क्त्वो ल्यप्—पा० अ० ३।१।४७।

३. क्त्वापि छन्दसि—पा० अ० ७।१।३८।

४. समर्चयित्वा स निशाचरो जगौ, प्रसार्य हस्तान् प्रणनर्त चाग्रतः। वा० रा० ७।३१।४०।

५. ५।११।५६, ६०, ५।१५।३२, ५।३६।३२, ५।६५।१७, ६।६१।४४, ६।८२।७।

६. ३।६४।३३; ७. ७।५९।२१; ८. ७।५३।९।

९. ७।५९।२१; १०. ४।२९।२४; ११. २।५९।४३, २।७०।३३।

१२. ६।३१।५५; १३. ६।८९।२३; १४. ५।२४।१९।

१५. ३।६०।३; १६. ७।३४।११०; १७. ७।७९।७।

१८. ३।६९।१; १९. ३।३०।२२; २०. ३।२९।१८।

२१. २।६०।२७; २२. ५।४१।१४; २३. ६।६०।४३।

२४. ५।३१।११; २५. ५।५६।१३३; २६. २।१०७।१५; २७. १।६६।१७।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रलोभयित्वा,[१] निवेदयित्वा,[२] निवेशयित्वा,[३] निवर्तयित्वा,[४] संवर्तयित्वा,[५] अभिवृष्ट्वा,[६] उपाश्रयित्वा,[७] आश्वासयित्वा,[८] प्रसादयित्वा,[९] विषादयित्वा,[१०] विसर्जयित्वा,[११] विसर्पित्वा,[१२] विष्टम्भयित्वा,[१३] उत्थापयित्वा,[१४] उत्स्मयित्वा,[१५] निहत्वा[१६]।

(ङ) ल्यप्-प्रत्ययः —

यद्यपि पाणिनिना समासेऽनञ्पूर्वे क्त्वो ल्यबादेशो मतः, परं वैदिक्यामेतादृशानि क्रियारूपाण्यप्युपलभ्यन्ते, यत्र समासं विनाऽपि ल्यबादेशो वर्तते, यथा—आश्वलायनगृह्यसूत्रे प्रोथ्य, श्वेताश्वतरोपनिषदि स्थाप्य इत्यादीनि।

वैदिकप्रयोगवद् वाल्मीकिकाव्यस्याधोलिखितरूपेष्वपीयमनियमितता विद्यते—आप्य,[१७] गम्य,[१८] गृह्य,[१९] छाद्य,[२०] त्यज्य,[२१] दृश्य,[२२] पीड्य,[२३] पूज्य[२४],

---

१. ३।३८।१५; २. १।१।५९ ; ३. २।८३।२२।
४. ४।२९।२२; ५. १।१५।२२ ; ६. ४।२९।२७।
७. ७।१७।४१; ८. २।८३।२२ ; ९. ४।३०।३९।
१०. ६।७।४८; ११. १।१।२१ ; १२. ४।६२।२।
१३. ५।३४।३३; १४. २।६६।१८ ; १५. ३।४१।४१।
१६. ४।३४।१४ ; १७. तत्रैव—३।६५।५।
१८. १।४८।६, १।७४।२, २।३१।७, २।७८।९, ३।२५।१२, ३।४९।१७, ३।४९।२२, ३।५२।५, ३।६४।१३, ३।६५।१९, ३।७०।१, ४।४३।१४, ४।५०।१४, ४।५१।४, ५।१६।१२, ५।२५।२५, ५।३५।६४, ५।३६।२६, ५।३८।१९, ५।४२।१४, ५।४५।३५, ५।४९।२१, ५।५१।३८, ५।५५।१६, ५।५६।१३४, ५।६०।१०, ५।६५।१२, ६।२२।८, ६।२२।३७, ६।२५।१३, ६।३३।३८, ६।४०।२४, ६।६१।२४, ६।६१।३४, ६।६२।३, ६।८६।६, ६।११४।८, ७।७।३७, ७।९।२, ७।१८।१४, ७।३२।५३, ७।३२।६४, ७।३२।७२, ७।३३।७, ७।३४।२१, ७।३४।३२, ७।३२।३७, ७।६९।९, ७।९७।१९।
१९. ५।१७।३६; २०. ३।५७।२४, ७।४७।९, ७।५३।३।
२१. १।२९।१६, १।४७।११, ५।३३।६३, ६।४२।२५, ६।७०।११, ७।१।११, ७।८।१९, ७।२३।३३, ७।३३।८।
२२. ५।८।३६; २३. ५।५०।४, ७।३३।८।
२४. ५।३७।५, ५।३७।२१, ७।४४।११, ७।४५।१८, ७।४७।१०. ७।४७।२०, ७।४८।१७।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वन्द्य,[१] उष्य,[२] स्थाप्य,[३] इत्यादीनि। इतो विपरीतं अगृह्य,[४] अचिन्त्य[५] रूपयोर्नञ्समासेऽपि ल्यप्प्रत्ययः प्रयुक्तोऽस्ति।

ग्रह्-धातोर्ल्यप्-प्रत्यययुक्तं रूपम् 'उपगुह्य' इति भवति, परमादिकाव्येऽस्य स्थाने 'उपगूह्य'[६] इति रूपमपि प्रयुक्तमस्ति। आदिकाव्येऽस्य प्रत्ययस्य ३८०८ कृदन्तक्रियारूपाण्युपलभ्यन्ते।

(च) णमुल्-प्रत्ययः —

पूर्वकालिकक्रियाया द्विरावृत्तिं द्योतयितुं धातुना सह णमुल्प्रत्ययः प्रयुज्यते[७]। वैदिक्याः संहितासाहित्ये णमुल्-प्रत्ययो विरलतया प्रयुक्तोऽस्ति; परं परवर्तिवैदिक्यां ब्राह्मणसाहित्ये सूत्रसाहित्ये चायं प्रत्ययो भूयिष्ठतया प्रयुक्तोऽस्ति, यथा— शतपथब्राह्मणे (९।३।३।६) "उत्तरामुत्तरां शाखा समालम्भं रोहेत" इत्यादयः। लौकिक्यामप्यस्य प्रत्ययस्य प्रयोगः प्राप्यते, यथा-स्मारंस्मारम्, भोजंभोजम् इत्यादयः। आदिकाव्ये णमुल्-प्रत्ययान्तक्रियारूपाणि नोपलभ्यन्ते; परं णमुलर्थे त्वा-ल्यप्-प्रत्यययोर्द्विरावृत्तियुक्तानि क्रियारूपाणि प्रयुक्तानि सन्ति–भित्वा भित्वा,[८] अवेक्ष्यावेक्ष्य[९] उद्वीक्ष्योद्वीक्ष्य[१०], उत्पत्योत्पत्य[११], आप्लुत्याप्लुत्य[१२], उद्यम्योद्यम्य[१३], निवृत्यनिवृत्य[१४], विनिःश्वस्य विनिश्वस्य[१५], उत्थाप्योत्थाप्य[१६], आस्फोट्यास्फोट्य[१७], आस्वाद्यास्वाद्य[१८]।

---

१. १।४७।९, २।१।११, २।८६।१, ३।१०।३९, ७।२५।५१, ७।४५।३०, ७।५७।२०, ७।९२।१४।

२. २।१२।१४, २।४६।२५, ४।२४।४६, ६।६८।५, ७।९।१०, ७।१२।१२, ७।२०।१९, ७।३१।४३, ७।३६।५७, ७।५६।१२, ७।९८।११, ७।१००।२८।

३. ६।८९।१९; ४. ६।३३।४०, ६।४३।९, ६।४६।४२, ६।६५।२०।

५. २।६७।४, २।८१।७, ५।८।४०, ५।८।४३।

६. आभीक्ष्ण्ये णमुल् च – पा० अ० ३।४।२२।

७. ततो भ्रातुर्वचः श्रुत्वा वातापिर्मेषवन्नदन्।

(क) भित्त्वा भित्त्वा शरीराणि ब्राह्मणानां विनिष्पतत्। वा० रा० ३।१०।५७।

(ख) मन्ये लक्ष्मण वैदेही राक्षसैः कामरूपिभिः।
भित्त्वा भित्त्वा विभक्ता वा भक्षिता वा भविष्यति। वा० रा० ३।६०।२६।

८. अवेक्ष्यावेक्ष्य धावन्तं धनुष्पाणिर्महावने।
अतिवृत्तमिवोत्पाताल्लोभयानं कदाचन॥ वा० रा० ३।४२।५।

९. २।३।३२; १०. ३।५०।३९; ११. ६।१११।३०।

१२. ६।४२।१३, ६।८१।१०; १३. ६।२२।२१। १४. २।३७।१२।

१५. २।८।११, २।९।१, २।११।९, ५।२।३४, ७।६३।१७।

१६. २।९४।४३, ७।३९।१; १७. ६।४०।६२; १८. ७।४८।६।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भावार्थकार्थप्रक्रियार्थककृदन्तक्रियारूपाणि—

वैदिक्यां क्रियार्थकक्रियां द्योतयितुं धातुभिः सह विविधप्रत्ययाः प्रयुज्यन्ते, येषां विवरणं वक्ष्यमाणं वेदितव्यम्—

(क) ए-प्रत्ययः—

ए-प्रत्ययो हलन्तधातुभिः सह प्रयुज्यते। वैदिक्याम् 'ए'-प्रत्ययस्य द्वादश-क्रियारूपाणि समासरहितानि सन्ति, परमधिकांशसमासानामुत्तरपदेऽपि 'ए'-प्रत्ययः प्रयुक्तोऽस्ति[1]। अस्य प्रत्ययस्यैतादृशानि क्रियारूपाणि ऋग्वेदे ऋग्वेदस्य च ब्राह्मणग्रन्थेषु प्रचुरमात्रायामुपलभ्यन्ते। यथा—भुवे, युधे, आरभे, दृशे, परिभ्वे-इत्यादीनि।

(ख) ऐ-प्रत्ययः—

वैदिक्याम् 'ऐ'-प्रत्ययोऽपि प्रयुक्तोऽस्ति[2], यथा ऋग्वेदसंहितायां प्रति+मा=प्रतिमै, परा+दा=परादै इत्यादयः।

(ग) त्यै-प्रत्ययः—

वैदिक्यामस्य प्रत्ययस्य कतिपयकृदन्तक्रियारूपाण्युपलभ्यन्ते। यथा—ऋग्वेदसंहितायां (१।११३।६) इत्यै, मैत्रायणीसंहितायां (१।६।३) साढ्यै इत्यादीनि।

(घ) से-प्रत्ययः—

वैदिक्याः कतिपयतुमर्थककृदन्तक्रियारूपेषु 'से'-प्रत्ययोऽपि प्रयुक्तोऽस्ति। पाणिनिनाऽनुबन्धभेदादस्य प्रत्ययस्य से, क्से, सेन्, इत्येतानि त्रीणि-रूपाणि मतानि[3]। वैदिक्या आद्युदात्तप्रयोगेषु नित्प्रत्ययः सेन् इति, गुणाभाव-युक्तेषु रूपेषु, कित् प्रत्ययः—'क्से' इति। अन्यरूपेष्वनुबन्धरहितः क्से-प्रत्ययः प्रयुज्यते, यथा—जिषे, प्रयक्षे, स्तुषे इत्यादयः।

(ङ) असे-प्रत्ययः—

वैदिक्याञ्चतुर्विंशतिकृदन्तक्रियारूपेषु 'असे'-प्रत्ययः प्रयुक्तोऽस्ति। अनुबन्धभेदादस्य प्रत्ययस्य असे, असेन्, कसेन्, इत्येतानि त्रीणि रूपाणि स्वीकृतानि। आद्युदात्तरूपेषु असेन्रूपम्, गुणाभावयुक्तरूपेषु क्सेन्रूपम्, अन्यरूपेषु च 'असे' प्रत्ययः प्रयुज्यते। यथा—अयसे, भियसे, चरसे इत्यादीनि।

---

१. दृशे विख्ये च—पा० अ० ३।४।११।

२. प्रयै रोहिष्यै अव्यथिष्यै—पा० अ० ३।४।१०।

३. तुमर्थे-सेसेन्से-असेन्क्सेक्सेन्ध्यैन्कध्यैन्शध्यैन्तवैतवेङ्तवेनः—पा० अ० ३।४।९।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(च) तये-प्रत्ययः—

मैक्डानल - ह्विट्नेप्रभृतिपाश्चात्त्यविदुषां मतानुसारेण वैदिक्याः पञ्च-प्रयोगेषु तुमर्थक-तये प्रत्ययः प्रयुक्तोऽस्ति। यथा—पीतये, दातये, वीतये—इत्यादयः। भारतीयविद्वद्भिरयं प्रत्ययो नामार्थको मतः[1]।

(छ) अये-प्रत्ययः—

पाश्चात्त्यविदुषां मतानुसारेण वैदिक्याः षट्प्रयोगेषु चतुर्थीमूलकः अये-प्रत्ययः प्रयुक्तोऽस्ति। यथा–इषये, दृशये, युधये इत्यादयः। भारतीयविद्वद्भिरयं प्रत्ययोऽपि नामार्थको मतः।

(ज) तवे-प्रत्ययः—

वैदिक्या त्रिंशदधिकेषु भावार्थककृदन्तक्रियारूपेषु तुमर्थकस्तवे - प्रत्ययः प्रयुक्तोऽस्ति[2]। अनुबन्धभेदादयं प्रत्ययो द्विविधोऽस्ति–[3] (१) तवेन्, (२) तवेङ् इति। स्वरगुणयुक्तधातुभिः सह सम्प्रसारणयुक्तधातुभिः सह चास्य प्रत्ययस्य तवेङ्रूपं प्रयुज्यते। यथा—सूतवे, ओतवे इत्यादि। इतो विपरीतमाद्युदात्तरूपैः सह तवेन्रूपं प्रयुज्यते। यथा—एतवे, कर्त्तवे, मन्तवे, गातवे, दातवे इत्यादि।

(झ) तवै-प्रत्ययः—

वैदिक्यां तवै - प्रत्ययस्य ११-१२ कृदन्तक्रियारूपाण्युपलभ्यन्ते[4], यथा—गन्तवै, दातवै, एतवै इत्यादीनि। वैदिक्या ब्राह्मणसाहित्येऽस्य प्रत्ययस्य पर्याप्त-प्रयोगो विद्यते।

(ञ) अध्यै-प्रत्ययः—

वैदिक्याश्चत्वारिंशक्रियार्थककृदन्तक्रियारूपेषु 'अध्यै'-प्रत्ययः प्रयुक्तोऽस्ति। पाणिनिनाऽनुबन्धभेदादयं प्रत्ययः षट्प्रकारको मतः। नित्-प्रत्ययानां (अध्यैन्, कध्यैन्, शध्यैन्) प्रयोगेष्वाद्यक्षरमुपर्युदात्तस्वरो मतः। यथा-गमध्यै, पिबध्यै इत्यादयः। कध्यै-कध्यैनसिद्धेषु प्रयोगेषु धातोः स्वरं गुणो न भवति, यथा–'इषध्यै' इत्यादयः। शध्यै-शध्यैन्-इत्येताभ्यां शित्प्रत्ययाभ्यां सह धातोर्लडङ्गतया प्रयुज्यते, यथा-ऐतरेयारण्यके 'गृणध्यै' इत्यादयः।

(ट) इष्यै-प्रत्ययः—

वैदिक्याः कतिपयभावार्थककृदन्तक्रियारूपेषु 'इष्यै'-प्रत्ययः प्रयुक्तोऽस्ति, यथा—तैत्तिरीय-काठकसंहितयोः—'रोहिष्यै', काठकसंहितायाम्—'अव्यधिष्यै'

---

१. डॉ० वैदिक-व्याकरण, पृष्ठ—७८० ; २. पूर्वोद्धृतं ७८० पृष्ठे।
३. पा० अ० ३।४।९ ; ४. पा० अ०—३।४।९।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इत्यादयः । ह्विट्ने - मोनियरविलियम्सप्रभृतिपाश्चात्त्यविद्वद्भिरस्योक्तप्रयोगेषु तुमर्थप्रत्ययः 'ष्यै' इति मतः[1]; परं मैकडॉनलमहोदयेन 'रोहिष्यै' इति प्रयोगो नामिको मतः[2]।

(ठ) क्सुन्-प्रत्ययः—

पाणिनिना भावलक्षणे धातोः पश्चात् क्सुन् (अस्) प्रत्ययस्य प्रयोगो मतः[3]। अनेकविदुषां मतानुसारेण कतिपयभावार्थककृदन्तक्रियारूपेषु क्सुन्प्रत्ययः प्रयुक्तोऽस्ति, यथा—'आतृदेः', 'अवपदेः' इत्यादीनि।

(ड) तोस्-प्रत्ययः—

मैकडॉनलप्रभृतिपाश्चात्त्यविदुषां मतानुसारेण कतिपयभावार्थकक्कृदन्त-क्रियारूपेषु तोस्प्रत्ययः प्रयुक्तोऽस्ति, 'एतोः', 'हन्तोः' इत्यादिषु।

(ढ) मने-वने-प्रत्ययौ—

पाश्चात्त्यविदुषां मतानुसारेण कतिपयभावार्थककृदन्तक्रियारूपेषु मने-वने-प्रत्ययौ प्रयुक्तौ स्तः 'भर्मणे', 'दावने' इत्यादिषु। भारतीयविदुषां मतानुसारेण त्वेते प्रयोगा विविधसंज्ञाशब्दानां चतुर्थीविभक्त्येकवचनस्य सन्ति[4]।

वैदिकपरम्पराप्रयुक्तविविधतुमर्थकप्रत्ययेषु कोऽपि प्रत्ययो लौकिक्यां प्रयुक्तो नास्ति।

(ण) तुमुन्-प्रत्ययः—

यद्यप्यृग्वेदसंहितायां तुमर्थकप्रत्ययानां सप्तशतकृदन्तक्रियारूपाण्युपलभ्यन्ते, तथाप्येषु प्रयोगेषु तुमुन्प्रत्ययः पञ्चप्रयोगेष्वेव प्रयुक्तोऽस्ति। अथर्ववेद-संहितायामस्य प्रत्ययस्याष्टकृदन्तक्रियारूपाण्युपलभ्यन्ते। यजुर्वेदस्य विभिन्नवैदिक-संहितासु परवर्तिवैदिक्यां चान्यतुमर्थकप्रत्यया लुप्ता भवितुमारभन्त। तुमुन्-प्रत्ययप्रयोगश्च समृद्धतरं भवितुमारभत। लौकिक्यां भावार्थकक्रियां द्योतयितुं केवलं तुमुन्प्रत्यय एव प्रयुक्तोऽस्ति। आदिकाव्ये तुमुन् प्रत्ययस्य १२११ कृदन्त-क्रियारूपाणि प्राप्यन्ते। एतेषु क्रियारूपेषु कतिपयतुमुन्प्रत्ययकृदन्तक्रियारूपाण्य-नियमिततायुक्तानि सन्ति, येषां विवरणं वक्ष्यमाणमवगन्तव्यम्—

क्रम्धातोस्तुमुन्प्रत्ययान्तस्य अतिक्रमितुम् इति रूपस्य स्थाने रामायणे 'अतिक्रान्तुम्'[5] इति रूपमुपलभ्यते। एवं सद्धातोः 'आसादयितुम्' इति रूपस्य

---

१. ह्विट्ने, संस्कृत-ग्रामर, पृष्ठ—३५१; २. मैकडानल, वैदिक ग्रामर, पृष्ठ—४१०।

३. सृपितृदोः क्सुन् – पा० अ० ; ४. वैदिक-व्याकरण, पृष्ठ—७८४।

५. उत्सहेयमतिक्रान्तुं सर्वानाकाशगोचरान्।
सागरान् शोषयिष्यामि दारयिष्यामि मेदिनीम्॥ वा० रा० ४।६६।१४।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स्थाने छान्दसिकसुविधाया वाल्मीकिना अनियमितरूपं 'आसादितुम्'[१] इति प्रयुक्तमस्ति ।

आदिकाव्यपरिप्रेक्ष्ये विकासदृष्टया वैदिकलौकिक्योः कृदन्तक्रियारूपाणामध्ययनेन स्पष्टं जायते यद् वैदिक्यां ये कृत्प्रत्ययाः प्रयुज्यन्ते, तेभ्यो लौकिक्यां कतिपयपूर्णतया लुप्ता अभवन्, तेषां स्थाने च नवीनप्रत्यया विकसिता अभवन्[२] ।

१. (क) ६।१३।२१, ६।३५।११ ।

(ख) अबद्ध्वा सागरे सेतुं घोरेऽस्मिन् वरुणालये ।
लङ्का नासादितुं शक्या सेन्द्रैरपि सुरासुरैः ॥ वा० रा० ६।१३।२१ ।

(ग) युध्यमानमनालक्ष्यं शक्रोऽपि त्रिदशेश्वरः ।
द्रष्टुमासादितुं वापि न शक्तः किं पुनर्युवाम् ॥ वा० रा० ६।३५।११ ।

२. This Study is based on the Critical edition of the VĀLMĪKI-RĀMĀYAṆA published from oriental Institute, BARODA.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

निरुक्ते शब्दतत्त्वम्

डॉ० रामाशीषपाण्डेयः
उपाचार्योऽध्यक्षश्च, संस्कृतविभागे
मारवाड़ीमहाविद्यालस्य, राँची (विहार)

❋ ❋ ❋

'शब्द' इति पदे शब्द् + भावे घञ्[1] यद्वा शप् आक्रोशे + 'शाशपिभ्यां ददनौ[2]' इति दन्प्रत्ययः, पकारस्य नकारे कृते शब्द इति हलायुधे[3]। माधवीयधातुवृत्तौ तु शब्दस्यार्थः शब्दक्रियारूप एव प्रतिपादितः[4]। शब्दस्य मूलं तु ध्वनिरिति व्यपदिश्यते। कोषग्रन्थे शब्दो ध्वनेः पर्यायभूतः[5]। महाभाष्येऽपि 'शब्दं कुरु, शब्दं मा कार्षीः, ध्वनिं कुर्वन्नेवमुच्यते[6]'। कारिकावल्यां तु शब्दनिरूपणावसरे प्रतिपादितम्—

शब्दो ध्वनिश्च वर्णश्च मृदङ्गादिभवो ध्वनिः।
कण्ठसंयोगादिजन्या वर्णास्ते कादयो मताः॥
सर्वः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते[7]।

शब्दस्य ध्वनिर्वर्णश्चात्र द्वौ भेदौ वर्णितौ। तत्र मृदङ्गादिभवो ध्वनिः, कण्ठसंयोगादिजन्याः कादयो वर्णाश्च प्रसिद्धाः। सर्वः शब्दो नभोवृत्तिरित्यनेन शब्दगुणकमाकाशमिति शब्दाश्रयत्वमाकाशत्वं सर्वथा विदितम्[8]। 'प्रतीतपदार्थको लोके ध्वनिः शब्दः' इति महाभाष्यकारवचनेन शब्दस्य प्रयोगः पदपर्यायभूतः[9]। वाक्यपदीये शब्दस्य स्थानं नितरां महत्त्वपूर्णमिति प्राप्यते—

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः[10]॥

---

१. शब्दस्तोममहानिधिः (द्र०) ; २. उणा०—४·९६; ३. हलायुधे—६५१ पृष्ठे।

४. "मैत्रेयस्तु··· ··· शब्दः शब्दक्रियायामिति पठित्वा शब्दयतीत्याह" मा० धा० वृ० धातुसू० १७९ (३९० पृष्ठे)।

५. 'शब्दे निनादनिनदध्वनिध्वानरवस्वनाः।
स्वाननिर्घोषनिर्ह्रादनादनिस्वाननिस्वनाः॥ (अमरकोशे—१।६,२२-२३)।

६. महाभाष्ये—१।९; ७. कारिका०—१६४, १६५।

८. 'आकाशगुणः शब्दः'—(नि० अध्याये—१४)।
आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः। (कारिका०—४४ पृष्ठे)।

९. महाभाष्ये—१।१; १०. वा० प०—१।१।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

'एकः शब्दः सम्यग् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके च कामधुग् भवति, मातापितरौ चास्य स्वर्गे लोके महीयेते' इति महाभाष्यवचनेनास्य विचारतत्त्वस्य प्रयोजनमुपपन्नम् । शब्दस्य तत्त्वं शब्दतत्त्वमिति षष्ठीतत्पुरुषे शब्दश्चासौ तत्त्वमिति कर्मधारये समासे च शब्दतत्त्वं स्पष्टम् । निरुक्तं तु—अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तमिति[१] । सम्प्रति यास्काचार्यस्य निरुक्तं विदितमेव भारतीयैः पाश्चात्त्यैश्च विद्वद्भिः । अत्र शब्दतत्त्वमिति विषयमवलम्ब्य विचारः प्रस्तूयते ।

व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा[२] इत्यनेन व्याकरणे शब्दव्युत्पादनं जायते । शब्दतत्त्वं तु व्याकरणशास्त्रे परिशीलितम् । व्याकरणशास्त्रं तु व्याकृता वागिति तैत्तिरीयसंहितायां प्राप्यते[३] । अनेन व्याकरणे शब्दानुशासनं प्रधानभूतम् । अथ शब्दानुशासनमिति महाभाष्ये । तत्र व्याकरणप्रयोजने रक्षोहागमलघ्वसन्देहाः प्रयोजनमिति यदुक्तम्, तत्तु वेदाश्रितमेव । निरुक्तं विद्यास्थानं[४] व्याकरणस्य कार्त्स्न्यम्[५] । तत्रार्थानुशासनं प्रधानभूतम् । निरुक्ते प्रतिपादिता अर्थाः शब्दाश्रिता विशेषतो वेदाश्रिता इति निरुक्तस्य वेदाङ्गत्वं सर्वथा प्रसिद्धम् । महाकविकालिदासेनापि रघुवंशमहाकाव्यस्यादौ शब्दार्थसम्बन्धस्य नित्यत्वं प्रकटितम् —

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ[६] ॥

महाभाष्ये पुनः—'सिद्धे शब्दार्थसम्बन्धे'[७] इति विवेचयता महर्षिणा पतञ्जलिनापि तयोर्नित्यत्वं प्रदर्शितम् । सकलवस्तुबोधनसमर्थः शब्द एवेति वाक्यपदीये[८] । आचार्यदण्डिमतानुसारेण शब्दप्रकाशेन प्रकाशितेयं पृथिवी[९] ।

---

१. ऋ० भा० भू० ५१ पृष्ठे; २. महाभाष्ये—१।१।

३. "वाग्वै पराच्य व्याकृता अवदत्, ते देवा इन्द्रमब्रुवन् इमां नो वाचं व्याकुर्वीति··· तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत् । तस्मादियं व्याकृता वागुद्यते ।"
(तै० सं० ६।४।७।३) ।

४. अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः ।
धर्मशास्त्रं पुराणञ्च विद्या ह्येताश्चतुर्दश ॥ (विष्णुपुराणे)

५. नि० १।५; ६. रघु०—१।१; ७. महाभाष्ये—१।१।

८. न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥ (वा० प० १।११७) ।

९. इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम् ।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥ (काव्यादर्शे) ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वाक्यपदीये पुनः—"इतिकर्त्तव्यता लोके सर्वा शब्दव्यपाश्रया[१]" तथा "अर्थ-क्रियासु वाक् सर्वान् समीहयति देहिनः[२]" इति प्राप्यते। शतपथब्राह्मणे—"वाचं धेनुमुपासीत[३]", बृहदारण्यके "वाग्वै सम्राट् परमं ब्रह्म[४]", छान्दोग्योपनिषदि—"वाग्वै तत् सर्वमिति" प्राप्यते[५]। अनेन शब्दस्य महत्त्वं नितरां स्पष्टम्। निरुक्ते समुद्धृतोऽयमृग्वेदस्य मन्त्रो वाग्विवेचने तत्परः प्रतीयते—

चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति[६]॥

निरुक्ते दुर्गवृत्तौ मन्त्रस्यास्य व्याख्यायां विद्यते यत् तेषां पुनश्चतुर्णां पदानां त्रीणि गुहायां निहिता निहितानि नेङ्गयन्ति नार्थं प्रकाशयन्ति। तुरीयं चतुर्थ-भागम् एकं पदं मनुष्याः परिज्ञानाय वदन्ति। अस्मिन्नवसरे निरुक्ताचार्यो ब्राह्मणवचनं प्रस्तौति—"अथापि ब्राह्मणं भवति—सा वै वाक् सृष्टा चतुर्धा व्यभवत्। एष्वेव लोकेषु त्रीणि पशुषु तुरीयम्। या पृथिव्यां साऽग्नौ सा रथन्तरे। याऽन्तरिक्षे सा वायौ सा वामदेव्ये। या दिवि सादित्ये सा बृहति सा स्तनयित्नौ। अथ पशुषु ततो या वागत्यरिच्यत तां ब्राह्मणेष्वदधुस्तस्माद् ब्राह्मणा उभयीं वाचं वदन्ति या च देवानां या च मनुष्याणामिति[७]"। परा पश्यन्ती मध्यमा वैखरीति चत्वारि वाक् पदानि विद्यन्ते। देहेऽपि मूलाधारेऽस्मिन् समुद्यति समीरणे तेनैव संस्कृते वायुना व्यापकत्वेनावस्थितः शब्दब्रह्मात्मको रवः परावागाख्यो मूलाधारेऽभिव्यक्तो भवति। नाभिपर्यन्तमागच्छता तेन वायुनाऽभिव्यक्तो रवः मनोविषयतामुपगतः पश्यन्तीपदेनाभिधीयते। हृदयपर्यन्तमागच्छता तेनाभिव्यक्तो रवो मध्यमावागिति। एवं मुखकण्ठादिस्थानेषु तेन वायुनाभिव्यज्यमानो वैखरी-पदाख्यः[८]।

---

१. वा० प०—१।१२१;
२. तत्रैव—१।१२७।
३. श० ब्रा०—१४;
४. बृहदारण्यके—४।१।
५. "यद् वै वाङ् नाभविष्यन्नधर्मो नाधर्मो व्यजज्ञपयिष्यत् न सत्यं नानृतं न साधु नासाधु न हृदयज्ञो नाहृदयज्ञो वागेवैतत् सर्वं विज्ञापयति वाचमुपास्वेति।"
(छा० उ०—७।१।२)।
६. ऋ० सं० १।१६४।४५;
७. मै० सं०—१।११।५ (निरुक्ते—१३ अध्या०)।
८. मूलाधारात् प्रथममुदितो यस्तु भावः पराख्यः
पश्चात् पश्यन्त्यथ हृदयगो बुद्धियुङ्मध्यमाख्यः।
वक्त्रे वैखर्यथ रुरुदिवोरस्य जन्तोः सुषुम्ना
बद्धस्तस्माद् भवति पवने प्रेरितो वर्णसंज्ञः॥
परावाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता।
हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा॥ (अलङ्कारकौस्तुभे)।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

'चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताः' इति निरुक्ते । शब्दस्य नित्यत्वमेव पदविभागं प्रति कारणमिति प्रदर्शयन् यास्कः पूर्वपक्षे निरुक्तकारस्यौदुम्बरायणस्याभिमतमुपस्थापयति—"इन्द्रियनित्यं वचनमौदुम्बरायणः[1] । तत्र चतुष्ट्वं नोपपद्यते[2]" ।

निरुक्तस्य दुर्गवृत्तौ तु—'इन्द्र आत्मा स येन ईयते लिङ्ग्यतेऽनुमीयते चास्त्ययसावात्मा कर्त्ता, यस्येदं करणम्, नाकर्त्तृकं करणमस्तीति तदिन्द्रियम् । तस्मिन्नित्यमिन्द्रियनित्यम् । उच्यतेऽनेनेति वचनं वाक्यमित्यर्थः । तदेतन्नामाख्यातोपसर्गनिपातात्मकम् । तस्मिन् वाक्ये एवमिन्द्रियनित्ये सति यदेतत् पदचतुष्ट्वमुक्तमेतन्नोपद्यते । यावदेव वक्तुर्वागिन्द्रिये वचनम्, तावदेव तदस्तीति शक्यते वक्तुम्, प्रच्युतं च नास्ति । अपि च वाक्यमपि वाक्यं समस्तमुद्भूतं तदिन्द्रियेणावतिष्ठते । यदवयवभूतानि पदान्यवस्थितानि परिसंख्यातुम् । न च विनष्टाविनष्टयोः पदयोः सह परिसंख्यानमस्ति । तस्माद्वचनानित्यत्वात् पदचतुष्ट्वानुपपत्तिरित्युपपन्नम् ।

पुनश्च श्रीमदौदुम्बरायणदिशा शब्दस्यानित्यत्वे सति, एतेषामयुगपदुत्पन्नानां शब्दानां वाक्यावयवभूतानामितरेतरगुणप्रधानभावो नाम्न आख्यातं प्रति गुणभावेनोपदेशः, आख्यातस्य च नाम प्रति प्रधानभावेनोपदेशो नोपपद्यते । नहि विनष्टं नाम गुणभावमियादाख्याते, नापि नष्टमाख्यातं प्रधानभावमियान्नाम्नि । एवञ्च शास्त्रकृतोपयोगः शब्दस्य शब्दान्तरेण योगः, उपसर्गस्य धातुना, धातोः प्रत्ययेन, प्रत्ययस्य लोपागमवर्णविकारैः । वचनानित्यत्वान्नोपपद्यते । अयुगपदुत्पत्तौ हि सत्यां धातुरुच्चारितो विनष्टः स वायमुपसर्गेण योक्ष्यते, प्रत्ययेन वा । नहि विनष्टाविनष्टयोर्योगोऽस्ति । तस्माद्य एव नामाख्यातयोरितरेतरगुणः प्रधानभावमुपसर्गनिपातानां नामाख्याताभ्यां योगे यच्च पदचतुष्टयमुक्तं सर्वमेतदसम्भवमिति ।

शब्दस्यानित्यत्वमुपस्थापयितुमौदुम्बरायणस्य मतमिदं प्रसरति । वचनेन्द्रियनित्यसम्बन्धादनित्यत्वमिन्द्रियाणामनित्यात् । आचार्ययास्केन शब्दस्य व्याप्तिमत्त्वं नित्यत्वञ्चोपस्थापयितुं प्रस्तूयते—'व्याप्तिमत्त्वात् तु शब्दस्य'[3] । तत्र व्यापनं व्यप्तिः, सा यस्मिन्नास्ति सोऽयं व्याप्तिमान् शब्दः, तद्भावो व्याप्तिमत्त्वम् ।

शब्दस्य व्याप्तिमत्त्वं पुनर्दुर्गवृत्तौ विचार्यते—'शरीरे ह्यभिधानाभिधेयरूपा बुद्धिर्हृदयान्तर्गता काशप्रतिष्ठितयोरभिधानरूपाभिधेयरूपयोर्बुद्ध्योर्मध्येऽभिधान-

१. नि०—१।१ ;　　२. तत्रैव—१।१ ;　　३. तत्रैव—१।१ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

रूपया शास्त्राभिमतप्रयोजनविजिज्ञापयिषया बुध्द्या पुरुषेण तदभिव्यक्तिसमर्थेन स्वगुणभूतेन प्रयत्नेनोदीर्य्यमाणः शब्द उरःकण्ठादिवर्णस्थानेषु निष्पद्यमानस्तया पुरुषार्थाभिधानसमर्थवर्णादिभावमापद्यमानः पुरुषप्रयत्नेन बहिर्विनिक्षिप्तोऽविनाशिनि व्यक्तिभावमापन्नः श्रोत्रद्वारेणानुप्रविश्य प्रप्याय्यस्य बुद्धि सर्वार्थरूपां सर्वाभिधानरूपां व्याप्नोतीत्येवं व्याप्तिमान् शब्दः[१]।' स शब्दः स्वमर्थमभिदधत् स्वक्रियाप्रवेशोपजनितेनाभिधानेनाख्यातमित्येवमादिना स्वमात्मानमभिसम्बन्ध्य तिरोभवितुमुपक्रमते विनाशं चोपैति। तस्य स्वदेशोपजनितैराख्याताादिभिः स्वप्रदेशविशेषानुस्मृतिपूर्वकं परिसंख्यानमुपपद्यत एव। पुरुषप्रयत्नेनोपजनिताद्वक्त्रोद्घातात् परस्यार्थप्रत्ययमाधाय शब्दव्यक्तय एव ध्वंसन्ते, न तु शब्दाकृतयः। तास्तु तयाभिधानशक्त्या बुद्धिद्वारेणावस्थिताः स्वानर्थान् प्रकाशयन्त्यः स्थिता एव भवन्ति। तासु साक्षात् पदपरिसंख्यानं वर्तमानमितरासु विनाशिनीषु व्यक्तिषु लक्षणोपचर्य्यते। तस्माद् व्याप्तिमत्त्वाच्छब्दस्य पदचतुष्ट्वादिसर्वमुपपद्यत एव।

आचार्ययास्कस्य शब्दव्याप्तिमत्त्वं वैयाकरणानां स्फोटसिद्धान्तं स्मारयति। स्फोटसिद्धान्तः स्फोटायनाचार्यस्य मतमिति 'अवङ् स्फोटायनस्य[२]' इति सूत्रेण ज्ञायते। पदमञ्जरीकारेण हरदत्तेन सूत्रमिदं व्याख्यातम्—स्फोटोऽयनं पारायणं यस्य स स्फोटायनः, स्फोटप्रतिपादनपरो वैयाकरणाचार्यः[३]। नागेशोऽपि स्फोटसिद्धान्तप्रतिपादकः स्फोटायन इति स्वीकरोति[४]। स्फोटस्तु स्फुटयति प्रकाशयत्यर्थमित्याशुविनाशिनां वर्णानां मेलकाभावादानुपूर्व्या ज्ञातुमशक्यत्वात् कथं शब्दार्थबोध इत्याशङ्क्य पूर्वपूर्ववर्णानुभवजनितसंस्कारसहितान्तिमवर्णानुभवेन स्फोटो व्यज्यते।

शब्दानां नित्यत्वं तु महर्षिपाणिनिरपि स्वीकरोति[५]। 'सिद्धे शब्दार्थसम्बन्धे' इत्यनेन वार्त्तिकेन स्पष्टं प्रतीयते शब्दानां नित्यत्वम्[६]। यतो हि सिद्धशब्दो नित्यशब्दस्य पर्यायभूतः[७]। शब्दः सिद्धः, अर्थः सिद्धः, तयोः सम्बन्धश्च सिद्धः।

---

१. निरुक्ते दुर्गवृत्तिः—१।१; २. पा० अष्टा० ६।१।१२३।

३. पा० अष्टा० ६।१।१२३—काशिकापदमञ्जरी—द्र०।

४. वैयाकरणनागेशः स्फोटायन ऋषेर्मतम्।
परिष्कृत्योक्तवांस्तेन प्रीयतां जगदीश्वरः॥ (स्फोटवादे)

५. सर्वे सर्वपदादेशा दाक्षिपुत्रस्य पाणिनेः।
एकदेशविकारे हि नित्यत्वं नोपपद्यते॥

६. महाभाष्ये—१।१; ७. नित्यपर्यायवाची सिद्धशब्दः– महाभाष्ये—१।१।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अनेनैव शब्दो नित्यः, अर्थो नित्यः, तयोः सम्बन्धश्च नित्यः[१]। स्फोटसिद्धान्ते शब्दोच्चारणकाले वर्णानां विनाशो भवति; परं तेषामाकृतिः संस्कारो वा नित्यत्वेन तत्र राजते, यतो ह्याकृतिर्जातिरूपा[२] स्फोटरूपा वा संस्कारजन्या वा। श्रोतॄणां बुद्धौ स्वार्थं प्रतिपादयन् शब्दो ब्रह्मरूपो जगत्यां व्याप्य स्थितो भवति। अनेन प्रतीयते यदाकृतिर्नित्या। यदि शब्दानामनित्यत्वं स्यात्, तर्हि वर्णसंस्काराणामभावो भवेदेव, परं संस्कारो जायते।

डॉ० लक्ष्मणस्वरूपस्याभिमतमस्ति यद् व्याप्तिमत्त्वात् तु शब्दस्याणीयस्त्वाच्च शब्देन संज्ञाकरणं व्यवहारार्थं लोक इति स्वतन्त्रवाक्यम्। तस्माच्छब्दस्य विषयक्षेत्रं व्यापकमिति शब्दस्य व्याप्तिमत्त्वम्। यतो हि लोके व्यवहारार्थं संज्ञाकरणञ्च शब्दस्य प्रयोगस्तस्य व्याप्तिमत्त्वमणीयस्त्वं चेति द्वौ प्रयोगहेतू[३]।

आधुनिकभाषाविज्ञानक्षेत्रे शब्दस्य नित्यत्वमीदृशं स्वीक्रियते। शब्दोच्चारणानन्तरं शब्दो निश्चितमेवाकाशमभिव्याप्य स्थितो भवति। आकाशम् 'ईथर' इति तत्त्वेनाऽऽवृतमिति मन्यन्ते वैज्ञानिकाः। आकाशगुणः शब्द इति विदितमेव[४]। आकाशस्य नित्यत्वे सति तस्य गुणस्य नित्यत्वमपि नितरां सिद्धमेव। 'ईथर'-तत्त्वेनावृतेनाऽऽकाशेन ध्वनिर्धार्यते। भारतीयशास्त्रेऽपि शब्दोत्पत्तिसिद्धान्ते प्रतिपादितम्—

वीचीतरङ्गन्यायेन तदुत्पत्तिस्तु कीर्तिता।
कदम्बगोलकन्यायादुत्पत्तिः कस्यचिन्मते[५]॥ इति।

शान्तजलाशये लोष्ठप्रक्षेपेणोत्थितो जलतरङ्गस्तु क्रमशः सर्वस्मिन् जलाशयक्षेत्रे व्याप्तो भवति। अनेनैवाकाशदेशे प्रक्षिप्तः प्रयुक्तो वा शब्दः क्रमशः सम्पूर्णे ह्याकाशे तथैव व्याप्तो भवतीति व्याप्तिमत्त्वं शब्दस्य च व्यापकत्वं यास्कदिशाऽपि साम्यं दधाति। शब्दस्य व्याप्तिमत्त्वं तु व्यापनशीलायां बुद्धौ शब्दस्य व्याप्तिरिति प्रथमो विचारः। द्वितीयश्च शब्दस्य प्रयोगक्षेत्रं व्यापकम्। महाभाष्येऽपि—'महान् शब्दस्य प्रयोगविषयः'[६] इति प्राप्यते।

शब्दतत्त्वाश्रितं पदविभाजनं सर्वत्र महत्त्वपूर्णमिति यास्कसम्मतं पदविभाजनं द्रष्टव्यम्। पदविभागे यथार्थं पदमैन्द्राणामिति[७] ऐन्द्रसम्प्रदाय

१. "सिद्धे शब्दे सम्बन्धे चेति, इदमपि गम्यते—शब्दस्य यः स्वयाकृत्या सम्बन्धस्तस्मिन्नित्य इति"। (महाभाष्ये - १।१ भाष्यसेतौ भर्तृहरिः)
२. आकृतिर्हि नित्या—(महाभाष्ये–१।१)।
३. निघण्टु और निरुक्त —३१४,३१८,३१९ पृष्ठेषु; ४. नि० अ० १४।
५. कारिका०—१६६; ६. महाभाष्ये—१।१; ७. निरुक्ते दुर्गवृत्तिः—१।१।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एकमेव पदं स्वीक्रियते। पाणिनिस्तु सुबन्ततिङन्तरूपेण पदस्य विधिद्वयं स्वीकरोति[1]। केचिदाचार्याः पदस्य विभागत्रयं स्वीकुर्वन्ति। अनेनोपसर्गनिपातावेकतः कृत्वा सुबन्ततिङन्तावुपसर्गनिपाताश्च तयोर्विभागा भवन्ति[2]। केचनाचार्याः पदस्य पञ्चभेदान् स्वीकुर्वन्ति नामाख्यातोपसर्गनिपाताः कर्मप्रवचनीयाश्चेति[3]। आचार्ययास्केन पदस्य चतुर्धा विभागः कृतः—'नामाख्याते चोपसर्गनिपाताः[4]'। ऋक्प्रातिशाख्ये[5], यजुःप्रातिशाख्ये[6], अथर्वप्रातिशाख्ये[7], कौटिल्यस्यार्थशास्त्रे[8] व्याकरणमहाभाष्ये[9] च पदस्य चतुर्धा विभागः स्वीकृतः।

नामपदं तु—'सत्त्वप्रधानानि नामानीति निरुक्ते। नामपदस्य व्याख्यायां दुर्गवृत्तौ—'नमन्ति आख्यातशब्दे गुणभावेन, नमन्ति वा स्वमर्थमाख्यातशब्दवाच्ये गुणभावेनेति नामानि।' नाम्नि सत्त्वस्य प्राधान्यं विद्यते। ऋक्प्रातिशाख्ये[10], यजुःप्रातिशाख्ये[11], अथर्वप्रातिशाख्ये[12], कौटिल्यस्यार्थशास्त्रे[13] च सत्त्वप्रधानानि नामानीत्येव स्वीकृतम्। बृहद्देवतायां तु—

शब्देनोच्चरितेनेह येन द्रव्यं प्रतीयते।
तदक्षरविधौ युक्तं नामेत्याहुर्मनीषिणः॥ (बृ० दे० १।४२)

पुनश्च तत्रैव प्राप्यते यद् यत्र सर्वा विभक्तयो वचनलिङ्गयोर्भेदेनार्थेषु प्रयुक्ता भवन्ति, तन्नाम[14]। नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्चेति नाम्नः[15]

१. सुप्तिङन्तं पदम् —अष्टा० १।४।१४।
२. त्रीणि निपातोपसर्गावेकतः कृत्वा (निरु० दु० वृ० १।१)।
३. 'द्विधा कैश्चित् पदं भिन्नं चतुर्धा पञ्चधाऽपि वा'—(वा० प० जाति०—१)।
४. निरु० १।१।
५. 'नामाख्यातम् उपसर्गनिपाताश्चत्वार्याहुः पदजातानि शाब्दाः' (ऋ० प्रा० १२।५।६९)।
६. तच्चतुर्धा नामाख्यातोपसर्गनिपाताः (वाज० प्रा० शा० ८।५२)।
७. अथर्वप्रा० शा० १।१।
८. 'तच्चतुर्विधम्, नामाख्यातोपसर्गनिपाताश्च' (कौ० अ० शा० १०।२८)।
९. चत्वारि शृङ्गाणि चत्वारि पदजातानि (महाभाष्ये–१·१)।
१०. तन्नाम येनाभिदधाति सत्त्वम् (ऋ० प्रा० १२।७)।
११. सत्त्वाभिधायकं नाम (यजु० प्रा० ५।५४-५५)।
१२. नाम सत्त्वाख्यमुच्यते (अथर्वप्रा०—२।१)।
१३. तत्र नामसत्त्वाभिधायीति (कौ० अ० शा० १०।२८; पृ० ७२।
१४ अष्टौ यत्र प्रयुज्यन्ते नानार्थेषु विभक्तयः।
तन्नाम कवयः प्राहुर्भेदे वचनलिङ्गयोः॥ (बृ० दे० १।४३)।
१५. निरु० १।१।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आख्यातजत्वं प्रसिद्धम्। शाकटायनप्रभृतयो वैयाकरणा यास्कप्रभृतयो निरुक्तकाराश्चाख्यातजसिद्धान्तं स्वीकुर्वन्ति। आधुनिकभाषाविज्ञानेऽपि सिद्धान्तोऽयं स्वीकृतः।

भावप्रधानमाख्यातमित्याख्याते भावस्य प्राधान्यं निरुक्ते विवेचितम्। दुर्गवृत्तौ तु—"आख्यायते गुणभावेन वर्तमाना अनेककारकप्रविभक्ता स्फुरमाणेव प्रधानद्रव्यभावाभिव्यक्त्युन्मुखीभूता क्रिया। तस्याश्च प्राधान्येन प्रवर्तमानो भावः स्वात्मलाभप्रधान इत्याख्यातः[१]। अत आख्याते प्रधानभावेन क्रिया गौणत्वेन द्रव्यश्च यत्र तदाख्यातमिति स्पष्टमेव। ऋग्वेदप्रातिशाख्ये[२], यजुःप्रातिशाख्ये[३], अथर्वप्रातिशाख्ये[४] च क्रियाया वाचकत्वमेवाख्यातम्। कौटिल्यस्यार्थशास्त्रे[५], महाभाष्ये[६] च क्रियायाः प्राधान्यमेवाख्यातमित्युक्तम्। बृहद्देवतायामपि भावप्रधानमाख्यातमिति प्राप्यते[७]। निरुक्ते आख्यातस्य सूक्ष्मविश्लेषणमुपन्यस्तम्—"पूर्वापरीभूतं भावमाख्यातेनाचष्टे, 'व्रजति', 'पचति' इत्युपक्रमप्रभृत्यपवर्गपर्यन्तम्[८]"। तत्र भावविकारेषु—षड्भावविकारा भवन्तीति वार्ष्यायणिः' इत्युपस्थापयता महर्षिणा यास्केन भावविकाराणां विश्लेषणं कृतम्।

'प्रादयः[९]', 'उपसर्गाः क्रियायोगे[१०]' इत्यष्टाध्यायीसूत्राभ्यामुपसर्गाः स्पष्टाः। दुर्गवृत्तौ–आख्यातमुपगृह्यार्थविशेषमिमे तस्यैव सृजन्तीत्युपसर्गाः[११]। शाकटायनस्तु 'न निर्बद्धा उपसर्गा अर्थान्निराहुरिति मन्यते[१२]'। फलतः पाणिनेः 'उपसर्गाः क्रियायोगे' इति कथनं शाकटायनसिद्धान्तानुकूलम्। परमत्र यास्केनाचार्यगार्ग्यस्याभिमतमुपस्थापयता प्रकाशितं यत्–निर्बद्धा अपि उपसर्गाः अर्थान् प्रकाशयन्ति, यतो हि 'उच्चावचाः पदार्था भवन्तीति गार्ग्यः'। वेदेषु निर्बद्धा अप्युपसर्गा अर्थवन्तः प्रयुक्ताः सन्ति। पुनश्च निरुक्तेऽपि—'आ इत्यर्वागर्थे प्रपरेत्येतस्य प्रातिलोम्यमभीत्याभिमुख्यमित्यादय उपसर्गाणामर्थाः प्रदर्शिताः।

निपातास्तु उच्चावचेष्वर्थेषु निपतन्ति नानाप्रकारकेष्वर्थेषु प्रयुक्ता भवन्तीति कस्मिंश्चिदेवार्थे यः प्रसिद्धो गुणस्तदन्यस्मिन्न प्रसिद्धस्तद्गुणेऽर्थे शब्द-

१. निरु० दु० वृ० १।१; २. क्रियावाचकमाख्यातम्—(ऋ० प्रा० १२।८।७०७)।
३. यजुःप्रा० —८ ५४-५५।
४. आख्यातं यत् क्रियावाचि (अथर्वप्रा०—१०।२८)।
५. अविशिष्टलिङ्गमाख्यातं क्रियावाचि (कौ० अ० शा० पृ० ६२)।
६. क्रियाप्रधानमाख्यातं भवति (महाभाष्ये—३।२)।
७. बृ० दे० २।१२१; ८. निरु० १।१।
९. पा० अष्टा० १।४।५६; १०. तत्रैव—१।४।५९।
११. निरु० दु० वृ० १।१; १२. तत्रैव—१।९।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मात्रेण यदुपसंयोज्य तद्गुणप्रकाशनं क्रियते सोपमा। अनेनोपमार्थे कर्मोपसंग्रहार्थे पदपूरणार्थे च निपाताः प्रयुक्ता भवन्ति। निपातानां त्रिष्वर्थप्रधानेषु निपातेष्वन्येऽपि विभागा अन्तर्लीना भवन्ति। निषेधार्थे, हेत्वर्थे, निन्दार्थे, पूजार्थे, विचारणार्थे, विनिग्रहार्थे, अनुपृष्टे, हेत्वपदेशे, विद्याप्रकर्षे चापि प्रयुक्ता निपाता यास्केन विवेचिताः सन्ति।

उपसर्गाणां निपातानां च वाचकत्वं द्योतकत्वं वेति जिज्ञासायां निरुक्ते विवेचनं प्राप्यते। उपसर्गाणां निपातानां येऽर्था निरुक्ते प्रतिपादिता वैदिकोदाहरणेषु च दर्शितास्ते वाचकत्वमनुसरन्ति। अन्ये च द्योतकत्वमपि दधति वैदिकमन्त्राणामर्थप्रकाशनाय प्रथमं यास्काचार्येणैव निर्वचनं कृतमिति शब्दानां निर्वचने ध्वन्यात्मकस्यार्थात्मकस्य, दृश्यात्मकस्य, शब्दानुकृतेर्भौगोलिकस्यैतिहासिकस्य पौराणिकस्याधारस्य च कल्पनं सर्वथा भाषावैज्ञानिकतामेव दधाति। निर्वचनक्रमे प्रत्यक्षवृत्त्या परोक्षवृत्त्यातिपरोक्षवृत्त्या च तेषां प्रदर्शनं सत्यमेव तेषां शब्दानामर्थप्रकाशनाय सर्वथा महत्त्वसम्पन्नम्।

निष्कर्षतः कथनमिदं सर्वथा संगतं प्रतीयते यन्निरुक्ते शब्दतत्त्वस्य निरूपणं महनीयमस्ति। शब्दस्य नित्यत्वं व्यापकत्वं च दार्शनिकविचारपथमायाति। वैयाकरणा अपि शब्दस्य नित्यत्वं स्वीकुर्वन्तीति पूर्वमेव दर्शितम्। शब्दानां व्यापकत्वनिरूपणे श्रीमदौदुम्बरायणस्य मतं पूर्वपक्षे स्थापयता यास्काचार्येणोत्तरपक्षे निरस्तम्। तथा च तेषां व्यापकत्त्वमुपस्थापयता तेन स्वीया भाषावैज्ञानिकी दृष्टिः प्रदर्शिता। 'अणीयस्त्वाच्च शब्देन संज्ञाकरणं व्यवहारार्थं लोके' इति प्रतिपादयता तेन शब्दस्य व्यावहारिकोपयोगो दर्शितः। शब्दविभागेऽपि दृष्टिरस्य विशिष्टा वर्तते। यतो हि पाणिनिप्रभृतिभिः शाब्दिकैः सुबन्तं तिङन्तं च पदसंज्ञं स्यादिति पदस्य विभागद्वयं संस्तुतम्। कैश्चिच्छब्दकारैस्तु यास्कस्य पदविभाग एव स्वीकृतः। महाभाष्यकारः पतञ्जलिः स्वयं विषयेऽस्मिन् यास्कं प्रति सम्मानं दर्शयति। यास्केन स्वरसंस्कारयुक्ताः शब्दा दृष्टव्ययेन नामाख्यातसंज्ञकाः प्रतिपादिताः, पुनश्चादृष्टव्ययशब्दा अव्ययरूपा उपसर्गनिपातभूताः स्वीकृताः। पाणिनिरपि व्युत्पन्नाव्युत्पन्नान् शब्दान् स्वीकरोति। विषयेऽस्मिन् पाणिनेर्दृष्टिस्तु सूक्ष्मा; परं पदविभागेषु यास्कस्य दृष्टिरपि महत्त्वपूर्णाऽस्तीति नाम्न आख्यातजत्वं भावविकारेषु षड्विधत्वमुपसर्गनिपातानामर्थवत्त्वं पदविरहिते स्वतन्त्रेऽपि तेषामर्थप्रकाशकत्वञ्चेत्यादीनि शब्दतत्त्वानि पृथक् पृथगनुसन्धेयानीति दिक्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भगवान् परशुरामः

डॉ० पुरुषोत्तमलालभार्गवः शास्त्री

पू० संस्कृतविभागाध्यक्षो राजस्थानविश्वविद्यालयस्य,

जयपुरम्,

धर्मविपयक आचार्यश्च, मैक्मास्टर-विश्वविद्यालये,

हेमिल्टन, ओन्टारियो, कनाडा ।

❁ ❁ ❁

ब्राह्मणानां भार्गवाङ्गिरसात्रेयकाश्यपवासिष्ठागस्त्यकौशिकनामसु सप्त-वंशेषु भार्गववंशः प्राचीनतमः प्रथिततमश्च । अस्य वंशस्य प्राचीनतमा ऋषयो भृगुर्दधीचिश्च्यवनोऽप्नवानश्चासन् । भृगुदधीच्योः प्रामाणिको वृत्तान्तो न ज्ञायते । च्यवनो राज्ञः शर्यातेर्दुहितरं सुकन्यामुपयेमे । अप्नवानो राज्ञो नहुषस्य पुत्रीं रुचिमूढवान् । अप्नवानस्य वंश ऊर्वनामर्षिर्जातः । ऊर्वस्य पुत्र ऋचीक आसीत् । ऋचीको राज्ञो गाथिनः पुत्रीं महर्षेर्विश्वामित्रस्य च स्वसारं सत्यवती-मुपयेमे । ऋचीकस्य पुत्र ऋग्वेदकालस्य प्रसिद्ध ऋषिर्जमदग्निरासीत् । जमदग्नि-रिक्ष्वाकुवंशीयां राजकन्यां रेणुकां परिणीतवान् । तस्यामस्य महातेजस्वी रामनामा पुत्रोऽजायत, यः शत्रूणां संहाराय परशोर्ग्रहणात् परशुराम इत्यभिधानमलभत ।

परशुरामः स्वतारुण्ये पितरं जमदग्निमनुकुर्वन् निरन्तरं ज्ञानस्यार्जने प्रसारे च संलग्न आसीत् । ऋग्वेदस्य दशममण्डलस्य दशाधिकशततमस्य सूक्तस्य परशुराम एव द्रष्टा । शान्तिप्रियोऽप्ययमृषिरन्यायमत्याचारं च दमयितुं सदा तत्पर आसीत् । तस्मिन् काले हैहयक्षत्रियाणां कुले सहस्रबाहुर्नाम शक्तिमानो-जस्वी च नृप आसीद् यः स्वपितुर्नाम्ना कार्तवीर्योऽप्यकथ्यत । स्वशक्त्या मदेनान्धो भूत्वा स राजा प्रजा अपीडयत् । एकदा कार्तवीर्यो महर्षेर्जयदग्नेराश्रमं प्राप्तः । जमदग्निरभ्यागतं राजानं मधुपर्केण संपूज्य तस्मै स्वधेनोः क्षीरेण निष्पन्नं सरसं स्निग्धं च भोजनं ददौ । तद्भोजनं भुक्त्वा कार्तवीर्यस्तस्यै धेन्वै स्पृहयाञ्च-कार । जमदग्नेः प्रतिषेधवचनं श्रुत्वा क्रोधेन कलुषीकृतधीः स राजा तं निर्दोषमृषिं हत्वा बलाद्धेनुमपावाहयत् ।

यदा हैहयराजेनेदं क्रूरकृत्यमनुष्ठितं तदा परशुरामो गृहे नासीत् । स्वमातु-र्विलापमाकर्ण्य नातिदूरं गतः परशुरामो गृहं प्रतिनिवृत्तः । पितरं मृतं वीक्ष्य हैहयाधिपतेश्चेष्टितं च निशम्य शोकक्रोधाभ्यामाकुलः परशुरामः पितुर्घातकस्य

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वधे कृतसंकल्पो गृहात् प्रतस्थे। स्वमातामहकुलजैरिक्ष्वाकुवंश्यै राजन्यैरनुमोदितोऽनुयातश्च वीरो जामदग्न्यः सहस्रबाहुं तस्य सहायकान् नृपांश्च समराय समाह्वयत। तदा जामदग्न्यकार्तवीर्ययोर्भीमैः शस्त्रास्त्रपातनैर्महाघोरं युद्धं बभूव। महातेजस्वी रामः कार्तवीर्यस्य तस्य सहायकानां च सैन्यं लीलयैव क्षपयामास। अनन्तरं च क्रुद्धो रेणुकातनयो देवपतिरिव वज्रेणेव तीक्ष्णेन परशुना महाद्रिशृङ्गमिव कार्तवीर्यस्य शिरश्चिच्छेद।

विद्यानिरते ब्राह्मणकुले जन्म लब्ध्वापि परशुरामेण तात्कालिकं नितरां शक्तिशालिनं प्रजापीडकं च नृपं हत्वा महद् यशोऽर्जितम्। एतेन वीरकर्मणा चमत्कृता भाविसन्ततयः परशुरामं भगवतो विष्णोरवतारममन्यत; किन्तु महापुरुषैः प्रायः स्वयशो मूल्यमपि दीयते। तदेव सम्प्रति दर्शयिष्यते।

वायु-ब्रह्माण्ड-विष्णुपुराणेषु स्पष्टं लिखितमस्ति यन्महर्षिणा व्यासेनैकैव पुराणसंहिता रचिता[1]। व्यासरचितायां मूलपुराणसंहितायाः सामग्रीं गृहीत्वा तस्यां च नवान्याख्यानानि मिश्रयित्वा काले काले विभिन्नानि पुराणानि रचितानि। अत एव बहून् महापुरुषानधिकृत्य प्राचीनेषु पुराणेषु यो वृत्तान्त उपलभ्यते, तस्मिन् नवीनेषु पुराणेषु बहव प्रक्षेपा दृश्यन्ते। परशुरामस्य वृत्तान्तो वायु-मत्स्य-पद्म-लिङ्ग-कूर्म-विष्णु-भागवतपुराणेषु विस्तरेण प्राप्यते[2]; किन्तु परवर्तिभागवतपुराणं विहाय कस्मिन्नप्यन्यस्मिन् पुराणे परशुरामस्य चरितं मातृवधकलङ्केन दूषितं न दृश्यते। अतो नात्र सन्देहस्य कोऽप्यवकाशो यन्मातृवधस्येयं कथा नितान्तं कल्पिता।

भागवतपुराण इदमपि लिखितमस्ति यत् परशुरामस्त्रिसप्तकृत्वो महीं निःक्षत्रियां चक्रे। इयमपि कथा वायु-मत्स्य-पद्म-लिङ्ग-कूर्म-विष्णुपुराणेषूपलभ्यमाने परशुरामवृत्तान्ते न क्वापि दृश्यते। अतः परशुरामस्य निष्कारणक्रूरतां प्रदर्शयन्तीयमपि कथा नूनं कल्पितैव। परशुरामस्य पिता जमदग्नी राज्ञो हरिश्चन्द्रस्य समकालिक आसीदित्यैतरेयब्राह्मणस्य शुनःशेपोपाख्यानेन सिध्यति[3]। हरिश्चन्द्रस्य तद्वंशजस्य रामस्य च मध्ये त्रयस्त्रिंशद्राजानः समभवन्। एवं

---

१. आख्यानैश्चाप्युपाख्यानैर्गाथाभिः कलजोक्तिभिः।
पुराणसंहितां चक्रे पुराणार्थविशारदः॥
(वायुपुराणम्—६०, २१, ब्रह्माण्डपुराणम्—२,३४,२१; विष्णुपुराणम्—३ ६।१३)

२. वायुपुराणम्—९४, मत्स्यपुराणम्—४३; पद्मपुराणम्—५, १२; लिङ्गपुराणम्—१, ६८, कूर्मपुराणम्—१, २२; विष्णुपुराणम्—४।११, भागवतपुराणम्—९।१५।

३. ऐतरेयब्राह्मणम्—३३.१।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सत्यपि रामायणे रामविवाहानन्तरं रामपरशुरामयोः सङ्घर्षो दर्शितः[१]। परशुरामः सप्तसु चिरजीविषु वर्तते[२] इति मत्वैवेयं कथा रचितेति प्रतीयते। किन्तु चिरजीविशब्दस्य दीर्घजीव्येवार्थो न त्वमर्त्यः। अन्यथा कथं राम-कृष्ण-बुद्धसदृशा अवतारिपुरुषा दिवं गताः, विभीषणकृपाश्वत्थामसदृशा नातिमहान्तः पुरुषा अमर्त्या अभवन्। वस्तुतः परशुरामस्य रामेण पराभवः प्रक्षेपबहुले बालकाण्डे वर्णितः। ब्रह्म-कूर्म-गरुडपुराणेषु हरिवंशे च वर्णितायां रामकथायां रामविवाहप्रसङ्गे परशुरामस्य नामापि न दृश्यते[३]। परमार्थतो दाशरथी राम इव जामदग्न्यो रामोऽपि पित्रोः पूजको दुर्बलानां संरक्षकोऽजेयो योद्धा चासीत्।

---

१. रामायणम्—(बड़ौदासंस्करणम्) १, ७३-७५।

२. अश्वत्थामा बलिर्व्यासो हनूमांश्च विभीषणः।
कृपः परशुरामश्च सप्तैते चिरजीविनः॥ (पद्मपुराणम्—५,४६,८)।

३. ब्रह्मपुराणम्—२१३, १२४-१५८; कूर्मपुराणम्—२१,११७-१५३; गरुडपुराणम्—१,१४२, १०-१८; हरिवंशम्—१४१,२२-५५।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

राष्ट्रियामस्मितामनुरुध्य प्रवृत्तायाः संस्कृतकाव्यधारायाः समीक्षणम्

डॉ० भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'

अनुसंधानसंस्थाननिदेशकः,

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य, वाराणसी।

❀ ❀ ❀

महती प्रतिष्ठा कविकर्मणः खलु भारतीये वाङ्मये। ऋग्वेदसंहितायां कवेः काव्यस्य चानेकधा विलसति प्रयोगः। 'अपारे काव्यसंसारे कविरेव प्रजापतिः' इत्युक्तिमनुरुध्य काव्यसंसारप्रजापतिस्तावत् कविरेव विराजते। ऋग्वेदसंहितायाम्— 'कविः कवित्वा दिवि रूपमसृजत्' (१०,१२४,७), 'वत्सो वां मधुमद्वचोऽशंसीत् काव्यः कविः' (८,८,११) चेत्याभ्यां मन्त्राभ्यां प्रकटिता कवेः क्रान्तदर्शिता। अनितरसाधारणस्तावत् कवेर्महिमा। वेदेषु श्रीमद्भगवद्गीतायामन्येषु ग्रन्थेषु च परब्रह्मैव कविरभिधीयते।

अन्तर्मुखीभूय वाचं पुनाति कविः। अस्यां पवनक्रियायामसौ स्थूलां वैखरीं वाचं सूक्ष्मां सूक्ष्मतरां सूक्ष्मतमां च विधाय स्वस्वरूपेऽवतिष्ठते। इत्थं तद्वाण्यामखिललोकमङ्गलकामनासंनिधानमतीव नैसर्गिकं विभाति। गभीरचिन्तनभूमिकामधिष्ठाय विभावितं काव्यममरत्वमधिगच्छति—

'पश्य देवस्य काव्यं न ममार न च जीर्यति' इति।

कविः समुत्कृष्टामादर्शकथां कवितामुखेन समुपन्यस्यति। एतादृशे काव्ये लोकमङ्गलमयानि सर्वाण्येव तत्त्वानि समुपतिष्ठन्ते तावदनायासतयैव। अद्यतने युगे राष्ट्रियास्मितानुरोधेन चित्तमाकृष्यते समेषाम्। प्राचीने संस्कृतवाङ्मये तत्त्वमिदं खपुष्पायते स्मेति केषाञ्चित् तत्त्वविदां मतं नास्ति हृदयावर्जकम्। प्राचीनेषु संस्कृतकाव्येषु सर्वजनहितकारकं तत्त्वमिदं निसर्गतयैव प्रस्फुटितमासीत्। एवंविधानां काव्यानाममरत्वमपि स्वाभाविकम्। यद्यपि संस्कृतकाव्यधाराया अजस्रप्रवाहो वैदिकादेव कालाद् गतिशीलतामुपेतः, तथापि लौकिकभाषादृशा वाल्मीकीयं रामायणमादिकाव्यतया समाम्नातम्। मर्यादापुरुषोत्तमश्रीरामचन्द्रस्याऽऽदर्शश्चेद् वाल्मीकिना स्वकाव्ये विषयीकृतस्तर्हि लोकनायकस्य भगवतः श्रीकृष्णस्य चरितं श्रीकृष्णद्वैपायनव्यासेन प्रामुख्यतश्चित्रितम्। किन्तु प्राचीनत्वादुभयं तावदितिहासतयैव गण्यत इति तृतीयकल्पस्य काव्यधारायाः प्रक्रमो

सा० सु०—७

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

महाकविकालिदासात् प्रभृति मन्तव्यः। काव्यस्य सर्वास्वेव धारासु राज्यानां राष्ट्रस्य प्रजानां च मङ्गलानि समीहितानि सन्ति। तत्र राष्ट्रस्यैक्यसूत्रनिवेशाय लयानुगमनाय च सम्प्रबोधो महत्त्वाधायकः।

ऋग्वेदसंहिताया दशमे मण्डले राष्ट्रियामस्मितामभिलक्ष्य व्याहृतं यदस्मितया रक्षितं राष्ट्रं तद्रहस्यं च शत्रूणामभिमुखं नैव प्रकटीभवतीति तद्गोप्यता शत्रुभिर्न ज्ञायते[1]। ऋग्वेदसंहितायाः सप्तमे मण्डले राष्ट्रशब्द ईश्वरस्य शक्तिशालिनो वार्थे व्यवहृतः। राष्ट्रियास्मिता रक्ष्यताम्, मा तत्र हीनता प्रविशत्विति तत्र संदिष्टम्[2]। इन्द्रसंकाशो लोकशासकः पर्वतवद् दृढो भूत्वा राष्ट्रं स्वस्वकर्मसु योजयेदिति महनीयः संदेशोऽस्या एव संहिताया दशममण्डलेऽवाप्यते। अस्मिन् मन्त्रे प्रजानामेव राष्ट्रत्वमभिमतम्[3]।

अयोग्यशासकानां कारणादेव राष्ट्रास्मिताभ्रंशो भवतीति बृहत्संहितायामभिहितं वराहमिहिरेण[4]। राष्ट्रियास्मिताया पालनार्थमेव शासका राज्यानि प्रशासतीति व्याहृतं वाल्मीकीये रामायणे[5]। शासकवर्गः प्रजाहितकार्यव्यापृतो भवेदिति प्रतिपादयति महाकविकालिदासो भरतवाक्ये शाकुन्तलस्य[6]।

राज्यानां शिक्षिताः प्रजा एव राष्ट्रियामस्मितामवितुं पारयन्तीति लोकमङ्गलकामः शासकः प्रथमतः प्रजानां शिक्षणमात्मीयं प्रमुखं कर्तव्यमभ्युपगच्छति। दिलीपः प्रजानां वास्तवो जनकः, गेहीयपिता तु जन्ममात्रदाताऽऽसीत्। दिलीपेन प्रजाः समुचितशिक्षाभिः पूजिताः। तासां रक्षणभरणपोषणभारोऽपि स्वांसे समारोपित आसीदिति समुदीरितं महाकविना रघुवंशमहाकाव्ये[7]।

महाकविना शिक्षार्थे विनयशब्दः प्रयुक्तः। तदीयं राष्ट्रस्वरूपमासीद् विनय-

---

१. न दूताय प्रह्ये तस्थ एषा तथा राष्ट्रं गुपितं क्षत्रियस्य—ऋ०सं० १०।१०९।३।

२. मा त्वद्राष्ट्रमधि भ्रशत्—ऋ० सं० १०।१७३।१।

३. इहैवैधि माप च्योष्ठाः पर्वत इवाविचालिः।
इन्द्र इवेह ध्रुवस्तिष्ठेह राष्ट्रमु धारय॥ ऋ० १०।१७३।२।
ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः।
ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम्॥ ऋ० १०।१७३।५।

४. कुराजान्ताति राष्ट्राणि—बृहत्संहिता, १९।१९।

५. एतदर्थं हि राज्यानि प्रशासति नराधिपाः—वा० रा०।

६. प्रवर्ततां प्रकृतिहिताय पार्थिवः—अभिज्ञानशाकुन्तलम्।

७. प्रजानां विनयाधानाद् रक्षणाद् भरणादपि।
स पिता पितरस्तासां केवलं जन्महेतवः॥ रघु० १।२४।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गुणेपेताः प्रजाः। तेन विनयः शिक्षापरपर्यायवचनोऽभ्युपेतः। प्रजानां विनयवैकल्याद्धि शिक्षा विफलैव मन्यते। रघुवंशमहाकाव्यस्य द्वितीये सर्गेऽपि शिक्षार्थे विनयव्यवहारो व्याहारि तेन[१]। सम्यग् विद्याभ्यसनं शैशव एव प्रतिफलति[२]। अभ्यासेन विद्या प्रसाद्यते[३]। अभ्यासाय बुद्धिवैशद्यमुषसि भवति[४]। महाकविना निशान्त एव विद्याभ्यासार्थमुपयुक्तः कालो मेने[५]। कविर्माघस्तु कविताप्रणयनाय, शासकानां राज्यसम्बन्धिविविधविषयविचाराय च ब्राह्ममुहूर्तमङ्गीकरोत्यनुकूलं कालम्[६]।

राष्ट्रियास्मिताया जागरणाय प्रथमं सोपानं तावदास्ते समुचितशिक्षादीक्षा तदीयविधिनिर्देशश्च। श्रीहर्षेण तु नैषधमहाकाव्ये खल्वध्ययनम्, अर्थज्ञानम्, आचरणम्, प्रचारणं चेति स्वरूपतया शिक्षायाः संक्षिप्तं स्वरूपमेव प्रास्तावि[७]।

राष्ट्रस्यानुकूल्यं प्रजानुरञ्जनं चेति द्वयं संस्कृतकाव्यधारायां शासनसंचालनकौशलपरिचायकं भवति। विनैतेन राष्ट्रस्यैकसूत्रेऽनुस्यूतत्वं दुष्करं जायते। स एव शासकः प्रजा अनुकूलयितुं शक्नोति, यो न भवति मृदुतमो न च कठोरतमोऽपि। महाकविः कालिदासो दक्षिणदिक्कपवनानुष्णाशीतत्वमुपमाय मन्त्वनुरूपिणीं दण्डव्यवस्थां प्रतिजानीते[८]।

प्रजाहितमनुरुध्य यथासमयं चन्द्रसूर्यसमं कोमलकठोरभावं शासकं प्रजाः कामयन्ते[९]। गुप्तकालस्य संस्कृतकाव्यधारायां प्रजारञ्जनं प्रकृतिरञ्जनं वा शासकस्य प्रमुखो गुणो विभावितः। राष्ट्रियास्मितोद्भावने गुणोऽयं राष्ट्ररूपिणे शरीराय मेरुदण्डवन्महनीयतामाधत्ते। महाकविः शासकस्यामुं गुणं प्रति नैकश इङ्गति। रघुवंशीये षष्ठे सर्गे स पुनरभिधत्ते प्रजारञ्जनलब्धवर्णत्वं राज्ञः[१०]। विषमयं वैषम्यं नाश्रयेत् कदाचिदपि प्रजारञ्जनमभिलषता राज्ञा। इत्थं प्रजाहृदयविजयाय राष्ट्रियस्वाभिमानजागरणाय च साफल्यमधिगम्यते। प्रजानु-

१. वन्यान् विनेष्यन्निव दुष्टसत्त्वान्—रघु० २।८।
२. शैशवेऽभ्यस्तविद्यानाम्—रघु० १।८।
३. विद्यामभ्यसनेनेव प्रसादयितुमर्हसि—रघु० १।८८।
४. पश्चिमाद् यामिनीयामात् प्रसादमिव चेतना—रघु० १७।१।
५. तच्छिष्याध्ययने निशां निनाय—रघु० ११९५।
६. 'गहनमपररात्रप्राप्तबुद्धिप्रसादाः कवय इव महीपाश्चिन्तयन्त्यर्थजातम्'—शिशु०।
७. अधीतिबोधाचरणप्रचारणैः—नैषध० १।४।
८. स हि सर्वस्य लोकस्य युक्तदण्डतया मनः।
आददे नातिशीतोष्णो नभस्वानिव दक्षिणः॥ रघु० ४।८।
९. यथा प्रह्लादनाच्चन्द्रः प्रतापात् तपनो यथा।
तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात्॥ रघु० ४।१२।
१०. राजा प्रजारञ्जनलब्धवर्णः परन्तपो नाम यथार्थनामा—रघु० ६।२१।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कूलने राजा रघुरनूनकतया साफल्यमधिजग्मिवान् । स एव प्रियतमो रघोरित्यहमहमिकया प्रजानामेकैको जनो मेने । कालिदासेन तत्र समुद्राभिगामिनीर्नदीरुदाहृत्य चित्रमाकृतम् । सुविशालो गभीरश्च पारावारो निखिलास्तरङ्गिणीः स्वात्मनि संगमयति । न तदीयो वैषम्यभावोऽभिलक्ष्यते कामपि तरङ्गिणीं प्रतीति न कस्याश्चिन्नद्या भवत्यसम्मानः । सा स्वत एव नावगच्छति तदीयमपमानम्[१] ।

विश्वस्ताः प्रजा अतिथिनामकस्य भूपस्याग्रे स्वात्मनिवेदनाय प्रभवन्ति स्म । स्मितपूर्वाभिभाषित्वात् प्रजा विश्वासमूर्तिं मन्यन्ते स्म तं प्रसन्नवदनं नृपमित्यभिदधे महाकविः कालिदासो रघुवंशे[२] । आदिकविर्वाल्मीकिरपि स्मितपूर्वाभिभाषित्वरूपं गुणमङ्गीचकार शासकानां सफलतायाः । महाकविना तु प्रसन्नमुखरागत्वमभिधाय ततोऽप्यधिकं स्पष्टीचक्रे । किन्तु फल्गून्याश्वासनानि प्रजाश्चिरं विश्वासयितुं न प्रभवन्ति । कस्मिंश्चिद् दिने सत्यं समुद्घाटितं भवत्येवेति शासकवर्गस्येदमावश्यकं कर्तव्यं यदसावदीनोऽपि सत्यपरिपालकोऽपि सन् वाक्पारुष्यं न समाश्रयेत् । परिहासकथास्वपि राज्ञो दशरथस्य मुखान्मिथ्यावचनानि नाविर्भवन्ति स्म । इन्द्राश्रितत्वेऽपि तद्वचनेषु दैन्यं नानुभूयते स्म । शत्रुजनेष्वपि तेन वाक्पारुष्यं न समीरितम्[३] ।

उक्तगुणैः परिप्लुते सति भूपे 'यथा राजा तथा प्रजाः' इत्याभाणकस्यानुरोधेन प्रजास्तस्य राष्ट्रस्य च भक्ता भवन्ति । महाकविना 'अदीनाः स्याम शरदः शतम्' इति वेदस्य, 'सत्यं ब्रूयात् प्रियं ब्रूयात्' इति च मनुस्मृतेर्वचनजातं काव्यमुखेन कार्यकारणभावं दर्शयता तथा प्रास्तावि यच्चमत्कारः स्वयमेव निर्गलितो भवति ।

आपत्काले प्रजारक्षार्थमेव बलप्रयोगोऽनुष्ठीयते महीक्षिता, न तु स्वार्थपरिपूर्तये चेत् प्रजासु जागर्ति राष्ट्रियः स्वाभिमानः । तत्रेदमपि द्रष्टव्यं भवति यदेतादृशेन महीपालेन स्वविद्याज्ञानप्रयोगो विद्वज्जनसपर्यानिमित्ताय विधीयते, न त्वहंकारप्रदर्शनाय । तस्य धनप्रयोगः प्रजाहिताय स्यान्न तु स्वसुखोपभोगाय । महाकविनाऽजभूप एवमेव निर्वर्णितः[४] ।

---

१. अहमेव मतो महीपतेरिति सर्वः प्रकृतिष्वचिन्तयत् ।
उदधेरिव निम्नगाशतेष्वभवन्नास्य विमानना क्वचित् ॥ रघु० ८।८ ।

२. प्रसन्नमुखरागं तं स्मितपूर्वाभिभाषिणम् ।
मूर्तिमन्तममन्यन्त विश्वासमनुजीविनः ॥ रघु० १७।३१ ।

३. न कृपणा प्रभवत्यपि वासवे न वितथा परिहासकथास्वपि ।
न च सपत्नजनेष्वपि तेन वागपरुषा परुषाक्षरमीरिता ॥ रघु० ९।८ ।

४. बलमार्तभयोपशान्तये विदुषां सत्कृतये बहु श्रुतम् ।
वसु तस्य विभोर्न केवलं गुणवत्तापि परप्रयोजना ॥ रघु० ८।३१ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रजाशासकयोः शिक्षासामञ्जस्यमत्यावश्यकमास्ते। मिथः परिपूरकता तयोर्विभाति। उभावेव मिथः प्रतिबिम्बभूतौ शोभेते।

राष्ट्ररक्षा द्विधा भवति १. राष्ट्राभ्यन्तरे विद्यमानेभ्य उपप्लवकारिभ्यस्तत्त्वेभ्यः प्रजानां रक्षणम्, २. राष्ट्रस्य बाह्यशत्रुभ्यो राष्ट्रस्य रक्षणं चेति। रक्षायाः प्रकारद्वयस्य क्रियान्वयनाय सर्वतः प्रथममिदमावश्यकं यत् प्रजापालक आदौ स्वस्मिन् विद्यमानेषु रिपुषु विजयमाप्नुयात्। बाह्यशत्रवस्तु सन्ति दविष्ठाः। नेदिष्ठान् कामक्रोधादिकान् षड् द्विषतो जयति चेद् बाह्यशत्रुषु विजयोऽनायासमेव सिध्यति। असत्यान्तरशत्रुजये ते राजानं निस्सत्त्वं निर्बलं च कुर्वन्तीत्यमी नित्यवैरिणो भवन्ति। महाकविनाजस्येदमेव वैशिष्टयमुपवर्णितम्[1]।

पाण्डवानुरक्तानां प्रजानामनुरागजयाय निरलसीभूय प्रजासेवासमर्पणाय च दुर्योधनः सर्वतः प्रथममाभ्यन्तरं शत्रुषड्वर्गं जिगायेति महाकविर्भारविर्विर्णयामास किरातार्जुनीये[2]।

अतिथिप्रह्वेन राज्ञा राष्ट्रेऽर्थकामौ तथा तदपेक्षया प्राबल्येन नैव संवर्द्धितौ यथा ताभ्यां धर्मोऽभिभूयेत। धर्मेणाप्यर्थकामौ न बाधितौ। परस्परमर्थेण कामः कामेन वाऽर्थो न बाधितोऽभूत्। तेन त्रयाणामेव तथा समन्वयोऽकारि यथा राष्ट्रे सर्वत्र सुखं व्यराजत, शान्तिश्च सर्वेषु पदं निदधे[3]। महदिदं कौशलं राष्ट्रियाया अस्मितायाः समुद्भावनाय प्रादर्शि कालिदासेन। महाकविर्भारविरपीदं प्रकारान्तरेण कवयति। दुर्योधनो निष्पक्षपातः सन् समयविभागपुरस्सरं धर्मार्थकामाननासक्तभावेन तथा समाराधयामास यथा ते मिथो मैत्रीमुपगता इत्यन्योन्यं बाधां नोपस्थापयामासुः[4]।

इत्थं महीक्षिद् राष्ट्रं संवर्धयितुं प्रजासु दृढं स्वानुरागमूलं च प्रतिष्ठापयितुं न पारयति चेदसौ प्रत्यग्रप्ररूढपादप इव सुखं समुन्मूलयितुं शक्यते। मालविकाग्निमित्रे कालिदासेन महता कौशलेनेदं व्याहृतम्[5]।

---

१. अनित्याः शत्रवो बाह्या विप्रकृष्टाश्च ते यतः।
अतः सोऽभ्यन्तरान् नित्यान् षट् पूर्वमजयद् रिपून्॥ रघु० १७।४५।

२. कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रपित्सुना।
विभज्य नक्तन्दिवमस्ततन्द्रिणा वितन्यते तेन नयेन पौरुषम्॥ किराता० १।९।

३. न धर्ममर्थकामाभ्यां बबाधे न च तेन तौ।
नार्थं कामेन कामं वा सोऽर्थेन सदृशस्त्रिषु॥ रघु० १७।५७।

४. असक्तमाराधयतो यथायथं विभज्य भक्त्या समपक्षपातया।
गुणानुरागादिव सख्यमीयिवान् न बाधतेऽस्य त्रिगणः परस्परम्॥ किरा० १।११।

५. अचिराधिष्ठितराज्यः शत्रुः प्रकृतिष्वरूढमूलत्वात्।
नवसंरोपणशिथिलस्तरुरिव सुकरः समुद्धर्तुम्॥ १।८।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

संस्कृतकाव्यधारायाममात्यानामानुकूल्यं सुहृदां च विश्वास्यतां प्रति भूपदृष्टिः समाकृष्टा कविवरैः। राष्ट्रियाणां शिक्षारक्षावित्तानां समुन्नयनं समन्वयनं च राष्ट्रियस्य स्वाभिमानस्य मुख्याधारस्तम्भौ स्तः।

संस्कृतकाव्यधारायां प्रभुमन्त्रोत्साहशक्तीनामपि महिमा दर्शितोऽस्ति। प्रभुशक्त्या राज्यविस्तारः, मन्त्रशक्त्या शासनतन्त्रव्यवस्था, उत्साहशक्त्या शासन-कार्यप्रबोधश्च करणीया भवन्ति।

संस्कृतकाव्येष्वभिव्यक्तया राष्ट्रियास्मितया प्रेरितस्य मानवस्य हृदये स्वराष्ट्रभूमिनदनदीतपोवननगरजनसन्दोहम्, प्रातः सायं शरदाद्यृतून्, इतिहास-संस्कृतिसभ्यताः, धर्मराजनीतिसाहित्यदर्शनकला अन्यानि चैतादृशानि मूलभूत-तत्त्वानि प्रति निष्ठायाः स्वाभिमानस्य च जागरूकता समुद्भवति।

अर्वाचीनसंस्कृतकाव्यधारायां तु राष्ट्रियास्मितायाः समुदिता भासुरा वर्णच्छटा विकीर्णा राजते। अम्बिकादत्तव्यासविभाविताद् शिवराजविजयात् प्रभृति संस्कृतकाव्यधारायां कानिचन काव्यानि तु केवलं राष्ट्रियामस्मितामाधारी-कृत्यैव विरचितानि सन्ति।

इहार्थशास्त्रीयमिदं वचनं मानदण्डरूपं स्मरणीयम्—

प्रजाहिते सुखं राज्ञः प्रजानां च हिते हितम्।
नात्मप्रियं हितं राज्ञः प्रजानां च हिते हितम्॥ इति।

इहार्थे महाभारतीया शिक्षेयं ध्यातव्या—

ये भूतान्यनुगृह्णन्ति वर्धयन्ति च ये प्रजाः।
ते ते राष्ट्रेषु वर्तन्तां मा भूतानामभावकाः॥ इति।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वाङ्मयविमर्शः

डॉ० पारसनाथद्विवेदी
संकायाध्यक्षः,
साहित्य-संस्कृतिसंकायस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी

❀ ❀ ❀

वाङ्मयं तावदुच्यते, किं नाम तद्वाङ्मयम् ? उक्तश्चाग्निपुराणे—"ध्वनिर्वर्णाः पदं वाक्यमित्येतद्वाङ्मयं मतम्[1]"। तदेवं ध्वनिवर्णपदवाक्यात्मकं वाङ्मयम्। तत्राभिव्यक्तिविशेषो ध्वनिरुच्यते। स च वर्ण-पद-वाक्य-व्यतिरिक्तोऽनेकवर्णानेकपदानेकवाक्ययोगादर्थान्तरं ध्वनयति[2]। अग्निपुराणेऽभिव्यक्तेर्भेदद्वयमुक्तं श्रुतिराक्षेपश्च। तत्र श्रुतिर्द्विधा—मुख्या चौपचारिकी च। मुख्या त्वभिधारूपा, या सर्वेषु शब्देषु वर्तते। औपचारिकी च लाक्षणिकी गौणी च। श्रुत्यतिरिक्ताभिव्यक्तिराक्षेपश्च। स एव ध्वनिः, यतो हि ध्वनिना व्यञ्जते सः[3]। एवं श्रुत्यतिरिक्तार्थध्वननं ध्वनिः। तदेवं व्यङ्ग्यार्थव्यञ्जकं वाक्यं ध्वनिः। तेन व्यङ्ग्यत्वात् व्यङ्ग्यार्थोऽपि ध्वनिः। किन्त्वत्र वाङ्मयविषयत्वात् श्रवणेन्द्रियग्राह्योऽर्थस्तु शब्दो ध्वनिः। प्रतीतपदार्थको लोके शब्दो ध्वनिरिति महाभाष्यकारः। ध्वनिश्च द्विधा—ध्वनिरूपो वीणादिसम्भवो निरर्थकः, नादात्मको वा। अपरश्च वर्णरूपः सार्थकः। तत्रार्थो मुख्यो लाक्षणिको गौणो व्यङ्ग्यश्चेति चतुर्विधः। ते चार्थाः वर्ण्याः, ते वर्ण्याः (अर्थाः) यैर्ध्वनिभिर्वर्ण्यन्ते, ते वर्णाः। ते च वर्णा अकारादयो ध्वनयः। अकारादयो हकारान्ता वर्णाः। ते च वर्णा अव्यक्तरूपेण परब्रह्मणि परमात्मनि स्थिताः। परमशिवः परमात्मा तद् वागाद्यगोचरं वर्णात्मकं तत्त्वं चतुर्दशसूत्ररूपं ढक्कानिनादव्याजेन पाणिनये मुनये समुपादिशत्। तत्र चतुर्दशसूत्रेष्वकारादयो हकारान्ता वर्णा निर्दिष्टाः। एवं च परमात्मा 'अहम्' इति रूपेणाभिव्यक्तो भवति। तत्र च द्विचत्वारिंशद्वर्णाः प्रोक्ताः, माहेश्वरमतानुसारं त्रिषष्टिश्चतुःषष्टिर्वा वर्णा भवन्ति। त्रिषष्टिः चतुःषष्टिर्वा वर्णाः शम्भुमते मताः[4]। तत्र कादयो मावसानाः स्पर्शाः पञ्चविंशतिः। यादयोऽष्टौ। अ इ उ ऋ एते ह्रस्वदीर्घप्लुतादिभेदेन द्वादश, ऌकारौ द्वौ (तस्य दीर्घाभावात्) ए ओ ऐ औ एते चत्वारो वर्णा दीर्घप्लुता-

---

१. अग्निपुराणम्—३३७।१ ; २. अग्निपुराणम्—(वृत्तिः) ३३७।१।
३. अग्निपुराणम्—३४५ १४। ४. पाणिनीयशिक्षा।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दिभेदेनाष्टौ (एतेषां ह्रस्वाभावात्)। एते सङ्कलनेन पञ्चपञ्चाशत्। अनुस्वार-विसर्गजिह्वामूलीयोपध्मानीया एतेऽयोगवाहाश्चत्वारः, चत्वारो यमाश्च। एतेषां सम्मेलनेन त्रिषष्टिर्वर्णा भवन्ति। केचन "ळ" इत्यतिरिक्तोऽप्येको वर्णः स्वीकुर्वन्ति। तेषां मते चतुःषष्टिर्वर्णाः सन्ति। वर्णसमूहः पदम्। तच्च पदं विभक्त्यन्तम्। स्वौजसादिः तिप्तसादिश्च विभक्तयः। तच्चान्तं पदं सुबन्तं तिङन्तञ्चेति। सुबन्ततिङन्तपदाभावादेव भूपचादिकं वर्णवृन्दं न पदम्। पदसमूहो वाक्यम्। वाक्यमिष्टार्थव्यवच्छिन्ना पदावली। इष्टार्थश्चेति—पदावलेः परस्पर-मन्वययोग्यत्वे सन्निधाने च योऽर्थः वक्तुमिष्टः, सोऽर्थ इष्टार्थः। तेन 'गिरिर्भुक्तम् अग्निमान् देवदत्तेन' इति न वाक्यमन्वयाभावात् सन्निधानाभावाच्च। एवं 'वह्निना सिञ्चति' इत्यपि न वाक्यम्, योग्यत्वाभावान्न चाग्नौ सेचनक्रियायाः सामर्थ्यं भवति। एवं च विवक्षितार्थसंयुक्तः पदसमूहो वाक्यम्। नानार्थकपदानां यस्मिन्नर्थे विवक्षया प्रयोगस्तदर्थ एव तत्पदस्य विवक्षितोऽर्थः। यथा "बुभुक्षितो धावति हरिरिति सत्वरम्" इत्यस्मिन् वाक्ये सिंहे विवक्षया प्रयुक्तो हरिशब्दो न तु वानरादिविवक्षितेऽर्थे। तदेवमभिधेयार्थप्रकृतिप्रत्ययादिनिष्पन्नपदसमूहो वाक्य-मिति। अत एव व्याख्यातं वाङ्मयमिति—

'ध्वनिर्वर्णाः पदं वाक्यमित्येतद्वाङ्मयं मतम्'।

वाचां विकार इत्यर्थे वाक् शब्दान्मयटि प्रत्यये कृते सति वाङ्मयशब्दस्य निष्पत्तिर्भवति, किन्त्वत्र विकारपदेन विकृतिर्न गृह्यते; अपि तु विवर्त्त इति। विवर्त्त इति ग्रहणे सति वाचां विवर्त्त एव वाङ्मयम्। यथा फेनबुद्बुदहिमाद्याकार-प्रकारभेदान्नामभेदाच्च दधन्नपि वारिशब्दो नान्यथात्वं भजते, न वा स्वस्वरूपं जहाति। एवं वागपि ध्वनिवर्णपदवाक्यादिरूपं दधाना नान्यथात्वं भजते, न वा स्वस्वरूपं जहाति। यथा 'अक्षरं वै ब्रह्म' इत्युक्तम्। सृष्टेः पूर्वमिदं ब्रह्माक्षरात्म-कमासीत्। तदेव ब्रह्म अकारादिहकारान्तसंयोगाद् 'अहम्' रूपेण व्यक्तं भवति। अभिव्यक्तेः कारणादेव स परावाग् इत्युच्यते। परावागेव समस्तध्वनीनां कारणम्। यथा चोक्तम्—वागेव विश्वा भुवनानि जज्ञे। सूक्ष्मा वागेव विश्वाकारेण विपरिणमते निवर्त्तत इति। एवं च—

ध्वनिना व्यज्यते वर्णः पदं वर्णात् पदाद्वचः।
वचसा व्यवहारोऽयं ध्वन्यधीनमतो जगत्॥

तत्र शास्त्रमितिहासः काव्यञ्चेति त्रयं वाङ्मयमुच्यते। तद्वाक्यात्मकं शास्त्रमितिहासः काव्यं च यत्र समाप्यते, तत् समाप्तिमच्छास्त्रम्, समाप्तिमानि-तिहासः, समाप्तं काव्यञ्चेति त्रयं वाङ्मयमुक्तम्। तच्च शास्त्रसमाप्तिपर्यन्तमेकं वाङ्मयं शास्त्रं नाम। शास्त्रं हि धर्मादिसाधनं वेदादि, यस्याध्ययनं इह लोके

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

परलोके च शुभं फलम्। तदितिहाससमाप्तिपर्यन्तं द्वितीयं वाङ्मयमितिहासो नाम अर्थात् यस्येतिहासे समाप्तिर्भवति तदितिहासो नाम वाङ्मयम्। इतिहासः पुरावृत्तम्। तत्र रामायण–महाभारत–पुराणादीनां समावेशः। तदुभयातिरिक्तं काव्यसमाप्तिपर्यन्तं तृतीयं वाङ्मयं काव्यं नाम[1]। एवं त्रिधा वाङ्मयं शास्त्रमितिहासः काव्यं चेति।

एवं विष्णुधर्मोत्तरपुराणेऽपि काव्येतिहासशास्त्रभेदाश्चर्चिताः। तत्र शास्त्रे (वेद-वेदाङ्ग-तन्त्र-धर्मशास्त्र-सूत्रादि मन्वादिसंहितादौ) शब्दप्रधानत्वम्। यतो ह्येषां स्वरतो वर्णतश्चोच्चारणेन पाठेऽध्ययने वा शुभं फलं भवति, स्वरतो वर्णतश्चान्यथात्वेनोच्चारणेन पाठाद्विफलत्वमेति। एवं तत्र शब्दप्राधान्यं भवति। एवं पुरावृत्तमात्राभिधायके इतिहासेऽर्थनिष्ठता भवति। तस्य पाठे नास्ति किञ्चिच्छुभाशुभफलमिति। न तु शब्दप्रधानत्वम्, यतो ह्यत्र स्वरतो वर्णतश्चोच्चारणेन तदन्यथात्वेनोच्चारणेन वा पाठे नास्ति किञ्चिच्छुभाशुभफलमिति। एवमितिहासस्य शास्त्राद्भेदोऽर्थमात्रनिष्ठतैव। तृतीयं वाङ्मयमभिधाप्रधानं काव्यमस्ति। काव्ये तु न शब्दस्य प्राधान्यं भवति, न वार्थस्य, किन्तु तत्र तदुभयातिरिक्ताभिधाशक्तेः प्राधान्यं भवति। अत्र चाभिधा शक्त्युद्बोधिका, न तु केवलं वाच्यार्थबोधिका। एवं चाभिधाशक्तेः प्राधान्यात् काव्यं ताभ्यां (शास्त्रेतिहासाभ्यां) विभिद्यते नहि काव्यस्य शब्दप्रधानत्वम्, न च स्वरतो वर्णतश्चोच्चारणेनेह लोके परलोके च किञ्चिदभ्युदयसाधकं फलमस्ति, न वा तदर्थज्ञानेन केवलं पुराकल्पज्ञानं भवति[2]।

महाराजेन भोजदेवेन तु तदग्निपुराणोक्तमानुपूर्व्यविकलमुद्धृतम्। अग्निपुराणस्येयं नवकल्पना यच्छास्त्रेषु शब्दानामितिहासपुराणेष्वर्थानां प्राधान्यं भवति, तदुभावपि वाच्यार्थप्रधानौ, किन्तु काव्यं तु व्यङ्ग्यार्थप्रधानत्वात् ताभ्यां विभिद्यते।

भट्टनायकेनाऽपि स एवाग्निपुराणोक्तो वाङ्मयविभागः स्वीकृतः। तेनोक्तम्—वेदेषु शब्दस्य प्राधान्यमाख्यानेष्वर्थस्य प्राधान्यं भवति, परं काव्ये व्यापारस्य प्राधान्यं भवति, तत्र च शब्दार्थौ गौणतां भजेते। महिमभट्टेनाऽपि स एवाग्निपुराणोक्तो वाङ्मयविभागोऽङ्गीकृतः। तत्र व्यङ्ग्यार्थप्रधानं काव्य यथा—

मातर्गृहोपकरणं सर्वं साधितं त्वया।
तद् ब्रूहि किं मया कार्यमेवं स्थास्यति किं दिनम्?॥

अत्र काचिन्नायिका कथयति—हे मातः! त्वया सर्वं गृहकार्यं सम्पादितम्,

---

१. अग्निपुराणम्—(काव्यप्रभावृत्तिः) ३३७।१; २. तत्रैव।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कथय, ततः परं किं कर्त्तव्यमस्ति ? एवं दिनमपि न स्थास्यति। अत्र नायिका स्वैरविहारार्थमुपपतिमुपगन्तुमिच्छति, इत्यभिधेयोऽर्थः। एवं च शास्त्रेतिहासयोरलङ्कारगुणयोगाद्दोषाभावाच्च काव्यत्वं भवति। शास्त्रे शब्दप्राधान्यमितिहासे चार्थप्राधान्यम्। यदा शास्त्रेतिहासयोर्मिश्रीभावो भवति, तदा शब्दार्थयोरुभयोः प्राधान्यं भवति। शास्त्रकाव्ययोर्मिश्रीभावे तदुभयप्राधान्यं काव्यशास्त्रम्, इतिहासकाव्ययोर्मिश्रीभावे तु तदुभयप्राधान्यम् इतिहासकाव्यम् इत्येवं शास्त्रेतिहासकाव्यानां भेदवचनेन शब्दप्रधानवाङ्मयं शास्त्रमर्थप्रधानवाङ्मयमितिहासः, अभिधाप्रधानवाङ्मयं काव्यम्; इत्येवं त्रिविधं वाङ्मयं ख्यापितम्। किन्तु शास्त्रकाव्ययोरितिहासकाव्ययोः शास्त्रेतिहासकाव्ययोर्मिश्रीभावे च तदुभयप्राधान्यं त्रिविधमन्यदपि वाङ्मयं स्थापितम्। तच्च शब्दाभिधोभयप्राधान्यं शास्त्रकाव्यम्, अर्थाभिधोभयप्राधान्यमितिहासकाव्यं शब्दार्थोभयप्राधान्यं वाङ्मयं शास्त्रेतिहासश्चेति[1]। भोजदेवेन सरस्वतीकण्ठाभरणे प्रतिपादितम्—

काव्यं शास्त्रेतिहासौ च काव्यशास्त्रं तथैव च।
काव्येतिहासः शास्त्रेतिहासस्तदपि षड्विधम्[2]॥

शास्त्रेतिहासकाव्यानां त्रयाणां मिश्रीभावे तु शब्दर्थाभिधानानां तिसृणां प्राधान्यं भवति, किन्त्वेवंविधं काव्यकर्त्तृत्वं न सर्वस्य भवति। यथा चोक्तमग्निपुराणे—

नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा।
कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा॥
व्युत्पत्तिर्दुर्लभा तत्र विवेकस्तत्र दुर्लभः।

इह लोके जायमानेषु प्राणिषु मानवस्य जन्म दुर्लभमस्ति, यदि च पुण्येन मानवजात्यां जन्मापि भवेत् तत्र विद्या दुर्लभा भवति। यदि च कश्चिन्मानवः बहुपुण्येन विद्यावानपि भवति, तत्र विद्यावतां कवित्वं काव्यरचनाकर्त्तृत्वमतीव दुर्लभम्। यदि वा कश्चिन्नरः पुण्यवशात् कविरपि भवति, तदा तत्र शक्तिरतिदुर्लभा। यदि च कश्चिन्नरो विद्यावान् कविः शक्तिमान् व्युत्पन्नश्चापि भवति, तत्र विवेकस्त्वतीव दुर्लभोऽस्ति। यतोहि नहि सर्वे नराः सर्वाणि शास्त्राणि जानन्ति, कश्चित्तु किञ्चित्। सर्वं शास्त्रमविद्वद्भिर्नरैः किञ्चिच्छास्त्रं विद्वद्भिर्वा विवेको न लभ्यते। तस्माद्विवेकोऽतिदुर्लभः। विद्याव्युत्पत्तिशक्तिविवेकवांस्तु कविर्भवति। तस्मात् कवित्वमतिदुर्लभम्[3]। मम्मटेनापि त्रयाणां समुदितो हेतुः प्रतिपादितः। यतश्च काव्यस्य निर्माणे ते व्यस्ता न हेतवः। मम्मटाचार्यः शक्तिर्व्युत्पत्तिरभ्यासः

१. सरस्वतीकण्ठाभरणम्; २. अग्निपुराणम्—३३७।३-४।
३. तत्रैव—(काव्यप्रभावृत्ति०) ३३७।२।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(विवेक:) एतत् त्रितयं काव्यस्योद्भवे निर्माणे हेतुत्वेन मन्यते । तस्य मते शक्तिः— कवित्वबीजरूपसंस्कारविशेषः । यां शक्तिं विना काव्यं न प्रसरेत्, न जायेत । प्रसृतं वा उपहसनीयं स्यात् । शास्त्रादिविमर्शनाद् व्युत्पत्तिः । काव्यज्ञशिक्षाभ्यास इति त्रयो मिलिता हेतुः, न तु व्यस्ता इति[1]। एवं च दण्डचक्रादिन्यायेन शक्ति-व्युत्पत्तिविवेकाश्च त्रयः समुदिताः काव्यनिर्माणे हेतुरिति। एवं शक्तिव्युत्पत्ति-विवेकवांस्तु कविर्भवति । तस्मात् कवित्वं दुर्लभमिति ।

एवं शस्त्रेतिहासकाव्यरूपेषु वाङ्मयेषु वर्णपदवाक्यादीनां निरूपणं कृत्वा शास्त्रेतिहासाभ्यां भिन्नं वाङ्मयं काव्यम् । तच्च कवेरिष्टार्थव्यवच्छिन्ना-भिधाप्रधानवाङ्मयं काव्यमिति सामान्यलक्षणम् । विशेषलक्षणमित्थम्—

काव्यं स्फुरदलङ्कारं गुणवद्दोषवर्जितम्[2] ।

तत्रेष्टार्थव्यवच्छिन्ना पदावलीति वाक्यम् । अभिधाप्रधानवाङ्मयं यत् स्फुरदलङ्कारगुणवद्दोषवर्जितं च भवति, तद् श्रेष्ठं काव्यम् । निरलङ्कारं गुणहीनं दोषवच्च यद् वाङ्मयं काव्यं तन्न श्रेष्ठं काव्यं भवति, न त्वकाव्यम्[3] । यथा चोक्तम्—

अङ्गहीनो नरो यद्वन्न श्रेष्ठः काव्यमेव तत् ।
गुणालङ्कारहीनं न श्रेष्ठं तत् काव्यमित्यतः[4] ॥

यथा हस्तपादाद्यङ्गहीनो नरो न श्रेष्ठः स्यात्, तद्वद्गुणालङ्काराद्यङ्गहीनं काव्यं न श्रेष्ठमिति । यथा च वक्ष्यते—

काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते[5] ।

इतिवृत्तसमाप्तिमद्वाक्यात्मकं वाङ्मयं शास्त्रेतिहासभिन्नमभिधाप्रधानं काव्यं स्फुरदलङ्कारगुणवद्दोषवर्जितं श्रेष्ठमुक्तम् । तत्र काव्यस्य शोभाकरा ये धर्मास्तानलङ्कारान् प्रचक्षते कवयः ।

ननु लोके यथाऽलङ्कार्यात् पृथगलङ्कारा दृश्यन्ते कुण्डलादयः, तथेह वाक्यात्मकात् काव्यात् किं पृथगलङ्कारा भवन्ति ? इत्यत आह—लोके हि सहजा धर्मा अङ्गसमुदायस्य शरीरस्य सहजमणिकवचकुण्डलादिप्रत्यङ्गवच्छब्दार्थ-समुदायस्य वाङ्मयस्य काव्यस्य सहजप्रत्यङ्गानि न तु कुण्डलकटकादिवत् पृथगिति[6] ।

सुभङ्गकरणोऽर्थानामर्थालङ्कार इष्यते ।
त विना शब्दसौन्दर्यमपि नास्ति मनोहरम् ॥

---

१. काव्यप्रकाशः, प्रथमोल्लासः ;
२. अग्निपुराणम्—३३७।६ ।
३. तत्रैव—(काव्यप्रभावृ०) ३३७।६ ;
४. तदेव ।
५. अग्निपुराणम्—३४३।१ ;
६. तदेव (काव्यप्रभावृ०) ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अर्थालङ्काररहिता विधवेव सरस्वती[१]।

काव्यस्य शोभाकरो यो धर्मः पुनरर्थानां सुभगङ्करणो भवति, सोऽर्थालङ्कार इत्युक्तमग्निपुराणे।

ननु शब्दालङ्कारेण किं काव्यं न सुभगभाक् भवति ? इत्यत आह– अर्थालङ्कारं विना शब्दालङ्कारेणालङ्कृतस्य काव्यस्य शब्दसौन्दर्यं सदपि न मनोहरो भवति। अर्थानां सौभाग्ये शब्दालङ्कारो मनोहरो भवतीति शब्दालङ्कारार्थालङ्कारयोर्भेदः। यथा विधवा नारी पतिभूषणरहिता विविधालङ्कारैरलङ्कृतापि न मनोहरा भवति, तथा काव्यवाङ्मयी सरस्वती शब्दालङ्कारभूषिताऽप्यर्थालङ्काररहिता न मनोहरा भवति[२]।

ननु यदि काव्यस्योत्कर्षोऽर्थालङ्कारेणैव भवति, तर्हि गुणोपदेशस्य किं प्रयोजनम् ? इत्यत आह––

अलङ्कृतमपि प्रीत्यै न काव्यं निर्गुणं भवेत्।
वपुष्यलङ्कृते स्त्रीणां हारो भारायते परम्[३]॥

काव्यमलङ्कारेण शोभितमपि निर्गुणं चेत्, तदा प्रीत्यै न भवेत्। यथा निर्गुणानां नारीणां हारेण वपुषि अलङ्कृतेऽपि स हारः परं भारायते, न तु प्रीत्यै सुखाय भवेत्। अत्र नारीणां निर्गुणत्वं न केवलं शरीरगुणराहित्यमपित्वात्मनो गुणराहित्यमपि बोध्यम्। सुशीलसुबुद्धीत्यादिगुणशीलानामपि कुत्सितवपुषां नारीणामपि हारो भारायते। अतः आत्मनः शरीरगुणहीनानां नारीणां हारेण वपुष्यलङ्कृतेऽपि स हारः परं भारायते[४]। एवं गुणस्योपादेयत्वं प्रतिपादितं काव्ये।

उद्वेगजनको दोषः सभ्यानां स च सप्तधा[५]।

सभ्यानां सहृदयानां वा ज्ञानवतामज्ञानवतां वोद्वेगजनको धर्मः काव्यस्य दोष उच्यते। एवं स्फुरदलङ्कारं गुणवद्दोषवर्जितं काव्यं श्रेष्ठं भवति। ततः सगुणौ सालङ्कारौ निर्दोषौ चार्थशब्दौ न्यस्तावेव काव्यम्। ततो मम्मटेनोक्तम्— त्रिविधमुत्तमं मध्यममधमं चेति। तत्र वाच्यार्थातिशयितव्यङ्ग्योऽर्थो ध्वनिः काव्यमुत्तमम्। व्यङ्ग्यार्थहीनं गुणीभूतव्यङ्ग्योऽर्थो मध्यमं काव्यम्। अर्थचित्रमव्यङ्ग्यं शब्दचित्रमव्यङ्ग्यं चाधमं काव्यम्। तन्मम्मटादिभिरुक्तं न युक्तम्। यतो ह्याख्यायिकादिषु महाकाव्यादिषु चम्पूनाटकादिषु चैकैऽस्मिन् काव्ये ह्यारम्भपरिसमाप्तिपर्यन्ते वाच्यार्थादतिशयितव्यङ्ग्यार्थासम्भवादुत्तमं काव्यं न सम्भवेत्। तथा मध्यमाधमकाव्यमपि न सम्भवति। स्फुरन् स्पष्टीभवन्नलङ्कारो यत्र तत् स्फुरदलङ्कारं न त्वस्फुटालङ्कारम्[६]।

---

१. अ० पु०—३४४।१ ; २. तदेव—(काव्यप्रभा वृ०) ; ३. तत्रैव—३४६।१। ४. तदेव (काव्यप्रभावृ०) ; ५. तदेव ३४७।१ ; ६. तदेव— (काव्यप्रभावृ०)।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तत्रालङ्कारेष्वभिव्यक्तिर्नामोभयालङ्कार उक्तः। स च द्विधा—श्रुतिराक्षेपश्च। श्रुतिरपि द्विधा—मुख्या औपचारिकी च। मुख्या त्वभिधा नाम शक्तिः। सा तु सर्वेषु शब्देष्वेव वर्तते। तस्मान्नास्ति वाक्यं निरलङ्कारम्। सर्वं वाक्यं सालङ्कारम्। यच्चास्फुटालङ्कारं तन्न श्रेष्ठं काव्यम्[1]।

यथा—

हंसो हरिर्गौरमृतं प्रदीव्यति कविर्बुधः।
पयोधराच्युतं क्षीरं पीयतेऽखिलमीप्सुभिः[2] ॥

अत्र नानार्थत्वाच्छब्दानामस्फुटेवाऽभिधा। तस्मान्न काव्यमिदं श्रेष्ठम्। एवं निर्गुणमपि काव्यं भवति, किन्तु गुणवदिति विशेषणेन किम्? उक्तम्—के गुणाः कतिविधाश्च इत्येतद् वक्तुं गुणवदिति विशेषणं दत्तम्। अत्र च गुणाभावो दोषः, यतो हि सर्वं काव्यं गुणवत्। तदभावे के दोषाः कतिविधाश्चेति वक्तुं दोषवर्जितमिति विशेषणम्। एवं गुण्यलङ्कारदोषा इहाभिधेया इति ख्यापितम्। तथा च विद्याव्युत्पत्तिविवेकमता पुरुषेण इष्टार्थयुतवाक्यरचनाशक्तिमता कविना कृतं स्फुरदलङ्कारं गुणवद् दोषवर्जितमाख्यायिकादिकाव्यमुत्तमम्। तथाविधशक्तिमांश्च कविरिति।

यत्तु विश्वनाथेन रसात्मकं वाक्यं काव्यमुक्तं तन्न युक्तम्। यतो हि सर्वेषां वाक्यानां न ह्यात्मा रस एव। यदि सर्वेषां काव्यानां रसात्मकत्वं स्वीक्रियते तर्हि नीरसकाव्यस्य काव्यत्वं न स्यात्। यदि चोच्यते नास्ति नीरसं काव्यमिति, तदा तु दुष्कराख्यशब्दालङ्कारे काव्यत्वं न स्यात्। ततो हि दुष्करालङ्कारमपि काव्यमुच्यते—

दुःखेन कृतमत्यर्थं कविसामर्थ्यसूचकम्।
दुष्करं नीरसत्वेऽपि विदग्धानां महोत्सवम्[3] ॥

यत् काव्यं कविनाऽत्यर्थं दुःखेन कृतं भवति, तत् कविसामर्थ्यसूचकं भवति। तद् दुष्करं नाम शब्दालङ्कारः। तच्च काव्यं नीरसत्वेऽपि विदग्धानां पण्डितानां महोत्सवं महत्सुखदायकं भवति। यथा—

नयनानन्दजनने भवने गृहशालिनि।
अघने गगने दृष्टिरङ्गने दीयतां सकृत्[4] ॥

अत्र नीरसत्वेऽपि नियमदुष्करालङ्कारस्य सत्त्वात् काव्यत्वं न विहन्यते। यतश्चात्र कवेर्वर्णनियमेन नकारस्य प्रतिपादे तृतीयाक्षरे वर्णनं विद्यते। एवमन्य-

१. अग्निपु० ; २. तदेव ; ३. तत्रैव—३४४।५७।
४. तदेव (काव्यप्रभावृ०)।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

त्रापि दुष्करभेदे बन्धकाव्ये काव्यत्वं भवत्येवातो नीरसं काव्यं कथं काव्यं स्यादिति तन्न विश्वनाथोक्तं काव्यलक्षणं साधु ।

एवञ्चाग्निपुराणस्य काव्यलक्षणमिदं परवर्त्तीनि सर्वाणि काव्यलक्षणानि क्रोडीकरोति । भोजदेवेनाग्निपुराणस्य काव्यलक्षणं तथैव गृहीतम्, किन्तु तेन स्वकाव्यलक्षणे रसस्यापि सन्निवेशः कृतः—

निर्दोषं गुणवत्काव्यमलङ्कारैरलङ्कृतम् ।
रसान्वितं कविः कुर्वन् प्रीतिं कीर्तिश्च विन्दति[1] ।।

किन्त्वग्निपुराणस्य काव्यलक्षणे रसचर्चा नास्ति । यद्यपि तत्र रसानां विवेचनं विस्तरेण कृतं विद्यते । वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितमित्यपि वचनमुक्तम् । किन्त्वग्निपुराणे काव्यं तु वाङ्मयबोधकं वाङ्मयस्यैको भेदः । तत्र च वाङ्मयदृष्ट्या रसस्यात्मतत्त्वं न साधितं यतो हि वाङ्मये रसत्वं भवतु न वा वाङ्मयं तु भवत्येव । महाकाव्ये तु रसो भवतु इति तत्रोक्तमन्यत्र वाङ्मये न काचिद्विप्रतिपत्तिः । यतो हि काव्यस्य शरीरं वाङ्मयं तस्यात्माऽर्थः । न केवलं रस आत्मा बन्धकाव्ये नीरसत्वादनात्मप्रसङ्गादिति ।

एवं चाग्निपुराणानुसारं काव्यं सर्वथा दोषवर्जितमभिधेयार्थसंयुक्तं समस्तमेव वाङ्मयं काव्यं भवति, न तु व्यस्तम् । केवलमलङ्कारयुतं गुणयुतं दोषरहितमभिधेयं च वाङ्मयं काव्यं न भवति ।

एवंविधस्य काव्यस्य कारणं किमित्युच्यते--'योनिर्वेदश्च लोकश्च सिद्धमर्थादयोनिजम्' । काव्यमिदमर्थदृष्ट्या अयोनिजमपि काव्यस्यास्य योनिः (कारणंप्रकाशस्थानम्) लोको वेदश्च । वेदे च काव्यं सिद्धमयोनिजं नित्यमिति, लोके तु कविनिष्पाद्यं भवति ।

कवीनामाचारः समयो नामेति प्रसिद्धं लोके वेदे चेति । कवेः कर्म काव्यम् । समयो नियमकरणादस्य शब्दस्येदमर्थं जातमिति नियमः । स च समयः सामान्य-विशिष्टभेदेन द्विविधो भवति । सामान्यः समयोऽपि द्विविधः—सर्वे सिद्धान्तवादिनः कवयो येन समयेन सदा सञ्चरन्ति, स सर्वसैद्धान्तिकाचारः सामान्यः समयः, येन समयेन कियन्तः (केचन) सैद्धान्तिकाः सञ्चरन्ति, स कियत्सैद्धान्तिकाचारः सामान्यः समयः । यथा वा (शास्त्रे) सर्वे सिद्धान्तवादिनः कथयन्ति— इह खलु सर्वं पाञ्चभौतिकम् इति सामान्यः समयः । कियन्तस्तु कथयन्ति अचेतनं सर्वं पाञ्चभौतिकं चेतनस्तु नवद्रव्यात्मकमित्यपरः सामान्यः समयः[2] ।

विशिष्टसमयस्तु छेदसिद्धान्तनाम्ना प्रथितः । तत्र यथा कस्यचिन्मुनेः समयस्तर्कप्रमाणम्, कस्यचिन्मुनेः क्षणभङ्गुरः, सर्वं हि विश्वं क्षणभङ्गुरम्, तस्य

१. सरस्वतीकण्ठाभरणम्—१।१ ; २. अग्निपुराणम्—(काव्यप्रभावृ०) ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मते कालोऽविरतमत्ययमापद्यते कुलालचक्रवद् भ्रमति। तथैव सर्वं विश्वं प्रतिक्षणं पूर्वावस्थानुभूतामुत्तरावस्थां प्राप्य पूर्वावस्थाभङ्गमाप्नोति। कस्यचिन्मुनेर्नास्ति कस्य मते चेतनानां भूतकृतचैतन्यमिति भ्रान्तितासमयः। कस्यचिन्मुनेर्मतम्—सर्वं स्वप्रकाशं ज्ञानं ज्योतिर्विद्। कस्यचिन्मुनेराचारः सिद्धान्तः—पुरुषे यः लिङ्गशरीरी, तस्य स्थूलता स एवायं स्थूलपुरुषः। कस्यचिन्मुनेः समयः शब्दा अनेकान्ताः, क्वचिन्नित्यः, क्वचिदनित्यः। नित्यः शब्द आकाशेऽनित्यो वाय्वादिषु चतुर्षु भूतेषु। तत्र यो हि शब्दोऽभिघाताद्युपादानतः उत्पद्यते, स श्रवणार्थः शब्दोऽनित्यः। यस्तूपादानस्यातिसूक्ष्मत्वान्न श्रवणग्राह्यः, स नित्यः शब्दः। एवमेवं शैवशाक्त-वैष्णवसौर-सांख्यादिसैद्धान्तिकानां समयस्तत्तत्सिद्धान्तानुसारिणः[1]।

अस्मिन् सरस्वतीलोके वाङ्मयतार्किकादयः सैद्धान्तिकः परस्परं विपर्य्ययं पश्यन्तो यद्द्वद्वं कुर्वन्ति, स विशिष्टः समयः। तद् द्वैविध्यं यथा—असतां भावानां परिग्रहादेको विशिष्टः समयः। सतां भावानां परिग्रहादपरो विशिष्टः समयः। तत्र प्रत्यक्षादिप्रमाणैर्यत् साधितं तत्सत्, प्रत्यक्षादिप्रमाणैश्च यद् बाधितं तदसत्। कविभिर्यद् ग्राह्यं तत् विशिष्टं सत्। तदेवार्थक्रियाकारित्वात्परमार्थसदुच्यते। तत्परमार्थसद् ब्रह्म, परमात्मा शिवो विष्णुरित्यादिनाम्ना व्यवह्रियते। स एव सर्वं वेषणाद् विष्णुः, परमव्योमरूपः शिवः शब्दालङ्कारूपवान् बभूव[2]। विष्णु-पुराणेऽपि विष्णुः शब्दरूप उक्तः। समस्तं काव्यं समस्तानि गीतकानि शब्दमूर्त्ति-धरस्य विष्णोरंशा प्रकीर्त्तिता—

काव्यालापांश्च ये केचिद्गीतकान्यखिलानि च।
शब्दमूर्त्तिधरस्यैते विष्णोरंशा महात्मनः॥

एवञ्चालङ्कारगुणयुतं दोषवर्जितं शब्दार्थाभिधाप्राधान्यं वाङ्मयं काव्य-मुच्यते शब्दप्राधान्यं वाङ्मयं शास्त्रमर्थप्राधान्यं वाङ्मयमितिहास इत्येवं त्रिधा वाङ्मयम्। एवं च ध्वनिवर्णपदवाक्यात्मकं वाङ्मयमुच्यते।

●

---

१. अग्निपुराणम्—(काव्यप्रभाव०); २. तत्रैव।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

न्यायदर्शनदिशा प्रत्यभिज्ञाविमर्शः

डॉ० सुधाकरदीक्षितः
प्राध्यापकः, न्यायवैशेषिकविभागे
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी

❀ ❀ ❀

प्रत्यभिज्ञा हि ज्ञानविशेषः। ज्ञानश्चात्मनो विशेषगुणः, अस्य लक्षणं 'सर्वव्यवहारहेतुर्गुण' इति। एतेनेदं स्पष्टम्—स एव गुणो ज्ञानम्, यः सर्वस्यापि व्यवहारस्यासाधारणकारणम्। युक्तमिदम्; सांसारिकः सर्वोऽपि व्यवहारः यत्किञ्चिद्वस्तुसम्बद्ध एव भवति, तेन हि व्यवहार्यस्य वस्तुनो ज्ञानं विना नायं प्रवर्तत इति। अत्र व्यवहारशब्दः शब्दव्यवहारमात्रपर इत्यपि केषाञ्चिदभिमतम्। तथा सति शब्दप्रयोगात्मकव्यवहारासाधारणकारणस्य गुणस्य ज्ञानमित्याख्येति ते मन्यन्ते। इदमपि सम्यक्। अर्थं बुद्ध्वा शब्दमुच्चारयतीति न्यायेन यदर्थविषयको बोधो यस्यास्ते, स एव तदर्थप्रतिपादनपरं पदमुच्चारयतीति दिशा तत्तदर्थपरशब्द-प्रयोगात्मको व्यवहारस्तत्तदर्थविषयकबोधासाधारणकारणक इति निर्विवादम्। तेन च ज्ञानं प्रमितं भवति।

अत्र केचनेत्थं ब्रुवते—ज्ञानस्येदं लक्षणं निर्विकल्पकज्ञानेऽव्याप्तम्, तस्य व्यवहारायोग्यत्वस्य स्पष्टत्वात्। अतः 'अर्थविषयकः प्रकाशः' इति ज्ञानस्य लक्षणं स्वीकार्यम्। एवं सति सः प्रकाशो ज्ञानम्, यो भवत्यर्थविषयक इति स्फुटम्। 'प्रकाशः' इत्येतावन्मात्रं तु लक्षणं न युक्तम्, तेजोनामकद्रव्यस्यापि प्रकाशपदाभि-धेयतया तत्र ज्ञानलक्षणस्यातिव्याप्तिप्रसङ्गात्। 'अर्थः' इत्येतदपि न लक्षणं सम्भवति ज्ञानस्य; अर्थपदस्य वस्तुमात्रपरतया वस्तुमात्रस्य ज्ञानत्वापत्त्याऽति-व्याप्तिस्तादवस्थ्यात्। 'अर्थविषयकः प्रकाशः' इति लक्षणं तु निर्दुष्टम्। तेजो नास्ति सविषयकः पदार्थस्तेन तत्र नेदं लक्षणमतिव्याप्तं भवति।

ज्ञानमिदं स्मृत्यनुभवभेदेन द्विप्रकारम्। तत्र स्मृतिः ज्ञानमात्रविषयकं ज्ञानम्। तद्भिन्नं ज्ञानमनुभवः। अनुभावात्मकं ज्ञानं प्रमाणव्यापारानन्तरमेवोपप-द्यते। अत एवानुभवपदेनास्य व्यपदेशः। अनु=अनन्तरं—प्रमाणव्यापारानन्तरं भवतीत्यनुभवः। अनुभवोऽयं प्रत्यक्षानुमित्युपमितिशाब्दबोधभेदेन चतुर्धा। प्रत्यक्षं प्रमाणस्येन्द्रियस्य सन्निकर्षात्मकव्यापारानन्तरमेवोत्पद्यते। अनुमितिः प्रमाणस्य व्याप्तिज्ञानस्य परामर्शात्मकव्यापारानन्तरमेव जायते। उपमितिः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सादृश्यज्ञानात्मकस्योपमानप्रमाणस्यातिदेशवाक्यार्थस्मरणात्मकव्यापारानन्तरमेव जनिं लभते । शाब्दबोधश्च पदज्ञानस्य शब्दप्रमाणस्य पदार्थोपस्थित्यात्मकव्यापारानन्तरमेवास्तित्वं भजते । अत एवैषामनुभवेत्यभिधानमन्वर्थमेव ।

स्मृतिर्हि स्वोत्पत्तौ प्रमाणव्यापारं नापेक्षते । सा पूर्वानुभूतविषयकसंस्कारमपेक्ष्योत्पद्यते । तेन नानुभवपदव्यपदेश्या सा भवति । स्मृतेरनुभवपदानभिधेयत्वे हेत्वन्तरमपि न्यायविदो वदन्ति । तदिदम्--अनुभवामीति मानसप्रत्यक्षबलेन अनुभवत्वजातिः सिद्ध्यति । प्रत्यक्षानुमित्युपमितिशाब्दबोधानन्तरमनुभवामीति मानसप्रत्यक्षं सर्वस्य भवति, तेन प्रत्यक्षानुमित्यादौ स्वीक्रियतेऽनुभवत्वजातिः, तत्पुरस्कारेण प्रत्यक्षादिषूपपद्यते चानुभवपदव्यवहारः । स्मृत्यनन्तरं तु 'अनुभवामि' इति मानषप्रत्यक्षं न कस्यापि भवति, स्मरामीत्येव मानसप्रत्यक्षं समेषामभिमतम् । अत एव स्मृतौ नास्त्यनुभवत्वजातिरिति स्पष्टम् । तेन नेयमनुभवपदेन व्यवह्रियते ।

इयं हि स्मृतिः ज्ञातमात्रविषयकं ज्ञानमिति लक्षणेन लक्ष्यत इत्यनुपदमवोचाम। एतेन स्मृतिः ज्ञातमात्रविषयिकैवेति व्यक्तम् । नेयमभिनवं किञ्चित् प्रकाशयति—विषयीकरोति; किन्तु पूर्वानुभूतमेव विषयं प्रकाशयति। अत्रायं प्रकारः—यो विषयोऽनुभूयते, तस्य संस्कार आत्मनि नूनमुत्पद्यते। अयमेव संस्कारः कदाचिदुद्बोधकमहिम्नोद्बुद्धः सन् स्वविषयं स्मारयति। अत एव संस्कारमात्रजन्यं ज्ञानं स्मृतिरित्यपि स्मृतिलक्षणं प्रथितम् । अत्र मात्रपदेनेन्द्रियं व्यावर्त्यते, न त्वन्यत् । अत एव 'इन्द्रियाजन्यं संस्कारजन्यं ज्ञानं स्मृतिरिति लक्षणं पर्यवस्यति । मात्रपदेन संस्कारातिरिक्तानां समेषां कारणत्वेन प्रसक्तानां पदार्थानां व्यावृत्तेर्विवक्षायां तु संस्कारेतराजन्यत्वे सति संस्कारजन्यं ज्ञानं स्मृतिरिति लक्षणं स्यात्, तच्चासम्भवदोषदुष्टं भवेदेव, संस्कारातिरिक्तेनात्मना, मनसाऽऽत्ममनःसंयोगादिना च स्मृतेर्जायमानतया तस्यां संस्कारेतराजन्यत्वघटितलक्षणसमन्वयासम्भवात् ।

यदिदं स्मृतिलक्षणं 'ज्ञातमात्रविषयकज्ञानत्वम्', 'संस्कारमात्रजन्यज्ञानत्वम्' वा, तत्र मात्रपदनिवेशप्रयोजनं किमिति चिन्तायां प्रत्यभिज्ञायामतिव्याप्तिवारणाय तदित्युच्यते । प्रति=आभिमुख्येन ज्ञानं परिचयात्मकं ज्ञानं प्रत्यभिज्ञा । अत एव 'स एवायं चैत्रः' इति प्रतिसन्धानेनाभिमुखीभूते वस्तुनि ज्ञानं प्रत्यभिज्ञेति लोके व्यवह्रियते । इदं ज्ञानं प्रत्यक्षविशेष एव । पूर्वदृष्टश्चैत्रो यदा चक्षुःसन्निकृष्टो भवति, तदा यथा 'अयं चैत्रः' इत्येवं प्रत्यक्षं प्रायो जायते, तथैव 'स एवायं चैत्रः' इत्येवमपि प्रत्यक्षमनुभवसिद्धं समेषाम् । अत्र प्रत्यक्षे यथा चैत्रे चैत्रत्वं इदन्त्वञ्च चक्षुःसन्निकर्षमहिम्ना प्रत्यक्षमेव भासेते, तथैव पूर्वदृष्टताऽपि भासते; परमस्याः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पूर्वदृष्टताया भाने पूर्वदृष्टताविषयक उद्बुद्धः संस्कार एव हेतुः। संस्कारश्चायं चैत्रस्य पूर्वदर्शनानन्तरमात्मनि समुदपद्यत। संस्कारस्यास्यास्वीकारे पूरोवर्तिनि चैत्रे पूर्वदृष्टतायास्तत्तापरपर्यायाया भानमसम्भवि। अत एव प्रत्यभिज्ञेयं संस्कारजन्येति स्पष्टम्। एवं सति पूर्वोक्तयोः स्मृतिलक्षणयोः मात्रपदाप्रवेशे संस्कारजन्यायां प्रत्यभिज्ञायामतिव्याप्तिः सम्भवति; प्रत्यभिज्ञाकुक्षिप्रविष्टस्य 'अयं चैत्रः' इति प्रत्यक्षस्येन्द्रियजन्यतया प्रत्यभिज्ञायाः संस्कारमात्रजन्यत्वाभावात्।

अत्रैवं बहवो वदन्ति—प्रत्यभिज्ञा हि स्मृतिसहचरितं प्रत्यक्षात्मकं ज्ञानम्। इयं 'स एव' इत्यंशे स्मृतिः, 'अयं चैत्रः' इत्यंशे प्रत्यक्षम्। तथा च प्रत्यभिज्ञायाः स्मृतित्वस्येष्टतयाऽनुपदमुद्धृते स्मृतिलक्षणे मात्रपदनिवेशो व्यर्थ इति। परमिदं नानुमन्यते नैयायिकैः। ते हि एवं प्रत्यवतिष्ठन्ते—प्रत्यक्षात्मिकायाः प्रत्यभिज्ञाया अंशतः स्मृतित्वं स्वीकृत्य स्मृतिलक्षणलक्ष्यत्वं नाभ्युपेयम्, साङ्कर्यं जातित्वबाधकमिति प्राच्यनैयायिकाः। परस्परात्यन्ताभावसमानाधिकरणधर्मयोरेकत्र समावेशः साङ्कर्यम्।

अत्र द्वौ धर्मौ-अनुभवत्वम्, स्मृतित्वञ्च। उभावपि परस्परात्यन्ताभावसमानाधिकरणौ एकत्र समाविष्टौ च। तथा हि अनुभवत्वाभावाधिकरणे घटपटादिविषयकस्मरणे स्मृतित्वम्, स्मृतित्वाभावाधिकरणे 'अयं घटः' इत्यादि प्रत्यक्षेऽनुभवत्वम्। पुनरनयोः अनुभवत्वस्मृतित्वयोरेकत्र प्रत्यभिज्ञायां समावेश इति। एवञ्चानुभवत्वस्मृतित्वयोः साङ्कर्यग्रस्ततया जातित्वमुभयोः बाध्येत। किं वा स्मरणकारणीभूतेऽनुभवेऽनुभवामीति मानसप्रत्यक्षबलेन सिद्धयाऽनुभवत्वजात्या सह साङ्कर्यात् स्मृतित्वस्य जातित्वं विलुप्येत, तच्च नेष्टं नैयायिकानाम्।

साङ्कर्यस्य जातित्वबाधकत्वे स्वसामानाधिकरण्य-स्वाभावसामानाधिकरण्यैतदुभयसम्बन्धेन यज्जातिविशिष्टजातित्वं यत्र तत्र तज्जातिव्यापकत्वमिति नियमस्य भङ्ग एव बीजम्। नियमश्चायं दृष्टः पृथिवीत्वव्यापके द्रव्यत्वे। स्वं पृथिवीत्वम्, तदधिकरणं घटादिस्तत्र द्रव्यत्वस्य वृत्तितया स्वसामानाधिकरण्यं द्रव्यत्वे स्थितम्। एवं स्वं पृथिवीत्वम्, तस्याभावः पृथिवीत्वाभावस्तदधिकरणं जलादिस्तद्वृत्तित्वस्य द्रव्यत्वे सत्वेन स्वाभावसामानाधिकरण्यमपि तत्रोपपन्नम्। तेन च सम्बन्धाभ्यामाभ्यां पृथिवीत्वजातिविशिष्टत्वं द्रव्यत्वजातौ विद्यते, तत्र पृथिवीत्वजातिव्यापकत्वमपि सर्वानुमतम्, यत्र यत्र पृथिवीत्वं तत्र तत्र द्रव्यत्वस्यावश्यं सद्भावात्। साङ्कर्यस्य जातित्वबाधकत्वाभावे नियमोऽयं भज्येत। तथा हि—पृथिव्यप्तेजोवायुमनःसु विद्यमानेन क्रियासमवायिकारणतावच्छेदकतया सिद्धजातिभावेन मूर्तत्वेन सह पृथिव्यप्तेजोवाय्वाकाशेषु विद्यमानस्य भूतत्वस्य साङ्कर्यन्तु निर्विवादम्, भूतत्वाभाववति मनसि विद्यमानस्य मूर्तत्वस्य मूर्तत्वा-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भाववति नभसि विद्यमानस्य भूतत्वस्य च पृथिव्यादिचतुष्टये समावेशात् । तथापि भूतत्वं यदि जातिस्तर्हि मूर्तत्वजातिविशिष्टजातित्वस्य पूर्वोक्तोभयसम्बन्धेन भूतत्वेऽनपायात् तत्र मूर्तत्वजातिव्यापकत्वं स्यादेव; परं तन्नास्ति मूर्तत्ववति मनसि, भूतत्वस्याभावात् ।

अत्र नव्यनैयायिकमतमाश्रित्यैवं वक्तुं शक्यम्—साङ्कर्यं न जातित्वबाधकम् । उपर्युक्तनियमस्तु व्याप्तिग्रहकानुकूलतर्काभावेनोपेक्ष्यः । यत्र यत्र स्वसामानाधिकरण्य-स्वभावासामानाधिकरण्यैतदुभयसम्बन्धेन यज्जातिविशिष्टजातित्वम्, तत्र तत्र तज्जातिव्यापकत्वमिति नियमो यज्जातिविशिष्टजातित्वेन हेतुना तज्जातिव्यापकत्वसाधने पर्यवस्यति । अत्र यदि व्यभिचार आशङ्क्यते निरुक्तोभयसम्बन्धेन यज्जातिविशिष्टजातित्वमिति हेतुः, अस्तु तज्जातिव्यापकत्वमिति साध्यं मास्तु, तर्हि न कोऽपि तादृशस्तर्क उपलभ्यते, यत्साहाय्येन व्यभिचारशङ्केयं निवर्तेत । यज्जातिविशिष्टजातित्वं यदि तज्जातिव्यापकत्वव्यभिचारि स्यात्तर्हि सोपाधि स्यात्, यतो न सोपाध्यतो न व्यभिचारीति तर्कस्तु न परीक्षाक्षमः, पक्षेतरत्वस्योपाधेः जागरूकत्वात् ।

प्रकृते पक्षत्वेनाभिमतं भूतत्वम् । साङ्कर्यस्य जातित्वबाधकत्वाभावे तत्रैव निरुक्तोभयसम्बन्धेन मूर्तत्वजातिविशिष्टजातित्वस्य हेतोरधिकरणे यज्जातिपदेनोपात्ताया मूर्तत्वजातेः व्यापकत्वस्याभावेन व्यभिचार आशङ्क्यतेऽतो भूतत्वात्मकपक्षेतरत्वमेवोपाधिः । अस्य तज्जातिव्यापकत्वरूपसाध्याभिमतव्यापकत्वमक्षतम्, यत्र यत्र द्रव्यत्वादौ पृथिवीत्वादिजातिव्यापकत्वमस्ति, तत्र तत्र भूतत्वेतरत्वरूपपक्षेतरत्वस्य सत्त्वात् । एवं साधनत्वेनाभिमताव्यापकत्वमपि, मूर्तत्वजातिविशिष्टजातित्वस्य साधनत्वेनाभिमतस्याधिकरणे भूतत्वे तदितरत्वात्मकपक्षेतरत्वस्योपाधेरसत्त्वात् । एवञ्च प्रस्तुतस्थले प्रत्यभिज्ञान्तर्भावेणानुभवत्वेन सह स्मृतित्वं साङ्कर्यग्रस्तं सदपि न जातित्वं मुञ्चत्यतः स्वीक्रियताम् प्रत्यभिज्ञायाः स्मृतिसहचरितप्रत्यक्षात्मकत्वमिति तु न परीक्षाकोटिमाटीकते, अनुभवत्वस्मृतित्वयोः ज्ञानविभाजकत्वानुपपत्तेः । इदं स्पष्टम्—ज्ञानस्यानुभवस्मृतिरूपेण द्विधा विभागः प्रायः सर्वसम्मतः । एवं सति विभाज्यं ज्ञानम्, विभाज्यतावच्छेदको धर्मः ज्ञानत्वम्, विभाजकौ च धर्मौ-अनुभवत्वं स्मृतित्वञ्च । त एव धर्मा विभाजका भवन्ति, ये विभाज्यतावच्छेदकधर्मस्य व्याप्याः परस्परं विरुद्धाश्च । प्रकृते विभाज्यतावच्छेदकज्ञानत्वव्याप्यत्वं त्वनुभवत्वस्मृतित्वयोः सुस्थम्, परमनयोः विभाजकत्वेनाभिमतयोः परस्परविरुद्धत्वं न सम्भवति, प्रत्यभिज्ञायाः स्मृतिसहचरितप्रत्यक्षत्वाभ्युपगमे स्मृतित्वप्रत्यक्षत्वयोस्तत्र युगपत् समावेशेन प्रत्यक्षत्वव्यापकानुभवत्वस्यापि स्मृतित्वेन सह तत्र समावेशनैयत्यात् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

"अथैवं सति प्रत्यभिज्ञा किमात्मिका ? प्रत्यक्षात्मिका न भवितुमर्हति, संस्कारजन्यत्वात्, न हि प्रत्यक्षं क्वापि संस्कारजन्यं दृष्टम्। अस्तु तर्हि स्मृत्यात्मिकेत्यपि न वक्तुं योग्यम्, इन्द्रियजन्यत्वात्, न हि स्मृतेः इन्द्रियजन्यत्वमानुभविकम्" इति तु नाशङ्कनीयम्; प्रत्यभिज्ञामनु स्मरामीत्यनुव्यवसायो (मानसप्रत्यक्षः) न कस्यापि सम्मतः, 'प्रत्यक्षयामि', 'अनुभवामि' इत्यनुव्यवसायस्तु सर्वसम्प्रतिपन्नस्तेनानुभवविशेषे परिचयात्मकप्रत्यक्ष एव प्रत्यभिज्ञाया निवेशेन प्रत्यक्षात्मकत्वस्य तस्याः स्पष्टत्वात्। न किमपि प्रत्यक्षं संस्कारजन्यं दृष्टम्, अतः प्रत्यभिज्ञायाः प्रत्यक्षात्मकत्वं कथमभ्युपेयमिति चिन्तया नानेन समाधानेन तोषमेति चेतश्चेद् यथोष्णशीतस्पर्शाभ्यामतिरिक्तः कश्चन स्पर्शविशेषः 'अनुष्णाशीतः' स्वीक्रियते, तथैव प्रत्यभिज्ञाऽपि स्मरणानुभवाभ्यामतिरिक्तः कश्चन ज्ञानविशेष एव अस्मरणाननुभवात्मक इत्येवाभ्युपेयम्। एतेनेदमेव पर्यवसितं स्यात्—ज्ञानं त्रिविधम्, स्मरणमनुभवः प्रत्यभिज्ञा चेति। तत्र स्मरणं तज्ज्ञानं यत्संस्कारमात्रजन्यम्। (अत्र मात्रपदेन केवलमिन्द्रियस्य व्यावृत्तिरिति प्रागेवोक्तम्) अनुभवस्तद् यत्संस्काराजन्यम्, तज्ज्ञानञ्च प्रत्यभिज्ञा यत्संस्कारेन्द्रियोभयजन्यम्। एवं सति स्मृतिलक्षणे संस्कारमात्रजन्यज्ञानात्मके मात्रपदाप्रवेशे प्रत्यभिज्ञायामतिव्याप्तिः स्यादेव, तस्या अपि संस्कारजन्यत्वादिति तथ्यमपि स्पष्टं वेदितव्यमिति शम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अनुपलब्धेः प्रमाणान्तरत्वविमर्शः

डॉ० एन्० आर० श्रीकृष्णताताचार्यः
पूर्वमीमांसाविभागाध्यक्षचरः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी

* * *

इह खलु तत्तत्पदार्थज्ञानोपकारकतया नैयायिकाः प्रमाणचतुष्टयमङ्गीकुर्वन्ति। वैशेषिका द्विविधमिति। त्रिविधमिति रामानुजवेदान्तिनस्साङ्ख्याश्च। पञ्चविधमिति प्राभाकराः। षड्विधमिति भाट्टाः, शाङ्करवेदान्तिनश्च। तत्र अनुपलब्धेः प्रत्यक्षाद्यतिरिक्तप्रमाणत्वविषये भूयोविवाददर्शनात् तदधिकृत्य निबन्धेऽस्मिन् प्रस्तूयते।

इह भूतले घटो नास्तीति प्रतीतिरभावविषयिणी सर्वेषां जायते। इयं च प्रतीतिः निमीलिताक्षस्याभावज्ञानानुत्पत्तेः, इन्द्रियार्थसन्निकर्षे सति उत्पत्तेश्च इन्द्रियकरणिकैव; न त्वनुपलब्धिरूपप्रमाणान्तरकरणिका इति नैयायिकास्संगिरन्ते।

भाट्टमतोपन्यासः—

मीमांसका भाट्टा अनुपलब्धिरूपप्रमाणान्तरकरणिकेति। ननु व्यापृतेन्द्रिय एव हि 'इह भूतले घटो नास्तीत्यवबुद्धयते, नान्धादिः। अत ऐन्द्रियकमेव अभावज्ञानमिति चेन्न, कुत्रचित् अधिकरणे कस्यचित्पदार्थस्याभावः प्रतीयते, तेन यत्राभावः प्रत्येतव्यः, तादृशाधिकरणग्रहणाय इन्द्रियव्यापारापेक्षा नत्वभावग्रहणाय। इन्द्रियव्यापारोऽधिकरणांश एव, न त्वभावांश इति विभागः कथं ज्ञायते? उच्यते—अधिकरणग्रहणमात्रोपरतेन्द्रियव्यापारस्याप्यभावप्रतीतिदर्शनात् केनचित्पुरुषेण स्वरूपमात्रेण गृहादिकं प्रतिपन्नं, ततः स देशान्तरं गतः, तत्रैतद्देशे अविद्यमानं भावान्तरं विलक्षणं वस्तु दृष्ट्वा तदैव 'इदं वस्तु मद्गृहे नासीदित्यवबुद्धयते। तदा तस्य इन्द्रियव्यापारो नासीत्, पूर्वमेव गृहाद्यधिकरणग्रहणवेलायामेव तस्योपरतत्वात्—

स्वरूपमात्रं दृष्ट्वाऽपि पश्चात् किञ्चित् स्मरन्नपि।
तत्रान्यनास्तितां पृष्टः तदैव प्रतिपद्यते[1]॥

इति श्लोकेन अभावस्य प्रमाणान्तरत्वं स्थापितम्। इत्थं च इन्द्रियव्यापारनिरपेक्षा अभावप्रतीतिर्नैन्द्रियकी; अपि तु अनुपलब्धिरूपप्रमाणान्तरगम्यैव।

---

१. श्लो० वा० अ० परि० श्लो० २८।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अपि च इन्द्रियस्य अभावस्य च न संयोगरूपसंनिकर्षस्सम्भवति, अभावस्य अद्रव्यत्वात् 'द्रव्ययोरेव हि संयोगः' इति नियमात्। नापि विशेषणताख्यस्संनिकर्षः, तस्य सम्बन्धान्तरपूर्वकत्वात्।

किञ्च 'घटाभाववद्भूतलमिति विशिष्टबुद्धिः विशेषणज्ञानपूर्विका विशिष्टबुद्धित्वात् (विशेषणज्ञानकार्यत्वात्) दण्डीति विशिष्टबुद्धिवदित्यनेन घटाभावविशिष्टबुद्धेः विशेषणज्ञानपूर्वभावित्वनियमावश्यकता लभ्यते। भूतलरूपविशेष्यग्राहकेन्द्रियेणैव अभावरूपविशेषणमपि गृह्यत इतीन्द्रियस्य अभावांशेऽपि ग्रहणसामर्थ्यं कल्प्यत इति न वक्तुं शक्यम्, तथा सति सुरभि चन्दनमित्यत्र सौरभस्यापि चक्षुषैव ग्रहणप्रसङ्गात्। अतोऽभावरूपविशेषग्रहणाय अनुपलब्धिरूपप्रमाणान्तरसम्भवः। इन्द्रियसंनिकर्षादिसत्त्वेऽपि घटाद्युपलब्धौ सत्यां न तदभावो गृह्यत इति अनुपलब्धेः कारणत्वमवश्यं स्वीकरणीयम्। इत्थं च सैव अनुपलब्धिः अभावज्ञाने करणमिति वक्तुं युक्तम्। **"अभावोऽपि प्रमाणाभावो नास्तीत्यस्यार्थस्यासंनिकृष्टस्य[1]"** इति भगवान् भाष्यकारः (शबरस्वामी च) नास्तीति प्रतीतिविषयस्य अभावस्य प्रत्यक्षादिप्रमाणाभावरूपानुपलब्ध्याख्यप्रमाणान्तरगम्यत्वं प्राह।

वार्तिककारा अपि—

भावात्मके यथा मेये नाभावस्य प्रमाणता।
तथैवाभावमेयेऽपि न च भावप्रमाणता॥
भावात्मकस्य मानत्वं न च राजाज्ञया स्थितम्।
परिच्छेदफलत्वात्तु प्रामाण्यं स्याद् द्वयोरपि[2]॥

इत्यभावाख्यप्रमेयस्य अनुपलब्धिरूपप्रमाणान्तरगम्यत्वं न्यरूपयन्।

तथा भगवद्रामायणे—"राम षड् युक्तयो लोके याभिस्सर्वोऽनुदृश्यते[3]" इति वाल्मीकिमहर्षिणाऽप्यनुपलब्धेर्मानान्तरत्वमनुसंहितम्।

प्रभाकरमतेन अभावरूपं प्रमेयं नास्तीत्याशङ्का—

अत्र प्राभाकरा एवं प्रत्यवतिष्ठन्ते—अभावाख्यप्रमेयमेव नास्ति, यदर्थं प्रमाणान्तरकल्पनमिति। तर्हि भूतले घटो नास्तीति प्रतीतेः विषयः क इति चेत्, उच्यते, भावानां ज्ञानं द्विविधम्—एकं संसृष्टविषयमपरं तदेकविषयं चेति। तत्रापि तदेकविषयं द्विविधम्—प्रतियोगिनि दृश्येऽदृश्ये चेति। दृश्ये प्रतियोगिनि घटे यद्भूतलैकविषयं ज्ञानं तदेव भूतले घटो नास्तीति प्रतीतिविषयतया घटाभाव इत्युच्यते।

---

१. पुण्यपत्तने १९२९ वत्सरे मुद्रिते शाबरभाष्ये—पृ० सं० ३९।
२. श्लो-वा० अ० परि० श्लो० ४६, ४७।
३. रामायणे आरण्यकाण्डे—सर्गः ७२, श्लोक। ८।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अत्रायं भावः—प्राभाकरपक्षे भावातिरिक्तमभावरूपप्रमेयं किञ्चिन्नास्ति, अपि तु भावान्तररूपमेव। तथा हि घटे विद्यमानः पटत्वाभावो घटनिष्ठघटत्वजातिरूपभावान्तरमेव। एवं शुक्लरूपे विद्यमानः कार्ष्ण्याभावो शौक्ल्यरूपमेव। एवमेव सर्वत्र विद्यमानास्सर्वे अभावास्तत्र तत्र सम्भाव्यमानभावान्तरात्मका एवेति अभावरूपप्रमेयमेव नाङ्गीकुर्वन्ति। अतश्च भूतले घटो नास्तीति प्रतीतिर्नाभावविषयिणी; किन्तु भूतलैकविषयबुद्धिविषयिणीति।

ननु घटवति भूतले घटवद्भूतलमिति संसृष्टबुद्धिरुदेति। नष्टे च घटे तत्रैव घटो नास्तीति प्रतीतिर्जायते। इयं च अभावविषयिणी प्रतीतिरभावाभ्युपगमे उपपन्ना भवति, तदा ध्वंसस्य सत्त्वात्। भवत्पक्षे अभावानभ्युपगमाद् यत्र प्राक् संसृष्टबुद्धिरुदिता, तत्र तदेकविषया बुद्धिः कथमाविर्भवतीति चेत्, येन मुद्गराभिघातादिना हेतुना ध्वंसो जायते, स एव तदेकविषयबुद्धेः कारणम्। मुद्गराभिघातस्य क्षणिकत्वात् तस्य कालान्तरभावितदेकविषयबुद्धिजनकत्वं कथमिति चेत्, स मास्तु, कपालमालाद्युत्पत्तिरेव तदेकविषयबुद्धिकारणमस्तु। इत्थं च संसृष्टबुद्धिर्यत्रोदिता, तत्र तदेकविषया बुद्धिः कपालमालाद्युत्पत्तिरूपकारणसत्वे जायत इति सैव नास्तीति प्रतीतिविषया न त्वभावरूपं प्रमेयमिति। एतावता अभावरूपं प्रमेयमेव नास्तीति निरूपितम्।

प्रभाकरमतेन अनुपलब्धेः प्रमाणत्वासम्भवाशङ्का—

अथनुपलब्धेः प्रमाणत्वमेव न सम्भवतीति शङ्कते। तथाहि–अनुपलब्धेः न सत्तयाऽभावबोधजनकत्वम्, गाढान्धकारे योऽङ्गुलीयकबुभुत्सया हस्ताभ्यामपवरकदेशं सर्वतः परामृष्टवान्, तस्य तावत् सर्वदेशपरामर्शाद् वस्तुतो योग्यानुपलब्धिर्जाता। अथापि तन्मात्रेण नाङ्गुलीयकं नास्तीत्यवगम्यते। अथ च किं सर्वो देशः परामृष्टः, किं वा कश्चिद्देशोऽपरामृष्टोऽपि स्यादिति सन्दिहानो योग्यानुपलब्धेरनिश्चयात् सत्यामपि तस्यां नाङ्गुलीयकस्याभावमवधारयति। कदाचित्तु सर्वतोऽपरामृश्यापि परामृष्टमिति भ्रान्त्या योग्यानुपलब्धिं निश्चित्य असत्यामेव तस्यां भ्रान्त्याऽङ्गुलीयकस्याभावमवधारयति। तस्माद् ज्ञाततयैव योग्यानुपलब्धिरभावज्ञानकारणमित्यभ्युपगन्तव्यम्। तथासति योग्यानुपलब्धेः अभावरूपत्वात् तस्या ज्ञानं अनुपलब्ध्यन्तररूपप्रमान्तरेण, तस्या अपि ज्ञाततयैव कारणत्वात्, तज्ज्ञानमपि अनुपलब्ध्यन्तरेणेति अनवस्थाप्रसङ्गः। इत्थं च अनुपलब्धेरनवस्थारूपदोषग्रस्तत्वात् न तस्या मानान्तरत्वम्।

भूतले घटो नास्तीत्यत्र तु भूतलमात्रविषयबुद्धेरेव विषयत्वमङ्गीक्रियते। तस्याश्च स्वयंप्रकाशत्वात् मानान्तरानपेक्षणात् तत्र नानवस्थादिदोषप्रसङ्ग इति।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रभाकरोक्तदूषणनिरासपूर्वकमनुपलब्धेः सयुक्तिकं प्रमाणान्तरत्वस्थापनम्—

यदुक्तं—दृश्ये प्रतियोगिनि या भूतलादिमात्रविषयिणी बुद्धिः, सैव तस्य प्रतियोगिनो घटादेरभाव इति (तदेकबुद्धिरेव) न त्वतिरिक्तमभावाख्यं किञ्चित् प्रमेयमस्तीति, तन्न संगच्छते—अभावानङ्गीकारे तदेकबुद्धिरपि न कदाचिन्निरूपयितुं शक्यते, न च भूतलधीरेव तदेकधीः, घटवद्भूतलमिति संसृष्ट-ज्ञानस्यापि तन्मात्रत्वापातात्, तत्रापि भूतलावभासात्। अतो घटादिवेदनाभावे सति या भूतलधीः, सा तन्मात्रधीरिति वक्तव्या। एवं च ज्ञानाभावाङ्गीकाराद-भावापह्नवोऽनर्थकः। इत्थं चाभावरूपं प्रमेयमस्तीति सिद्धम्। योग्यानुपलब्धेः ज्ञाततयैव करणत्वं वक्तव्यं, तथासति अनवस्थाप्रसङ्ग इति यदभिहितं तदपि न, योग्यानुपलब्धेरिन्द्रियवत् सत्तयैव करणत्वाभ्युपगमात्।

ननु ससन्तमसापवरकदेशे सर्वतः कराभ्यां परामृष्टे, सत्यामपि योग्यानुप-लब्धौ नाभावावधारणं, असत्यामपि अनुपलब्धिज्ञानेन अभावावधारणं जायते, अतो ज्ञाततयैव अनुपलब्धेरभावकारणत्वं वाच्यमिति चेत्, न, योग्यानुपलब्धि-रेव अभावकरणं, तत्र योग्यत्वं ज्ञाततयैव करणं न सत्तामात्रेण, ततः सर्वतः करपरामृष्टे देशे अनुपलब्धौ योग्यत्वं यद्यपि वर्तते, तथापि अज्ञातत्वात् कदाचित् नाभावमवधारयति, सर्वतोऽपरामृष्टे स्थले वस्तुतो योग्यत्वं नास्ति, तथापि योग्यत्वं भ्रान्त्या निश्चित्य अभावमवधारयति। एवं च तत्र अभावा-वधारणानवधारणे योग्यत्वज्ञानाज्ञाननिबन्धने, योग्यानुपलब्धिस्तु सत्तयैव करण-मिति नानवस्थादोषप्रसङ्गः। एवं च अभावरूपं प्रमेयमपि सिद्धं, तत्करणत्वेन अनुपलब्धिरूपमानान्तरमपि सिद्धम्।

न्यायाचार्योदयनमतेन अभावस्य प्रत्यक्षादिभावप्रमाणगम्यत्वम्—

अत्र नैयायिकाः प्रत्यवतिष्ठन्ते—यदुक्तं "भूतले घटो नास्तीति प्रतीतौ अभावस्य विषयतया भानाद् अभावाख्यं प्रमेयं किञ्चिदस्तीति, तत् सत्यम्, परन्तु तस्य अभावस्य प्रमाणत्वेन योग्यानुपलब्धेरुपन्यासो यः कृतस्तत्र विवदामो वयम्। यद्यपि अभावस्थले योग्यानुपलब्धिरस्माभिरवश्यमङ्गीक्रियते, तथाऽपि तस्या अभावज्ञाने (प्रमायां) सहकारित्वमात्रमेव चाक्षुषप्रत्यक्षे आलोकमहत्वोद्-भूतरूपादीनामिव अङ्गीकुर्मः। इह भूतले घटो नास्तीति प्रतीतिस्तु चक्षुरादीन्द्रिय-करणिकैव।

तथाहि—भूतले घटो नास्तीत्यादि प्रतीतिरिन्द्रियकरणिका साक्षात्कारि-त्वाद् यथा 'रूपवान् घटः' इति प्रतीतिः।

ननु साक्षात्कारित्वमस्या असिद्धमिति चेत्, न, निपुणतरमनुसृतो मया मन्दिरे चैत्रो न दृष्ट इति अन्यदीयवचनं श्रुत्वा चैत्रानुपलब्धिं ज्ञात्वा श्रोता

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मन्दिरं चैत्राभाववदित्यनुमिनोति, तत्र असाक्षात्कारिण्याः प्रतीतेः ज्ञातानुपलब्धिजन्यत्वाद् भूतले घटो नास्तीत्यत्र (तद्विपरीततया) अज्ञातानुपलब्धिजन्यत्वात् तद्विपरीतकरणकत्वात् तद्विपरीतजातीयत्वमिति अस्याः प्रतीतेः साक्षात्कारित्वं नासिद्धम् ।

अपि च अनन्यत्रोपक्षीणेन्द्रियव्यापारानन्तरभावित्वाच्च इयं प्रतीतिरिन्द्रियकरणिका । नन्वत्र इन्द्रियव्यापारस्य अधिकरणग्रहणे उपक्षय इति चेत्, न, अन्धस्यापि त्वगिन्द्रियोपनीते घटादौ रूपविशेषाभावप्रतीतिप्रसङ्गात् । तस्यापि अस्ति हि अधिकरणग्रहणम्, प्रतियोगिस्मरणम्, श्यामे घटे रक्तत्वस्य योग्यस्य अभावोऽनुपलब्धिश्च ।

प्रतियोगिग्राहकेन्द्रियगृहीताधिकरण एवानुपलब्धेः प्रमाणत्वमस्माभिरिष्यते, अतो नान्धादीनां त्वगिन्द्रियोपनीतघटे रूपविशेषाभावप्रसङ्ग इति चेत्, न, तथा सति त्वगिन्द्रियोपनीते वायौ रूपाभावप्रतीत्यनुदयप्रसङ्गः, वायोः प्रतियोगिग्राहकचक्षुरिन्द्रियाग्राह्यत्वात् ।

इत्थं च वायौ रूपाभावप्रत्यक्षस्य सर्वानुभवसिद्धतया तत्राधिकरणस्य इन्द्रियान्तरेण गृहीतत्वात् चक्षुषोऽभावग्रहण एव सामर्थ्यमवश्यमभ्युपगन्तव्यमिति अनन्यत्रोपक्षीणेन्द्रियव्यापारानन्तरभावित्वमभावप्रत्यक्षस्य विद्यत इति इन्द्रियकरणकमेवेति सिद्धम् ।

किं च भूतले घटाभावज्ञानं इन्द्रियजमज्ञातकरणत्वात्, यद् अज्ञातकरणजं ज्ञानं तत् साक्षादिन्द्रियजं, यथा रूपप्रतीतिः ।

एवं—सर्वत्र बाह्यार्थानुभवे इन्द्रियलिङ्गादिभावकरणसहकृतमेव मनःप्रवर्तमानं दृष्टम्, अतो व्याप्तिबलाद् अभावानुभवेऽपि किमपि भावरूपं करणं आविश्य मनः प्रवर्तत इत्यनुमीयते, तच्च परिशेषात् प्रकृते इन्द्रियरूपकरणमेवेति निश्चीयते ।

भूतले घटो नास्तीत्याकारकप्रत्यक्षात्मकाभावप्रमा-भावभूतासाधारणकरणसहकृतमनोजन्या अस्मदाद्यभावप्रमात्वाद् लिङ्गादिजन्याभावप्रमावत् । अनेन इन्द्रियसहकृतस्यैव मनसोऽभावप्रत्यक्षहेतुत्वस्थापनेन अभावप्रत्यक्षस्य इन्द्रियकरणकत्वं सिद्धमिति भावः ।

अपि चेन्द्रियं अभावप्रत्यक्षकरणं प्रतियोगिग्राहकत्वात्, यद्यद् भावावगाहिप्रमाणम्, तत् तत् अभावावगाहि, यथा लिङ्गं शब्दो वा चक्षुरादीन्द्रियं तु घटादिरूपभावावगाहि, तेनैव तदभावोऽपि गृह्यत इति अभावस्येन्द्रियजन्यत्वं सिद्धम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नन्विन्द्रियस्य आश्रयग्रहणेन व्यवहितत्वात् नाभावग्रहणे सामर्थ्यमिति चेत्, न, आश्रयग्रहणस्य अभावग्रहणे व्यापारत्वात् न तेन व्यवधानमभावग्रहण-विरोधीति भावः।

किञ्च विद्यमान एव वस्तुनि नास्तीत्यभावभ्रमो जायते। तस्य च अभाव-भ्रमस्य दुष्टकारणजन्यत्वाद् अनुपलब्धेश्च स्वरूपेण अदुष्टत्वात् पित्तादिना दुष्टमिन्द्रियकरणमिति वक्तव्यं, तथा च दोषाश्रितस्य इन्द्रियस्य तद्विपर्ययसामर्थ्ये सति अदुष्टस्य तत्समीचीनसामर्थ्यमपि। तथा च—इन्द्रियमभावप्रमाकरणं तद्वि-पर्ययकरणत्वात्, यद् यद्विपर्ययकरणं, तत् तत्प्रमाकरणं यथा रूपप्रमाकरणं चक्षुः।

अपि च भूतलं घटाभाववदित्यधिकरणाभावयोर्विशिष्टधीर्नेन्द्रियजन्या अभावबुद्धित्वात्, नाप्यनुपलब्धिजन्या भावबुद्धित्वात्, नैवोभयजन्या जातिसाङ्कर्य-प्रसङ्गादिति विकल्पनादपि योग्यानुपलब्धिसहकृतस्यैव इन्द्रियस्य अभावग्रहणे सामर्थ्याद् उभयग्राहकत्वमिन्द्रियस्याक्षतमेवेति भावः। इत्थं च भूतले घटो नास्तीति साक्षात्कारिणी प्रतीतिः योग्यानुपलब्धिसहकृतेन्द्रियकरणिकैवेति स्थापितम्।

प्रतिपत्तेरपारोक्ष्याद् इन्द्रियस्यानुपक्षयात्।
अज्ञातकरणत्वाच्च भावावेशाच्च चेतसः[1]॥

प्रतियोगिनि सामर्थ्यात् व्यापाराव्यवधानतः।
अक्षाश्रयत्वाद् दोषाणां इन्द्रियाणि विकल्पनात्[2]॥

इति द्वाभ्यां कारिकाभ्यां श्रीमदुदयनाचार्यपादैरपि निरुक्तार्थो विस्तरेण उपन्यस्तः।

ननु घटाभाववद्भूतलमिति ज्ञानस्य विशिष्टबुद्धित्वाद् विशेषणज्ञान-पूर्वकत्वावश्यंभावाद् अभावरूपविशेषणस्य च अद्रव्यत्वात् न संयोगरूपसंनिकर्षः संभवति। नापि विशेषणता, तस्याः सम्बन्धान्तरपूर्वकत्वात्, अतोऽभावरूप-विशेषणग्रहणाय अनुपलब्धिरूपप्रमाणान्तरमभ्युपगन्तव्यमिति चेत्, न, विशिष्ट-ज्ञानसामान्यस्य न विशेषणज्ञानपूर्वकत्वमङ्गीक्रियते, किं त्वितरनिरूपणानधीन-विशेषणविशिष्टज्ञानस्यैव, यथा दण्डी कुण्डली इत्यत्र दण्डकुण्डलादिविशेषणस्य इतरनिरूपणानधीनत्वेन स्वातन्त्र्येणापि ज्ञानसंभवात्, तद्विशिष्टज्ञाने तद्विशेषण-ज्ञानपूर्वकत्वमभ्युपगम्यते। प्रकृते तु अभावरूपविशेषणस्य घटादिरूपप्रतियोगि-निरूपणाधीनत्वेन न तद्विशिष्टज्ञाने विशेषणज्ञानपूर्वकत्वनियमः। अभावस्तु अभावत्वेन अभावज्ञानस्य प्रतियोग्यादिज्ञानजन्यतया विशिष्टज्ञानसामग्री

१. न्यायकुसुमाञ्जलिः तृ० स्त० श्लो० २०।
२. तत्रैव—तृ० स्त० श्लो० २१।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अस्त्येवेति न केवलमभावो भासते, अतो न निर्विकल्पविषयः; किं तु सविकल्पक-विषय एव।

यच्चभावज्ञानं प्रतियोग्यादिज्ञानानपेक्षं तद्द्वर्चभावोऽपि निर्विकल्पकविषय एवेति सिद्धसाधनम्। अभावस्य चेन्द्रियस्य च संनिकर्षो नास्तीति यदुक्तं तदपि न, तयोः विशेषणतैव संनिकर्षः। अभावोऽपि संबन्धान्तरं विनाऽपि स्वरूपेणैव विशेषणम्। सम्बन्धान्तरपूर्वकत्वेऽनवस्था स्यात्, अत्र प्रतीतिबलात् स्वरूपेणैव विशेषणत्वाङ्गीकारात् नानवस्थादोषः। एवमनङ्गीकारे भवत्पक्षेऽपि षष्ठेनापि अनुपलब्ध्याख्यप्रमाणेन अभावः कस्यचिद्विशेषणत्वेन वा ग्राह्यः, ततश्च तस्य च सम्बन्धान्तरपूर्वकत्वेऽनवस्थादुष्परिहरैव, अतोऽभावस्य स्वरूपेणैव विशेषणत्व-मभ्युपगन्तव्यमिति तथा ह्युक्तम्—

अवच्छेदकग्रहध्रौव्याद् अध्रौव्ये सिद्धसाधनात्।
प्राप्त्यन्तरेऽनवस्थानात् न चेदन्योऽपि दुर्घटः[1]॥

इति कारिकायां न्यायाचार्यैरुदयनपादैरभिहितम्।

इत्थं च विशेषणत्वस्य अभावप्रत्यक्षे संनिकर्षत्वाद् युक्तमभावस्येन्द्रियेण ग्रहणमिति भूतले घटो नास्तीति प्रतीतेरिन्द्रियकरणकत्वमज्ञातकरणत्वेन साक्षात्कारित्वं च सिद्धम्।

गृहादिकं स्वरूपेणैव प्रतिपन्नस्य देशान्तरं गतस्य पुरुषस्य तत्रत्यं विलक्षणं वस्तु दृष्ट्वा इदं वस्तु मद्गृहे नासीदिति या बुद्धिः, एवं सम्प्रति आनीतस्य घटस्य 'प्रागयमिह नासीत्' इति या प्राङ्नास्तिताबुद्धिः, एतास्सर्वा अनुमान-गम्याः। एवं गृहे देवदत्तो नास्तीति शब्दाद् याऽभावबुद्धिस्सा शब्दप्रमाणगम्या। अनुमानशब्दादिगम्याभावप्रतीतेः ज्ञातानुपलब्धिकरणकत्वाद् असाक्षात्कारित्वम्। इत्थं च सर्वत्र यथासम्भवं योग्यानुपलब्धिसहकृततत्तद्भावरूपप्रत्यक्षानुमानशब्द-प्रमाणगम्य एव अभावः, न त्वतिरिक्तयोग्यानुपलब्धिरूपप्रमाणान्तरगम्य इति स्थितम्।

अभावप्रतीतेरैन्द्रियकत्वविषय उक्तानुमानानामाभासत्वोपपादनम्—

भूतले घटो नास्तीति प्रतीतिरिन्द्रियकरणिका साक्षात्कारित्वादिति प्रथमानुमाने हेतोरुभयवादिसम्प्रतिपन्नत्वं नास्ति। भाट्टैरभावप्रतीतेः योग्या-नुपलब्धिगम्यत्वस्यैव इष्यमाणत्वात्। अपि च साक्षात्कारित्वरूपहेतुः स्वरूपा-सिद्धः। तथा हि—अभावज्ञानं-प्रत्यक्षं-अज्ञातकरणत्वादित्यनुमाने व्यभिचारदोषः स्पष्टः, प्रत्यक्षत्वाभाववत्यां स्मृतौ संस्कारस्य सत्तयैव हेतुत्वात्। इत्थं च अज्ञात-

१. न्या० कु० तृ० स्त—श्लो० २२।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

करणत्वाद् अभावप्रतीतेः साक्षात्कारित्वं न सिद्ध्यतीति साक्षात्कारित्वरूपहेतुरिन्द्रियकरणकत्वानुमाने न प्रयोजकः। एवं अभावज्ञानं भावरूपकरणाविष्टमनोजन्यं ज्ञानत्वादित्यनुमानेन इन्द्रियकरणकत्वं प्रसाध्य अभावस्य चाक्षुषत्वमाशङ्क्यते, चेत्, तत्रापि अभावज्ञानं–इन्द्रियेतरकरणकं–अभावज्ञानत्वात् अनुमेयाभावज्ञानवदिति प्रत्यनुमानेन सत्प्रतिक्षः स्याद्। अनुमानान्तरेष्वपि इत्थं दूषणानि, तथा अभावप्रत्यक्षे विशेष्यविशेषणत्वयोस्सन्निकर्षत्वासम्भवं च[1] मानमेयोदयग्रन्थे प्रत्यपादयन् ग्रन्थगौरवभिया नेह वितन्यते।

अत्रेदं विमृश्यते—नैयायिकानां पक्षे भूतले घटो नास्तीति प्रतीतेरैन्द्रियकत्वप्रयोजकतया उपन्यस्तेषु अनुमानेषु मानमेयोदये दूषणस्य स्पष्टमभिहिततया नात्रानुमानेन ऐन्द्रियकत्वं वक्तुं शक्यते। कथंचिदिह साधनेऽपि पुनरपि 'तर्काप्रतिष्ठानात्' इति न्यायेन तस्यापि बलवद्बुद्धिमत्पुरुषेण आभासत्वमापादयितुं शक्यते।

किं च नैयायिकैः भावस्थले संनिकर्षत्वेन क्लृप्तस्य संयोगसमवायादेरभावस्थले संनिकर्षत्वासम्भवेन सम्बन्धपदावाच्यस्यापि विलक्षणस्य विशेषणत्वादेः सम्बन्धत्वं परिकल्प्य अभावप्रतीतेरैन्द्रियकत्वं समर्थनीयम्। लोके विशेष्यविशेषणत्वातिरिक्तस्यैव सम्बन्धशब्देन व्यवहारादिति अस्मिन् पक्षे विशेषणत्वस्य सम्बन्धत्वकल्पनाप्रयुक्तं गौरवमनिवार्यमेव।

अतोऽभावरूपप्रमेयसिद्ध्यनुरोधेन कस्यचिद् अनन्यथासिद्धस्य प्रमाणस्य स्वीकारावश्यंभवादैन्द्रियकत्वसाधकतया प्रदर्शितेषु अनुमानेषु अप्रयोजकत्वख्यापनेन अन्ततः सहकारित्वेन वा नैयायिकैरप्यवश्यमभ्युपगताया अनुपलब्धेरेव प्रमाणत्वस्वीकारस्समुचित इति भाट्टानां निगूढाभिसन्धिः।

१. १९१२ वत्सरे अनन्तशयने मुद्रितपुस्तके ६०, ६१, ६२ पृष्ठेषु।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शक्तिविशिष्टाद्वैतवेदान्ते आचारमीमांसा

डॉ० चन्द्रशेखरशर्मा हिरेमठः

अनुसन्धानोपाध्यायः (रिसर्च-एसोशिएट), वेदान्तविभागे.

सम्पूर्णानन्दसंस्कृतविश्वविद्यालस्य

वाराणसी

❃ ❃ ❃

सदाशिवं शक्तिधरं सुकेशं
चण्डीश्वरं भृङ्गिरिटिं शिलादम् ।
कुम्भोद्भवं चिन्मयवामदेवं
श्रीरेवणासिद्धगुरुं प्रपद्ये[1] ॥

इह खलु सर्वे जानन्ति यद्वीरशैवधर्म-दर्शनमेव शक्तिविशिष्टाद्वैतवेदान्तापरपर्यायेणापि व्यवह्रियत इति। परशिवेन साकं तदंशभूतस्य जीवस्याभिन्नत्वप्रतिपादनमेव वेदान्तस्यास्य मुख्यं प्रयोजनम् । तदर्थमत्र ज्ञानकर्मणोः समसमुच्चयवादोऽङ्गीकृतः । अत्रोक्तं ज्ञानसमुच्चितं कर्म "पतिकर्म" एव, न तु "पशुकर्म" ।

इदमत्र रहस्यम्—कर्म तावद्द्विविधम्—पतिकर्म, पशुकर्म चेति । तत्राऽग्निष्टोमाद्यश्वमेधान्तानि यज्ञानि स्वर्गादिसाधनानि न हि तैर्निःश्रेयसप्राप्तिरिति च पाशाश्रयत्वात्तेषां पशुकर्मता । नित्यत्वेन विहितेन इष्टलिङ्गधारण-तदर्चनानुसन्धानरूपेण कर्मणा पाशविच्छित्तिद्वारा परशिवेन साकमैक्यप्राप्तिर्भवतीति अस्य पतिकर्मतेति । तदुक्तं पूज्यपादैर्नीलकण्ठशिवाचार्यैः—

धर्मानन्तर्यमेवातो वाच्यं धर्मो द्विधा मतः ।
पशुधर्मः प्राथमिकः पतिधर्मो द्वितीयकः ॥
पशुधर्म इति प्राहुर्यस्तु काम्यफलप्रदः ।
निष्कामेन स्वपापस्य विच्छित्त्यै समनुष्ठितः ॥
यो धर्मस्तं तु शास्त्रेषु पतिधर्मं प्रचक्षते[2] । इति ।

तस्मात् पशुकर्मभिर्यज्ञादिभिः साकं ज्ञानस्य समुच्चये विरोधेऽपि, पतिकर्मभिरिष्टलिङ्गधारणपूजादिभिर्ज्ञानेन समसमुच्चये न कोऽपि विरोधः, ज्ञानिभिरपि लोकसङ्ग्रहार्थं नित्यकर्मणः क्रियमाणत्वात् ।

---

१. ब्र० सू० श्रीकर० मङ्गलश्लो० ६; २. क्रियासार० भाग—१, पृ० १६-१७ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वीरशैवसिद्धान्ते इष्टलिङ्गधारण-पूजारूपनित्यकर्मणः सहकारित्वेन पञ्च आचाराः प्रतिपादिताः सन्ति । आचारो हि मनुष्यस्योत्कृष्टमलङ्करणम् । तद्रहितो ज्ञान्यपि लोके निन्दा भाजनो भवति । तदुक्तं रेणुकाचार्यैः—

आचार एव सर्वेषामलङ्काराय कल्पते ।
आचारहीनः पुरुषो लोके भवति निन्दितः ।।
ज्ञानेनाचारयुक्तेन प्रसीदति महेश्वरः ।
तस्मादाचारवान् ज्ञानी भवेदादेहपातनम्[1] ।। इति ।

तस्मादत्र सिद्धान्ते पञ्चविधानामाचाराणां सर्वैरपि निष्ठापूर्वकं परिपालनं क्रियते । अत एव वीरशैवानां प्राणभूता आचाराः के ? तेषां स्वरूपं च कीदृशम् ? तदाचरणसरणिः कः ? इति जिज्ञासायां किञ्चिदत्र प्रस्तूयते ।

लिङ्गाचारः सदाचारः शिवाचारस्तथैव च ।
भृत्याचारो गणाचारः पञ्चाचाराः प्रकीर्तिताः[2]।।

इति चन्द्रज्ञानागमे वीरशैवीयानां पञ्चाचाराणां नामानि प्रतिपादितानि सन्ति । एतेषां स्वरूपं तदाचरणपद्धतिश्च क्रमशो निरूप्यते ।

(१) लिङ्गाचारः—

अङ्गस्य (जीवस्य) लिङ्गस्वरूपप्राप्तये उपदिष्ट आचारो लिङ्गाचारः । शरीरेण शिवलिङ्गपूजनम्, मनसा तच्चिन्तनम्, भावनया तस्यैव निदिध्यासनं लिङ्गाचार इत्युच्यते । तदुक्तमागमे—

गुरुणा दत्तलिङ्गाद्वै नास्ति दैवं महीतले ।
इति भावानुसन्धानं लिङ्गाचारः स उच्यते[3] ।। इति ।

अत्रेदमैदम्पर्यम्-वीरशैवसिद्धान्ते गुरुः क्रियादीक्षयेष्टलिङ्गं प्रददाति, मन्त्रदीक्षया प्राणलिङ्गस्वरूपमुपदिशति, वेधदीक्षया च भावलिङ्गं बोधयति । एवं त्रिविधदीक्षया प्राप्तेष्टप्राण-भावाख्यलिङ्गानां गुरोरुपदेशानुसारेणार्चन-चिन्तन-निदिध्यासनासक्तिरेव लिङ्गाचारः । दीक्षासम्पन्नानां वीरशैवानां स्वेष्ट-प्राण-भावाख्यलिङ्गव्यतिरिक्तानामन्यदेवानामर्चनादिकं निषिद्धं वर्तते । अत एव श्रीजगद्गुरुरेणुकाचार्याः—

नार्चयेदन्यदेवांस्तु न स्मरेन्न च कीर्तयेत् ।
न तन्निवेद्यमश्नीयाच्छिवभक्तो दृढव्रतः ।।

---

१. सिद्धान्तशिखामणिः; १६, १३-१४; २. च० ज्ञा० आ० क्रियापादः—९.४।
३. चन्द्रज्ञानागम० क्रि० पा० ९.५ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यद्गृहेष्वन्यदेवोऽस्ति तद्गृहाणि परित्यजेत् ।
नान्यदेवार्चकान् मर्त्यान् पूजाकाले निरीक्षयेत् ॥
सदाशिवैकनिष्ठानां वीरशैवाध्ववर्तिनाम् ।
नहि स्थावरलिङ्गानां निर्माल्याद्युपयुज्यते[1] ॥

इति इष्ट-प्राण-भावलिङ्गव्यतिरिक्तानां स्थावरलिङ्गानां तथान्यदेवानामर्चनं निषिध्य लिङ्गनिष्ठाप्रतिपादनमुखेन लिङ्गाचारस्वरूपमुपवर्णितवन्तः ।

अत्र विहितोऽन्यदेवार्चनादेर्निषेधो न तदपकृष्टत्वप्रतिपादनार्थम्; किन्तु "नहि निन्दा निन्दितुं प्रवर्तते; किन्तु विधेयं स्तौतुम्" इति मीमांसावचनानुसारेण स्वसिद्धान्ताभिमतेष्टलिङ्गादिषु श्रद्धादाढर्यार्थमित्यवधेयम् ।

(२) सदाचारः–

सज्जनः शिवभक्तश्च येन मार्गेण सर्वदा ।
तोष्यते च महादेवि सदाचारः स वै स्मृतः[2] ॥

इति सूक्ष्मागमोक्त्या शिवस्य शिवभक्तानाञ्च सन्तोषप्रद आचारः "सदाचारः" इत्युच्यते । ननु सज्जनानां सन्तोषप्रदः स आचारः कीदृश इति जिज्ञासायामुक्तमागमे—

धर्मार्जितेन द्रव्येण यत्सन्तर्पणमन्वहम् ।
गुरुलिङ्गजङ्गमानां सदाचार इति स्मृतः[3] ॥ इति ।

अस्यायं भावः—वीरशैवधर्म-दर्शने दीक्षाप्रदायको गुरुः, गुरुप्रदत्तमिष्टलिङ्गम्, ज्ञानमार्गोपदेशको जङ्गमश्चेति त्रय आराध्यरूपेण स्वीकृताः सन्ति । तेषामनुग्रहप्राप्तये धर्ममार्गेणार्थं सम्पाद्य यथाशक्ति गुरुलिङ्ग-जङ्गमानां सर्वैरपि सेवा कर्तव्येति नियमोऽस्ति । इयं च सेवा अन्न-वस्त्र-धनादीनां दानरूपेण कर्तव्या भवति । इदं च दानमत्र सोपाधि-निरुपाधि-सहजभेदेन त्रिविधमङ्गीकृतम् ।

फलाभिसन्धिसंयुक्तं दानं यद्विहितं भवेत् ।
तत्सोपाधिकमाख्यातं मुमुक्षुभिरनादृतम् ॥
फलाभिसन्धिनिर्मुक्तमीश्वरार्पितकांक्षितम् ।
निरुपाधिकमाख्यातं दानं दानविशारदैः ॥
आदातृदातृदेयानां शिवभावं विचिन्त्य हि ।
आत्मनोऽकर्तृभावं च यद्दत्तं सहजं तु तत्[4] ॥ इति ।

---

१. सिद्धान्तशिखामणिः, ९।३१-३३, पृ० १४७ ; २. सूक्ष्मागमः; क्रि० पा० ८।७ ।
३. चन्द्रज्ञानाग० क्रि० पा० ९।६ ; ४. सि० शि० ९-३,४,५, पृ० १६२ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अनयाऽऽचार्योक्त्या तुच्छसांसारिकफलाभिलाषया विहितं सोपाधिकम्, तुच्छफलेच्छारहितमीश्वरार्पणबुद्ध्या क्रियमाणं दानं निरुपाधिकम्, परिग्रहीतृ-प्रदातृदेयानां शिवत्वं चिन्तयन् स्वस्य चाकर्तृत्वं भावयन् यद्दानं वितरति, तत् सहजदानमिति बोध्यम् ।

"सहजं दानमुत्कृष्टं सर्वदानोत्तमोत्तमम्[1]" इत्युक्त्या त्रिविधेषु उत्कृष्टेन सहजदानेनाराध्यानां गुरुलिङ्ग-जङ्गमानामन्वहं सन्तर्पणमेव सदाचारः। अयं सदाचारोऽष्टशीलाढ्यो वर्तते। तथा ह्युक्तम्—

सदाचारोऽष्टशीलाढ्यः सेवितः कल्पपादपः।
सद्भक्तानां सुमनसां ददातीष्टफलं महत्[2] ॥ इति ।

तत्र अङ्कुरशीलम्, उत्पन्नशीलम्, द्विदलशीलम्, प्रवृद्धशीलम्, सप्रकाण्ड-शीलम्, सशाखशीलम्, सपुष्पशीलम्, सफलशीलमित्येव तान्यष्टशीलानि। अत्र शीलं[3] नाम शिवतत्त्वजिज्ञासायाः प्रादुर्भावे कारणभूत आचरणविशेषः।

(१) **अङ्कुरशीलम्**—गुरुकारुण्यप्राप्तेन वेध-मान्त्री-क्रियाख्येन दीक्षात्रयेण क्रमशः कारण-सूक्ष्म-स्थूलाख्यानि शरीरत्रयाणि संशोध्य, अत एव स्वात्मानम् अप्राकृतं च मत्वा, गुरूपदिष्टमार्गेणान्वहं शिवपूजादिकरणमेवाङ्कुरशीलम्। सदाचारस्येयं प्राथमिकस्थितिरिति अङ्कुरशीलमित्युच्यते।

(२) **उत्पन्नशीजम्**—दीक्षया यथा स्वयं परिशुद्धस्तथा सती-पुत्र-पौत्राणा-मपि गुरुदीक्षया सन्मार्गप्रवर्तनमङ्कुरशीलम्।

(३) **द्विदलशीलम्**—इष्टलिङ्ग-भस्म-रुद्राक्षादीनां शिवलाञ्छनानाम-प्रमादेन शरीरे सर्वदा धारणं द्विदलशीलम्।

(४) **प्रवृद्धशीलम्**—शिवमाहात्म्यं श्रुत्वा तस्यान्वहं मननमेव प्रवृद्ध-शीलम्। एतादृशं मननं शिवभक्तिवृद्धौ सहायकं भवतीत्यस्य प्रवृद्धशीलमिति नाम जातम्।

(५) **सप्रकाण्डशीलम्**—नित्यकर्मभूतमिष्टलिङ्गार्चनं नियमेन सम्पादनम्, कदाचिद् व्यत्यये अन्न-जलादीनामप्यग्रहणं सप्रकाण्डशीलम्।

(६) **सशाखाशीलम्**—इष्टलिङ्गानर्पितस्य भक्ष्य-भोज्यादिपदार्थस्याग्रहणं सशाखाशीलम्। अयं च सदा शिवलिङ्गार्पितप्रसादभोजी भवति।

(७) **सपुष्पशीलम्**—शिवार्पितस्य प्रसादस्यापरित्यजनं सपुष्पं शीलम्। अयं शिवप्रसादस्यावज्ञां कदाचिन्न करोति।

---

१. सिद्धान्तशिखामणिः, ९।६, पृ० १६३; २. चन्द्रज्ञानागमः, क्रि-पा० ९।२२।
३. द्र० सि० शि० १३।१-७, पृ०२८-२९।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(८) **सफलशीलम्**—वीरशैवसिद्धान्ते पूजनीयत्वेन स्वीकृतेषु गुरुलिङ्ग-जङ्गमादिषु भेदबुद्धिं परित्यज्य "एकमूर्तिस्त्रयो भागो गुरुलिङ्गन्तु जङ्गमः" इति प्रमाणोक्त्या त्रयाणामपि शिवस्वरूपं परिभाव्य तदर्चनं सफलशीलम्। एतदष्टशीलाढ्य एव 'सदाचारः[१]'।

सदाचारप्रियः शम्भुः सदाचारेण पूज्यते।
सदाचारं विना तस्य प्रसादो नैव जायते[२]॥

इत्याचार्योक्त्या अयं सदाचारः शिवानुग्रहप्रापको वर्तते। अस्य निष्ठापूर्वकं परिपालनमेव शिवाराधनमित्यवगन्तव्यम्। अनेन लोकादरः शिवानुग्रहश्चेति ऐहिकामुष्मिकं फलद्वयमपि प्राप्नोति साधकः। अत एवास्य सर्वैरपि समादरः करणीयः।

(३) **शिवाचारः**—

शिव एव परं ब्रह्म पञ्चकृत्यपरायणः।
न ततोऽन्या गतिरिति शिवाचारो हि कीर्तितः[३]॥

इत्यागमोक्त्या सृष्ट्यादि पञ्चकृत्यपरायणः परः शिव एव ममानन्यपरिरक्षक इति दृढा भावनैव "शिवाचारः" इति कथ्यते। अत एव श्रीजगद्गुरुरेणुकाचार्याः—

शिवभक्तो महातेजा शिवभक्तिपराङ्मुखान्।
न स्पृशेन्नैव वीक्षेत न तैः सह वसेत् क्वचित्[४]॥

इति शिवभक्तस्य शिवस्यानन्यशरणागतित्वप्रतिपादनमुखेन शिवाचारं सूचयामासुः।

अस्मिन् शिवाचारे द्रव्य-क्षेत्र-गृह-भाण्ड-तृण-काष्ठ-वीटिका-पाक-रस-भव-भूत-भाव-मार्ग-काल-वाक्-जनाख्यषोडशपदार्थानां शिवशास्त्रोक्तमार्गेण शोधनं विहितम्। तत्र (१) फलमूलादीनां भस्मप्रोक्षणेन शुद्धिकरणं द्रव्यशुद्धिः, (२) क्षेत्रस्य चतुष्कोणे नन्दिमुद्राङ्कितशिलान्यासकरणं क्षेत्रशुद्धिः, (३) गृहस्य महाद्वारे शिवलिङ्गाङ्कनं गृहशुद्धिः ; (४) भोजन-पानोपयोगिपात्रेष्वपि शिवलिङ्गाङ्कनं भाण्डशुद्धिः ; (५) गवां भक्ष्यभूतस्य तृणस्य भस्मप्रोक्षणेन शुद्धिकरणं तृणशुद्धिः ; (६) भस्मप्रोक्षितकाष्ठपरिग्रहणं काष्ठशुद्धिः ; (७) शिवभक्तेन निर्मितस्य भस्मसंस्कृतस्य वा ताम्बूलस्य ग्रहणं वीटिकाशुद्धिः ; (८) शिवदीक्षासम्पन्नैः पक्वस्य भोज्यस्य ग्रहणं पाकशुद्धिः ; (९) महिष्यादिघृत-दधि-पयस्तक्रादिकं परित्यज्य सर्वदा गव्यन्तु ग्राह्यमिति रसशुद्धिः ; (१०) काम्य-

---

१. चन्द्रज्ञानागमः, क्रि० पा० ९।१९–३०;
२. सि० शि० १६।९, पृ० १३।
३. चन्द्रज्ञानागमः; क्रि० पा० ९।७;
४. सि० शि० ९।२७ पृ० १४६।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कर्मविसर्जनेन जन्मराहित्यापत्तिर्भवशुद्धिः; (११) सर्वभूतदयालुत्वं भूतशुद्धिः; (१२) सर्वकामान् त्यज्य सदा शिवभावानुभावनं भावशुद्धिः; (१३) पद्भ्यां पिपीलिकादीनां हिंसनं यथा न भवेत्, तथा गमनं मार्गशुद्धिः; (१४) शास्त्रसंशोधिते निःशब्दे च मनोरमे काले शिवलिङ्गाराधनं कालशुद्धिः; (१५) अनृत-परुष-बीभत्स-दाम्भिकवचसो विसर्जनं वाक्शुद्धिः; (१६) आसने, शयने, याने, गोष्ठ्यां सर्वत्र सर्वदा सद्भक्तजनसाङ्गत्यं जनशुद्धिः[1]।

एवं स्वव्यवहारे उपर्युक्तषोडशपदार्थानां परिशोधनरूपशिवाचारस्याचरणेनोत्तमस्यारोग्यस्य प्राप्तिर्भवति, अन्ते शिवसायुज्यमपि प्राप्यते। तथा ह्युक्तम्—

विद्वन्नयं शिवाचारः सर्वशास्त्रेषु गोपितः।
एतदाचरणान्मर्त्यः शिवसायुज्यमश्नुते[2]॥ इति।

(४) गणाचारः—

"अनुष्ठितो भक्तगणैर्गणाचार इतीरितः" इत्यागमोक्त्या शिवभक्तगणैरनुष्ठीयमान आचारो गणाचार इति कथ्यते।

शिवस्य शिवभक्तस्य शिवधर्मादिकस्य च।
न शृणोति च यो निन्दां स गणाचार उच्यते[3]॥

इत्यागमोक्तौ शिवस्य शिवभक्तानां वा कदापि निन्दाया अश्रवणमेव गणाचार इत्युक्तम्। अत एव श्रीजगद्गुरुरेणुकाचार्या अपि—

शिवनिन्दाकरं दृष्ट्वा घातयेदथवा शपेत्।
स्थानं वा तत्परित्यज्य गच्छेद्यद्यक्षमो भवेत्॥
यत्र चाचारनिन्दाऽस्ति कदाचित्तत्र न व्रजेत्।
यद्गृहे शिवनिन्दाऽस्ति तद्गृहं सम्परित्यजेत्[4]॥

इत्यत्र सक्षमश्चेत् शिवनिन्दकं घातयेत्, अक्षमश्चेत् तत्स्थानं परित्यज्य गच्छेदिति शिवनिन्दाया अश्रवणमेवास्मिन्नाचारे प्रधानतयोपदिष्टवन्तः। अस्मिन् गणाचारे कायिक-वाचिक-मानसिकभेदेनाहत्य चतुःषष्टि शीलानि प्रतिपादितानि सन्ति। तदुक्तमागमे—

सर्वोत्तमे गणाचारे सद्यः सिद्धकरे परे।
शीलानि तु चतुःषष्टिर्वर्तन्ते तानि संशृणु[5]॥ इति।

तेषां चतुःषष्टिशीलानां स्वरूपं संक्षेपेण निरूप्यते—

---

१. द्र० चन्द्रज्ञानागमः, क्रि० पा० ९।३२-४९;
२ तत्रैव—९।५०।
३. चन्द्रज्ञानागमः क्रि० पा० ९।७;
४. सि० वि० ९।३६, पृ० १४७।
५. चन्द्रज्ञानागमः क्रि० पा० ९।५२।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सप्तविधं वाचिकं शीलम्—(१) यथार्थभाषणम्, (२) सत्यं प्रियं हितं च भाषणम्, (३) प्रत्यहं वेदागमादिसच्छात्रपठनम्, (४) शिवस्य शिवभक्तानां गुरोश्च प्रशंसनम्, (५) अन्यदेवानां सामान्यमनुष्याणां वा प्रशंसावर्जनम्, (६) आत्मस्तुतिवर्जनम्, (७) परनिन्दाराहित्यञ्चेति सप्तविधं वाचिकं शीलमित्युच्यते ।

पाणिगतं पञ्चविधं शीलम्– (८) गुरु-जङ्गम-शिवलिङ्गानां नमस्कृतिः, (९) पूजापरिकराणां सम्पादनम्, (१०) रुद्राक्षमालया मूलमन्त्रस्यान्वहं जपः, (११) गुरु-लिङ्ग-जङ्गमानां प्रत्यहमाराधनम्, (१२) गुरु-जङ्गमाभ्यां शिवधर्माय च यथाशक्तिदानम् । एतत्पञ्चविधं शीलं पाणिसम्बद्धमीरितम् ।

पादगतं चतुर्विधं शीलम्—(१३) गुरुदेवताभिगमनम्, (१४) प्रदक्षिणाकरणम्, (१५) पूजापरिकराणां सम्पादनाय गमनम्, (१६) इष्टलिङ्गपूजार्थं स्थिरमासनम् । एतच्चतुर्विधं पादगतं शीलमीरितम् ।

त्वक्सम्बद्धं द्विविधं शीलम्—(१७) नित्यमिष्टलिङ्गस्यावियोगतो धारणम्, (१८) इष्टलिङ्गस्पर्शजन्यरोमाञ्चसमलङ्कृतिश्चेति द्विविधं त्वक्सम्बद्धं शीलं परिकीर्तितम् ।

चक्षुर्गतं द्विविधं शीलम् –(१९) अश्रान्तं सानुरागमिष्टलिङ्गनिरीक्षणम्, (२०) इष्टलिङ्गेक्षणसमुद्भूतानन्दवाष्पसमुद्गमश्चेति द्विविधं शीलं चक्षुःसम्बद्धमीरितम् ।

जिह्वागतमेकं शीलम्—(२१) अन्वहं शिवाय विनिवेदितप्रसादीयरसास्वादो जिह्वागतं शीलमित्युच्यते ।

घ्राणगतमेकं शीलम्—(२२) शिवनिर्माल्यानां गन्धपुष्पादीनां सौरभग्रहणं घ्राणगतं शीलमीर्यते ।

श्रोत्रगतं शीलद्वयम्—(२३) गुरोः, शिवस्य, शिवभक्तानां च स्तोत्राकर्णनम्, (२४) गुरोः, शिवस्य, शिवभक्तानां च निन्दानाकर्णनं चेति द्विविधं श्रोत्रगतं शीलम् ।

पञ्चविधं कायशोधनशीलम्—(२५) गुरोः, इष्टलिङ्गस्य, जङ्गमस्य च प्रसादतः कायसंशोधनम्, (२६) निषिद्धविषयेभ्य इन्द्रियनिग्रहः, (२७) अस्पृश्यवस्तुसंस्पर्शे जलेन भस्मना वा स्नानम्, (२८) आसने, शयने, गोष्ठयां भवि[1]-सम्बन्धवर्जनम्, अर्थात् संस्कारशून्यैः साकं सम्बन्धवर्जनम्, (२९) विभूति–रुद्राक्ष–लिङ्गानां शरीरे धारणमित्येतत् पञ्चविधं कायशोधनं शीलमित्युच्यते ।

१. यो हि सद्गुरुद्वारा दीक्षासंस्कारेण इष्टलिङ्गमवाप्य स्वशरीरस्य वक्षःस्थलादिस्थानेषु न धारयति, स वीरशैवदर्शने "भविः" इति कथ्यते ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पञ्चविंशद्विधं मानसिकं शीलम्—(३०) निषिद्धभोगविषये सङ्कल्प-राहित्यम्, (३१) भक्तिरतौ कामो न विषयेषु, (३२) अधर्मे क्रोधो न वैरिषु, (३३) शिवस्याराधने लोभो न धनादिषु, (३४) भक्तजने मोहो न कान्तादि-विषयेषु, (३५) करणेष्वेव मात्सर्यं न जनेषु, (३६) मायाजये मदो न धर्मे, (३७) गुरौ जङ्गमे वा गुणागुणविमर्शत्यागः, (३८) प्राणिनोऽहिंसा, (३९) प्राणिदुःखवीक्षायां दया, (४०) क्रियायां वचने चार्जवम्, (४१) रिपौ निजसुते वापि वैषम्यविवर्जनम्, (४२) गुरूदिते निगमागमवचसि विश्वासः, (४३) दुरन्तायामापद्यपि धर्मस्यावर्जनरूपा धृतिः, (४४) अपकारिष्वपि वैरिजनेष्वदूषणरूपा क्षमा, (४५) मानसे भोगसक्तिच्युतिः, (४६) क्रियायां वचने वापि प्रमादराहित्यम्, (४७) शिवान्यवस्तुसङ्कल्पवर्जनाख्यं दमः, (४८) परद्रव्यापरिग्रहरूपमस्तेयम्, (४९) अलब्धवस्तुविषयव्यसनाभावरूपा सन्तुष्टिः, (५०) नित्यं परमेश्वरनामरूपयोः स्मरणम्, (५१) शम्भोर्नामगुणा-दीनामनवरतं चिन्तनम्, (५२) सदा शम्भोः पादसंवाहनादिभावनम्, (५३) शम्भोरावाहनादिना मानसमर्चनम्, (५४) शम्भुपादाब्जयोर्नित्यं मानसिकप्रणामः, (५५) शम्भोर्मनसा कैङ्कर्यकरणरूपं दास्यम्, (५६) शम्भोः कल्याणरूपस्य मनसा सख्यताभावरूपं सख्यम्, (५७) बन्धमोचनभारस्य कृत्स्न-स्येश्वरे समर्पणरूपमात्मसमर्पणम्, (५८) मूलमन्त्रस्य सदा मनसा जपः, (५९) शम्भोर्दिव्यरूपानुसन्धानरूपं ध्यानम्। (६०) तैलधारावदविच्छिन्नं शिवमूर्तेर्मनसि धारणम्, (६१) निवातदीपवद् ध्याने चेतसः स्थिरीरूपः समाधिः। (६२) शिवस्य सोऽहम्भावेन ध्यानपूर्वकं कार्यकारणम्, (६३) महेशितुरपरि-च्छिन्नरूपानुसन्धानम्, (६४) देवस्यानन्तरूपस्य निजरूपतो भावनमित्येतत् पञ्चत्रिंशद्विधं मानसिकं शीलमुच्यते।

तदेवं त्रिकरणेष्वाहृत्य चतुःषष्टिः शीलान्युक्तानि[1]। चतुःषष्टिशीला-ढ्यस्य गणाचारस्य सम्यगाचरणेन साधकः शिवसायुज्यमाप्नोति। तथा ह्युक्तम्—

यश्चतुःषष्टिशीलाढ्यः शिव एव न चापरः।
एतदभ्यासयोगेन शिवसायुज्यमश्नुते[2] ॥ इति।

(५) भृत्याचारः—

शिवभक्ता जनाः सर्वे वरिष्ठाः पृथिवीतले।
तेषां भृत्योऽहमिति यद् भृत्याचार इति स्मृतः[3] ॥

इत्यागमोक्त्या शिवस्य शिवभक्तानां चात्मानं भृत्य इति मत्वा तेषां संसेवनमेव भृत्याचार इत्युच्यते। उक्तं च श्रीजगद्गुरुरेणुकाचार्यैः—

---

१. चन्द्रज्ञानागमे—क्रि० पा० ९।५२-१२२; २. तत्रैव—९।१२३।
३. तत्रैव—क्रि० पा० ९।९।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शिवयोगी शिवः साक्षादिति कैङ्कर्यभक्तितः ।
पूजयेदादरेणैव यथा लिङ्गं यथा गुरुः[1] ॥ इति ।

अयं भृत्याचारो भृत्यभावः, वीरभृत्यभाव इति द्विधा भवति । तत्र गुरु-लिङ्ग-जङ्गमानां कैङ्कर्यभक्तितोऽर्चनं भृत्यभाव इत्युच्यते । पुनर्यदा भक्तः समुत्कर्षेण गुरवे तनुं, लिङ्गाय मनः, जङ्गमाय च स्वाखिलं सर्वस्वं प्रदाय पारलौकिकसुखेष्वपि निःस्पृहो भूत्वा मोक्षमात्रमभिलषमाणस्तिष्ठति, तदा वीरभृत्य इत्युच्यते । एतादृशवीरभृत्यभावनयैव भक्तः शिवानुग्रहमाप्नोति । तथा ह्युक्तम्—

देशिकाय तनुं चित्तं शम्भवे च धनं तथा ।
जङ्गमाय समर्प्यैवं महोत्साहसमन्वितः ॥
मुक्तिमेव परां काङ्क्षमाणो यदवतिष्ठते ।
तन्मतं वीरभृत्यत्वं शिवानुग्रहसाधनम् ॥ इति ।

तदेतदुपर्युक्ताः पञ्चविधा आचाराः पञ्चाचारा इति कथ्यन्ते । वीरशैव-धर्मानुयायिनः प्रायः सर्वेऽप्येतदाचरणशीला भवन्ति । एतादृशाचाराणां परिपालनेन सर्वेषामपि व्यावहारिकं जीवनं सुचारुरूपेण प्रचलति । आचारहीनः पुरुषस्तत्त्व-ज्ञानसम्पन्नोऽपि लोके निन्दितो भवति । तस्मादज्ञानां कृते यथाचाराणां परिपालनमावश्यकम्, तथा तत्त्वज्ञानामपि कृते तदावश्यकमेव । तस्माद् वीरशैवाः पञ्चाचारान् पञ्चप्राणानिव संरक्षन्ति । तदेवमुक्ता एते आचारा न केवलं वीर-शैवानां कृते; किन्तु मानवसमाजस्य सुधारका वर्तन्ते । अतः सर्वैरपि यथाशक्ति अस्याचारस्य अनुकरणं कर्तव्यमिति शिवम् ।

१. सि० शि० ९।९, पृ० १५७ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वैदिकं खगोलविज्ञानम्

डॉ० नागेन्द्रपाण्डेयः
प्राध्यापको ज्योतिषविभागे
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी

❀ ❀ ❀

विंशतिशताब्द्या अन्तिमे दशके विद्यमाना वयं विज्ञानस्य विविधक्षेत्रेषु विकासस्य समुन्नतेश्च चरमोत्कर्षतां पश्यामोऽनुभवामश्च। भौतिकविज्ञानस्यास्य विकसितं रूपं ब्रह्माण्डस्य रहस्योद्घाटनार्थम् अन्तरिक्षे विविधप्रयोगासक्तं सततसन्नद्धनेत्रश्चास्ति। कालोऽयम् "इलेक्ट्रानिक—" युगस्येत्युच्यते प्रायः सर्वत्र; किन्तु वैज्ञानिकविकासस्यास्य श्रेयः पाश्चात्यविदुषामेवास्तीति, न केवलं पाश्चात्या एवापि तु पौरस्त्या भारतीया विद्वांसोऽपि एवं मन्यन्ते। एवं सर्वं एव वैज्ञानिका विचारकाश्च पाश्चात्यान्नेवानुकुर्वन्तीत्यस्मिन् विषये इत्यत्र नास्ति विसंवादः।

यान्त्रिकसाधनानि सुविकसितानि चमत्कृतियुक्तानि च सन्त्यस्मिन् युगेऽत्र नास्ति सन्देहस्तथापि विचारस्यायं विषयो यत् सिद्धान्तस्य विकासादेव साधनान्यपि नूनं विकसितानि भवन्ति। अधुना भौतिकशास्त्रस्य सफलप्रयोग आकाशस्य ग्रहनक्षत्राणां वीक्षणे परीक्षणे च प्रचलति। चन्द्रोपरि समानवयन्त्रस्य प्रेषणानन्तरं त्वन्येष्वपि ग्रहेषु मानवप्रेषणाय वैज्ञानिका दत्तचित्ताः सन्ति; किन्तु ग्रहपिण्डोपरि गमनस्य विचारोऽयमकस्मादेव नागतः। प्राचीनकालादेव सहस्राधिकवर्षेभ्य पूर्वं ग्रहपिण्डानां विषये पूर्ववर्तिभिर्विद्वद्भिर्यंत्सिद्धान्तं स्थापितम्, यश्च नियमो निर्दिष्टस्तस्यैव परिणामः सम्प्रति इत्थं दृश्यते। अतः सुनिश्चितमिदं तथ्यं यद् वर्तमानकाले या वैज्ञानिकप्रगतिर्विद्यते तस्य मूले प्राचीनकालस्य चिन्तनं, पूर्वप्रतिपादिताः सिद्धान्ताश्च स्थानं लभन्ते।

भौतिकविज्ञानस्य (Physics), खगोलशास्त्रस्य (Astronomy) गणिताद्यन्यज्ञानविज्ञानस्य च सर्वप्रथममन्वेषणं भारतीयैरेव विद्वद्भिः कृतमित्यत्र नास्ति विवादः। वैदिकसंस्कृतिः विश्वस्य न केवलं प्रथमा; अपितु श्रेष्ठतमा संस्कृतिश्चास्तीति सर्वे देशिका वैदेशिकाश्च विद्वांसः आमनन्ति। पुनरपि परमखेदावहोऽयं विषयो यद् वर्तमानविज्ञानस्य प्रगतेः सर्वोऽपि श्रेयः पाश्चात्यानां पक्ष एव स्वीकुर्वन्ति आधुनिकाः।

भारतीयानां खगोलवैज्ञानिकानां कार्याणि ज्ञात्वैव तेषां महत्त्वं वर्तमान-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रगतौ तेषां योगदानञ्च निर्णेतुं शक्यते। कार्यमेतन्न केवलं स्वदेशाभिमानाभिवृद्धये, भारतीयानां मौलिकचिन्तनस्य प्रोत्साहनायाप्यावश्यकमित्यत्र का शङ्का ? खगोलशास्त्रस्य मूलस्वरूपं, तस्यैतिहासिकं क्रमिकविवेचनमपि तदैव ज्ञातुं शक्यते, यदा भारतीयस्य प्राच्य खगोलस्य सम्यग्ज्ञानं भवेत्।

वैदिकं खगोलशास्त्रम् (Astronomy in Vedas)—

सर्वैरेव विद्वद्भिरिदं स्वीक्रियते यद् विश्वस्य प्राचीनतमा संस्कृतिर्वैदिक्येवास्ति। ऋग्वेदोऽत्र प्राचीनतमो ग्रन्थ इति। यद्यपि तत्राध्यात्मिको विषय एव प्रधानाङ्गभूतोऽस्ति, तथाप्याध्यात्मविद्यायाः प्रतिपादने विविधविषयाणां वर्णनमपि तत्र दृश्यते। ऋग्वेदोऽथवा कोऽपि वैदिको ग्रन्थः, खगोलशास्त्रस्य प्रतिपादको नास्ति, पुनरपि तत्र विश्वस्य, अन्तरिक्षस्य, सूर्यादिग्रहपिण्डस्य, नक्षत्राणां च विषये सन्ति तथ्यपूर्णानि वर्णनानि। एतेन वेदप्रणेतॄणां खगोलशास्त्रे चिन्तनस्य, ज्ञानं सञ्जायते। यथात्र विश्वोत्पत्तिविषये—

देवानां नु वयं जाना प्र वोचाम विपन्यया।
उक्थेषु शस्यमानेषु यः पश्यादुत्तरे युगे॥
ब्रह्मणस्पतिरेतासं कर्मार इवाधमत्।
देवानां पूर्व्ये युगेऽसतः सदजायत॥
देवानां युगे प्रथमेऽसतः सदजायतः।
तदाशा अन्वजायन्त तदुत्तानपदस्परि॥
भूर्जज्ञ उत्तानपदो भुव आशा अजायन्त।
अदितेर्दक्षो अजायत दक्षाद्वदितिः परि॥
अदितिर्ह्यजनिष्ट दक्ष या दुहिता तव।
तां देवा अन्वजायन्त भद्रा अमृतवन्धवः॥

(ऋ० सं० १०।७२।१-५)

एभिर्मन्त्रैर्ज्ञायते यत् पूर्वम् असदासीत्, तस्मादसतः सदुत्पत्तिर्जाता। अर्थात् सर्वाभावादेवास्य विश्वस्योत्पत्तिर्मन्यते। सर्वाभावाद् दिक्, तस्माच्च पृथ्वी जाता। अन्यच्च ऋग्वेदे व्याख्यातम्—

ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत।
ततो रात्र्यजायत ततः समुद्रो अर्णवः॥
समुद्रादर्णवादधि संवत्सरो अजायत।
अहोरात्राणि विदधद्विश्वस्य मिषतो वशी॥
सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्।
दिवं च पृथ्वीं चान्तरिक्षमथो स्वः॥

(ऋ० सं०-१०।१९०।१-३)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मन्त्रेऽस्मिन् तपःपूतस्य कस्यापि सत्यस्वरूपस्य पदार्थस्योत्पत्तेरन्तरं कालस्योत्पत्तिः सूच्यते। तमिस्रारात्रिर्यदा जाता तत्पश्चात् समुद्रस्य, ततः कालप्रतिष्ठापकस्य संवत्सरस्याहोरात्रस्य, सूर्याचन्द्रमसोः, दिवः पृथिव्या अन्तरिक्षस्य चोत्पत्तिः क्रमशोऽभूत्। तैत्तिरीयोपनिषदि तु विश्वोत्पत्तिविषये क्रमोऽयं निर्दिष्टो विद्यते—

तस्माद् वा एतस्मादात्मान आकाशः सम्भूतः।
आकाशाद्वायुः वायोरग्निः अग्नेरापः॥
अद्भ्यः पृथिवी पृथिव्या ओषधयः।
ओषधीभ्योऽन्नम् अन्नात् पुरुषः॥
(तैत्तिरीयोपनिषद्, ब्रह्मवल्लीखण्डे—२।१)

अत्रोक्तं यद् विशिष्टशक्तिभूतस्य कस्याप्याद्यशक्तिमतः प्रजापतेः क्रमश आकाश-वाय्वग्नि-जल-भू-वनस्पत्यन्न-मनुष्याणां सृष्टिः प्रादुर्भूता। क्रममिममाधुनिका वैज्ञानिका अपि किञ्चित् परिवर्तनेन सहाङ्गीकुर्वन्ति। किन्तु यथाधुनिका वैज्ञानिका इत्थंभूतस्य कस्यापि पदार्थस्य निर्णये चिन्तिताः सन्ति, तथैव चिन्तनस्यावश्यकतां प्रतिपादयति ऋषिरेकत्र। तद्यथा—

शश्वद् विशः सवितुर्दैव्यस्योपस्थे विश्वा भुवनानि तस्थुः।
तिस्रो द्यावः सवितुर्द्वा उपस्था एका यमस्य भुवने विराषाट्॥
आणिं न रथ्यममृताधि तस्थुरिह ब्रवीतु य उ तच्चिकेतत्[1]।
(ऋ० सं० १।३५।५)

अत्रायमभिप्रायो यत् समस्तस्य विश्वस्य भुवनस्य च प्रकारत्रयं विद्यते। सूर्यस्य (सौरमण्डलस्य) द्वौ, एकश्च यमदैवत्यः (भूः) इत्याख्यः; तथापि सर्वमिदं रहस्यं नाद्यापि कोऽप्यवगन्तुं शक्नोति।

एवमत्र विश्वोत्पत्तिविषये ऋग्वेदस्य धारणा सुस्पष्टतयाऽवगम्यते। ब्रह्माण्डोत्पत्तिविषये यच्चिन्तनं तस्मिन् कालेऽभवत् तदेव साम्प्रतमपि चिन्त्यतेऽत्र न सन्देहः। विश्वसंस्थानस्य विषयेऽत्रैवं स्थापना विद्यते—

नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत।
पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकां अकल्पयन्॥
(ऋ० सं० १०।९०।१४, अथर्व० १९।६।८)

एवमत्र भूमण्डलस्योपर्यन्तरिक्षस्य तथान्तरिक्षादूर्ध्वं द्युलोकस्य स्थितिर्निर्धारिता विद्यते। अन्तरिक्ष एव मेघादयो भवन्ति। द्युमण्डले तु ग्रहनक्षत्राणि देवाश्च वर्तन्त इति तेषां मतम्।

---

१. तै० ब्रा०—३।११।१।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विश्वस्यापारत्वं तस्यासीमतायाश्च निरूपणम् ऋग्वेदेऽत्र प्रतिपादितम्—

यदिन्विन्द्र पृथिवी दशभुजिरहानि विश्वा ततनन्त कृष्टयः ।
अत्राह ते मघवन् विश्रुतं सहो द्यामनु शवसा बर्हणा भुवत् ॥
(ऋ० सं० १।५२।११)

अस्यायमभिप्रायोऽस्ति यद् भूमण्डलादनन्तगुणितं विश्वमण्डलं विद्यते। तैत्तिरीयारण्यकस्य (३।११।१) अनुवाकेऽस्यैव विचारस्य परिपोषणं विद्यते। एवमेवात्रानन्तस्यास्य ब्रह्माण्डस्य सीमापरिमापणमस्माभिः कर्तुं न शक्यत इति विचारितमस्ति ।

एवमेव वैदिकसाहित्ये सूर्यस्य प्रधानता तस्य केन्द्रीयता, ऋतोर्निर्माणे जनकतादिकञ्च स्वीकृतमस्ति[1] । वायोः कारणं सूर्य एवास्तीति मतम् । तद्यथा—

"सवितारं यजति यत्सवितारं यजति तस्मादुत्तरतः पश्चादयं
भूयिष्ठं पवमानः पवते सवितृप्रसूतो ह्येष एतत्पवते" ।
(ऐ० ब्रा० २।७)

सूर्यस्य सप्तरश्मयः--

सम्प्रति रविकिरणानां विश्लेषणेन तेषु सप्तरङ्गात्मकानि सप्तकिरणानि सन्तीति प्रमाणितम् । ऋग्वेदे तस्मिन्नेव काले सूर्यस्य सप्तकिरणानां सुस्पष्टं वर्णनं विद्यते[2] । केचित्तु सूर्यस्य सप्ताश्वान् निर्दिश्य तन्मतमवैज्ञानिकं मन्यन्ते, तन्नोचितम् । यतो हि ऋग्वेद एव प्रतिपादितमस्ति यत् सूर्योऽश्वादिरहितः स्वशक्त्यैव तिष्ठति । यथात्रोक्तं मन्त्रे—

अनश्वो जातो अनभीशुरर्वा कनिक्रदत् पतयदूर्ध्वसानुः ।
(ऋ० सं० १।१५२।५)

भूरियं गोलाकारा, निराश्रिता, निराधारा च तिष्ठति । शून्याकाशे तस्या विद्यमानता विद्यते इति वैज्ञानिकं तथ्यम् ऋग्वेदकाले स्पष्टमासीत् । यथाऽत्र प्रमाणम्—

चक्राणासः परीणहं पृथिव्या हिरण्येन मणिना शुम्भमानाः ।
न हिन्वानासस्तितिरुस्त इन्द्रं परि स्पशो अदधात् सूर्येण ॥
(ऋ० सं० १।३३।८)

सूर्योदयस्य सूर्यास्तस्य च वास्तविकी सत्ता नास्ति, वस्तुतो न कदापि सूर्य उदेति न वाऽस्तं गच्छति, स तु सदैव यथावत् तिष्ठतीति हेतोः सूर्यस्य विषये, भूमेर्विषये च वैज्ञानिकं ज्ञानं प्राप्यते । तथात्र मन्त्रे द्रष्टव्यम्—

१. ऋ० सं० १।९५।३ ; २. तत्रैव—१।१०५।९, ८।७२।१६ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स वा एष न कदाचनास्तमेति नोदेति तं यदस्तमेतीति
मन्यन्तेऽह्न एव तदन्तमित्वाथात्मानं विपर्यस्यते रात्रिमेवावस्तात्
कुरुतेऽहः परस्तादथ यदेनं प्रातरुदेतीति मन्यन्ते
रात्रेरेव तदन्तमित्वाथात्मानं विपर्यस्यतेऽहरेवास्तात् ।
कुरुते रात्रिं परस्तात् स वा एष न कदाचन निम्लोचति ।
(ऐ० ब्रा० १४।६)

मन्त्रेऽस्मिन् "चक्राणातः परीणहम्" इत्यनेन चक्राकारत्वं गोलत्वम्, परिणहं, परिधिश्च स्पष्टरूपेणोक्तं विद्यते ।

एवमत्र जगदुत्पत्तेः, सृष्टिसंस्थानस्य, विश्वस्य विकासस्य च यथा पूर्णं वर्णनं वेदेषु कृतमस्ति तन्मयोपस्थापितमत्र ।

कालमानम्—

कालगणनायां युग-संवत्सर-वर्ष-अयन-ऋतु-मास-तिथि-दिन-दिनमान-मुहूर्त-कला-विषुवादीनां कालमानानां समुल्लेखः प्राप्यते वेदकालिकसाहित्ये । अधुनापि येषां कालमापकमानकानामुपयोगो भवति, त एव तदाप्यासन्निति तत्रान्वेषणेन प्रतीयते ।

युगम्—

कालस्य कस्यापि मानस्य निर्धारणे युगशब्दस्य प्रयोग ऋग्वेदे दृश्यते । अधुना युगशब्दकथनेन यस्य विशिष्टकालबोधकशब्दस्यार्थो गृह्यते, तथैव तस्मिन्नपि ऋग्वेदकाले युगशब्दस्य प्रचलनमासीत् । यथात्रोक्तमृग्वेदे—

युगे युगे विदथ्यं गृणद्भ्योऽग्नेरयिं यशसं धेहि नव्यसीम् ।
(ऋ० सं० ६।८।५)

विश्वे ये मानुषा युगा पान्ति मर्त्यं रिषः ।
अर्हन्तो ये सुदानवो नरो असामिशवसः ।। (ऋ० सं० ५।५२।४)

तदूचुषे मानुषेमा युगानि कीर्तेन्यं मघवा नाम बिभ्रत् ।
उपप्रयन् दस्युहत्याय वज्री यद्ध सूनुः श्रवसे नाम दधे ।।
(ऋ० सं० १।१०३।४)

या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा ।
मनै नु बभ्रूणामहं शतं धामानि सप्त च ।।
(ऋ० सं० १०।९७।१)

एषु मन्त्रेषु युगशब्दस्य प्रयोगः कालबोधकार्थ एव कृतोऽस्ति । अत्र "त्रियुगं पुरा" इत्यस्य सायणाचार्येण कृत-त्रेता-द्वापर इति युगत्रयस्य अर्थो मन्यते ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मन्त्रोऽयं तैत्तिरीयसंहितायां, वाजसनेयिसंहितायाम् (१२।७५) अप्युल्लिखितोऽस्ति। अस्य भाष्ये महीधरस्तु वसन्तवर्षाशरदृतूनां ग्रहणमकरोत्। ज्योतिषसिद्धान्तग्रन्थेषु ४३२००० वर्षात्मकं युगं मन्यते। वैदिककाले युगशब्देनेयमेव वर्षसंख्या गृह्यते स्म, न वेति वक्तुं न शक्यते, तथापि युगशब्दस्य प्रयोगस्तु कालसमूहस्य कृत एवास्ति नात्र सन्देहः। तैत्तिरीयसंहितायां कृतत्रेताद्वापरयुगानां वर्णनं विद्यते[1]। वाजसनेयिसंहितायामपि कृतादीनि त्रीणि युगानि सन्ति[2]। तैत्तिरीयब्राह्मणे तु कृतत्रेताद्वापरकलियुगानां चतुर्णामपि वर्णनं विद्यते। ऐतरेयब्राह्मणेऽपि तथैव यथा—

"कृताय सभाविनं। त्रेताया आदिनवदर्शम्। द्वापराय बहिः सदम्। कलये सभास्थाणुम् ॥" (तै० ब्रा० ३।४।१) इति।

कलिः शयानो भवति सञ्जिहानस्तु द्वापरः। उत्तिष्ठंस्त्रेता भवति कृतं सम्पद्यते चरंश्चरैवेति चरैवेति (ऐ० ब्रा० ३३।१५)।

वेदाङ्गज्योतिषे पञ्चवर्षात्मकं युगं स्वीकृतम्। तत्रैकस्मिन् युगे संवत्सर–परिवत्सर–इदावत्सर–अनुवत्सर–इद्वत्सरेति वर्षाणि भवन्ति। ऋग्वेदेऽपि संवत्सरपरिवत्सरयोर्नामोल्लेखो विद्यते[3]। वाजसनेयिसंहितायां वर्षाणां नामोल्लेख एवं विद्यते—संवत्सरोऽसि परिवत्सरोऽसीदावत्सरोसीदवत्सरोसि वत्सरोसि।

(वा० सं० २६।४५)

वर्षम्—वर्षशब्दस्य सामान्यार्थस्तु द्वादशमासान्तर्गतकालस्य वाचकोऽस्ति। ऋग्वेदे शरदाद्यृतुवाचकशब्दा अप्युक्ताः सन्ति; किन्तु ऋग्वेदे यजुर्वेदे वा द्वादशमासात्मकस्य वर्षशब्दस्य वर्णनं नास्ति, किन्तु ऋग्वेदे समाशब्दो वर्षशब्दस्यार्थे विद्यते, यथा—

यत् त्वा देव प्रपिबन्ति तत आ प्यायसे पुनः।
वायुः सोमस्य रक्षिता समानां मास आकृतिः॥

(ऋ० सं० १०।८५।५)

अयमेव समाशब्दो वाजसनेयिसंहितायामप्यागतोऽस्ति[4]। अत्रेदं ज्ञातव्यं यद् द्वादशमासात्मके वर्षे यस्य मासस्य ग्रहणं क्रियते, स मासश्चान्द्र एवासीत्। एकस्मिन् वर्षे द्वादशा एव मासा अभून्निति प्रमाणम् ऋग्वेदे प्राप्यते।

मासः—

द्वादश मासा भवन्ति इति ऋग्वेदे एवमुक्तं विद्यते। यथा—

---

१. तैत्तिरीयसंहिता—४।३।३; २. वाजसनेयिसंहिता—३०।१८।
३. ऋ० सं० ७।१०३।७; ४. वा० सं० १९।४६ ; ४०।२।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

"वेदमासो धृतव्रतो द्वादश प्रजावतः । वेदा य उपजायते[१] ।"

"द्वादशारं न हि तज्जराय वर्वर्ति चक्रं परिद्यामृतस्य ।
आ पुत्रा अग्ने मिथुनासो अत्र सप्त शतानि विंशतिश्च तस्थुः[२] ॥"

"द्वादश प्रधयश्चक्रमेकं त्रीणि नभ्यानि क उ तच्चिकेत ।
तस्मिन्त्साकं त्रिशता न शङ्कवोऽर्पिताः षष्टिर्न चलाचलासः[३]॥"

एकस्मिन् वर्षे ३६० दिनानि भवन्तीत्यस्य स्पष्टोल्लेखः ऋग्वेदे प्राप्यते । उपरि प्रदर्शितस्य "द्वादशप्रधयश्चक्रमेकम्" इत्यादिमन्त्रेण ज्ञायते यद् एकस्मिन् वर्षे द्वादशमासास्तथैकस्मिन् मासे त्रिंशद् दिनानि, वर्षे च ३६० दिनानि भवन्ति ।

ते द्वादशमासाः के के भवन्तीति तैत्तिरीयसंहितायां विद्यते । मधु–माधव–शुक्र–शुचि–नभस्–नभस्य–इष–ऊर्ज–सहस्–सहस्य–तपस–तपस्येति द्वादशमासा वर्षान्तर्गते भवन्तीति । यथात्र—

"मधुश्च माधवश्च शुक्रश्च शुचिश्च नभश्च नभस्यश्चेषश्चोर्जश्च सहश्च सहस्यश्च तपश्च तपस्यश्चोपयाम गृहीतोऽसि स सर्पोऽस्य हस्पत्याय त्वा[४] ॥"

वर्षे षड्तवो भवन्ति, प्रचलितभारतीयपरम्परायामप्यस्ति किल ऋतुव्यवस्थया । त एव षड्तवो वैदिककालेऽप्यासन् । एतेषां नामानि तैत्तिरीयसंहितायामेवं सन्ति—

"षड् रात्रिर्दीक्षितः स्यात् षड् वा ऋतवः संवत्सरः[५] ।"

"मधुश्च माधवश्च वासन्तिकावृत् शुक्रश्च शुचिश्च ग्रैष्मावृत् नभश्च नभस्यश्च वार्षिकावृत् इषश्चोर्जश्च शरदावृत् सहश्च सहस्यश्च हैमन्तिकावृत् तपश्च तपस्यश्च शैशिरावृत्[६] ।" इति ।

मासविचारे महत्त्वपूर्णोऽयं विषयः समागच्छति यद् वैदिककालेऽधिमासस्य ज्ञानं पूर्णतयाऽऽसीत् । एतेनेदमपि ज्ञायते यत् सौरवर्षस्य गणना तैः सम्यक् क्रियते स्म । अतो मासगणनायां त्रयोदशमासस्य समुल्लेखः प्राप्यते । प्राचीनतमे रोमनराष्ट्रे तु दश मासा एव गण्यन्ते स्म । वैदिकर्षयः सूर्यचन्द्रयोर्निरीक्षणेन क्षयमासस्याधिमासस्य निर्धारणं कृतवन्त इत्यत्र तेषां प्रचुरपाण्डित्यविषये खगोलीयज्ञाने च कः सन्देहः ।

वाजसनेयिसंहितायां "मलिम्लुच", "अहंस्पति" शब्दयोः प्रयोगो विद्यते । अत्राऽधिमासशब्दस्यार्थे मलिम्लुचशब्दस्तथा क्षयमासस्यार्थे अहंस्पतिशब्दो गृह्यते । यथाऽत्र व्यासवाक्यम्—

१. ऋ० सं० १।२५।८; २. ऋ० सं० १।१६४।११ ।
३. ऋ० सं० १।१६४।४८; ४. तै० सं० १।४।१४ ।
५. तै० सं० ५।६।७; ६. तै० सं० ४।४।११ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

"रविणा लङ्घितो मासश्चन्द्रः ख्यातो मलिम्लुचः ।"

अथास्मिन् विषये मैत्रे सूत्रे इत्थं व्याख्यातम्—

"मासद्वये यदाप्येकराशिं संक्रमेतादित्यस्तत्रायं मलिम्लुचः शुद्धोऽन्यः ।"

नारदसंहितायां संसर्पेऽधिमासार्थे, अहस्पतिः क्षयमासार्थे चोक्तोऽस्ति । यथा—

"असंक्रान्तिद्विसंक्रान्तिसंसर्पाहंस्पति समौ" इति ।

अस्योल्लेख ऋग्वेदे विद्यते यद् द्वादशमासानन्तरं यो मासः समुत्पद्यते, तमपि ते जानन्ति स्म[1] ।

मलिम्लुचशब्दस्य अहंस्पतेश्च वाजसनेयिसंहितायां वर्णनं विद्यते । तद्यथा—"संसर्पाय स्वाहा चन्द्राय स्वाहा ज्योतिषे स्वाहा मलिम्लुचाय स्वाहा दिवापतये स्वाहा[2]" ॥

"मधवे स्वाहा माधवाय स्वाहा शुक्राय स्वाहा शुचे स्वाहा नभसे स्वाहा नभस्याय स्वाहेषाय स्वाहोर्जाय स्वाहा सदृशे स्वाहा सहस्याय स्वाहा तपसे स्वाहा तपस्याय स्वाहा हँसपतये स्वाहा[3] ॥"

एवं प्रमाणेनात्र वैदिककाले क्षयमासाधिमासस्य पूर्णज्ञानं संसूच्यते । खगोलशास्त्रस्य पूर्णाधारस्य प्रतिष्ठापनं तदासीदिति निश्चप्रचं सिद्धचति ।

वसन्तादिषडृतूनां वर्णनमपि वेदेषु विद्यते । केवलम् ऋग्वेद एव तस्य चर्चा नास्ति, किन्त्वन्येषु वैदिकग्रन्थेषु च तस्य वर्णनमस्ति । तैत्तिरीयसंहितायामृतूनां[4] प्रसङ्गो विशेषतया प्राप्यते । हेमन्तशिशिरयोः सम्मेलनेन पञ्चर्तूणामप्युल्लेखो विद्यते । तद्यथा—"द्वादश मासाः पञ्चर्तवो हेमन्तशिशिरयोः समासेन" ।

(ऐ० ब्रा० १।१)

वसन्तर्तावेव तावद् ऋत्वारम्भस्य परम्परा वैदिककालेऽप्यासीत् । सैव परम्पराऽद्यापि प्रचलिताऽस्ति । यथात्र प्रमाणम्—"मुखं वा एतदृतूनां यद् वसन्तः[5]" । एवञ्च तस्य ते संवत्सरस्य वसन्तः शिरः, ग्रीष्मो दक्षिणः पक्षः । वर्षा पुच्छं । शरदुत्तरः पक्षः । हेमन्तो मध्यम्[6] ।

"उभयतो मुखमृतुपात्रं भवति को हि तद्वेद यदृतूनां मुखम्"(तै०सं ६।५।३)।

प्रचलितफाल्गुन-चैत्रादिमासानामुल्लेखस्तु वेदे नास्ति, तत्र तु मधुमाधवादिसंज्ञका मासाः सन्ति । नक्षत्रैः साकं चन्द्रः पूर्णो भवतीति विवेचितं विद्यते ।

१. ऋ० सं० १।२५।८ ; २. वा० सं०—२२।३०; ३. तत्रैव २२।३१ ।
४. तै० सं०—४।३।२, ५।६।२३, ७।५।४; ५. तै० ब्रा०—१।१।२।६, ७ ।
६. तत्रैव-३।१०।४।१ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तैत्तिरीयसंहितायां[1] 'फल्गुनीपूर्णमासे दीक्षेरन् मुखं वा एतत्", "चित्रापूर्णमासे दीक्षेरन् मुखं वा एतत्संवत्सरस्य" इत्यनेन चित्रानक्षत्रयुतस्य, फल्गुनीनक्षत्र-युतस्य च चन्द्रस्य पूर्णत्वे सति पूर्णमासकथनं चन्द्रस्य नक्षत्रेण सह पूर्णताया ज्ञानस्य स्पष्टीकरणं जायते। एवमेव शतपथब्राह्मणे[2], गोपथब्राह्मणे[3] च पूर्णिमायाः समुल्लेखोऽस्ति।

सम्प्रति भारतवर्षे मासान्तः पूर्णिमायाम्, अमावास्यायां च प्रचलति। उत्तरे भारते पूर्णिमान्तमासो दक्षिणप्रदेशेषु चामान्तो मासः प्रचलति। वैदिक-कालेऽप्युभे अपि प्रथे दृश्येते। पूर्णिमान्तविषयेऽत्रोल्लेखः—

बर्हिषा पूर्णमासे व्रतमुपैति वत्सरे मावस्यायाम्॥ (तै० सं० १।५।७)

अमान्ते मासन्तस्य मान्यताया विषयेऽपि तैत्तिरीयसंहितायामेवं[4] वर्णनं दृश्यते।

कृष्णपक्षस्य शुक्लपक्षस्य च क्रमिकवर्णनेन प्रथमं कृष्णपक्षस्य पश्चाच्च शुक्लपक्षस्य ग्रहणेन च पूर्णिमान्तमासस्यैव प्राधान्यं दृश्यते। यथात्र—

मासो वै प्रजापतिः। तस्य कृष्णपक्ष एव रविः शुक्लः प्राणः[5]।

कुत्रचिच्च शुक्ल-कृष्णस्य कृते पूर्वापरशब्दस्यापि कथनमस्ति। तथा हि शुक्लपक्षे देवाः, कृष्णपक्षे चासुरा भवन्तीति प्रतिपादितम्। यथा हि—

"पूर्वपक्षं देवाश्वासृज्यन्त। अपरपक्षमन्वसुराः।
"ततो देवा अभूवन्। परासुराः।" (तै० ब्रा० २।२।३।१)
"पूर्वपक्षाश्चितयः। अपरपक्षाः पुरीषम् (तै० ब्रा० ३।१०।४।१)।

दिनम्—वैदिककाले सावनदिनस्योपयोगः सर्वत्र दृश्यते। शुक्लपक्षस्य पञ्चदशदिनानां पञ्चदशरात्रीणां तथा च कृष्णपक्षस्यापि पञ्चदशदिनानां पञ्चदश-रात्रीणाञ्च पृथक् पृथङ् नामानि निर्धारितान्यासन्। यथात्र तैत्तिरीयब्राह्मणे समुल्लेखः—"संज्ञानं विज्ञानं प्रज्ञानं जानदभिजानत्। संकल्पमानं प्रकल्पमान-मुपकल्पमानमुपक्लृप्तं क्लृप्तं। श्रेयोवसीय आयत् सम्भूतं भूतम्"।

(तै० ब्रा० ३।१०।१।१)

एतानि पञ्चदशनामानि शुक्लपक्षीयदिवसानां सन्ति। एवमेव शुक्लपक्षीय-रात्रीणां मानमपि विद्यते[6]। कृष्णपक्षस्य दिवसस्य रात्रेश्च नामानि तत्रैव तैत्तिरीय-

---

१. तै० सं० ७।४।८; २. शत० ब्रा०–५।२।२१८।
३. गो० ब्रा० –५।१९; ४. तै० सं०–७।५।५।१।
५. अथर्ववेदे; ६. तै० ब्रा०—३।१०।१।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ब्राह्मणे[1] विद्यन्ते। कृष्णान्तस्य रात्रिरमावस्या शब्देन, शुक्लान्तस्य रात्रिश्च पौर्णमासीशब्देन निर्दिष्टा वर्तते।

प्रतिपदादितिथयस्तु वेदे न प्राप्यन्ते। तिथिशब्दस्य विवेचनं च ब्राह्मण एवमस्ति—"यां पर्यस्तमियादभ्युदियादिति सा तिथिः" इति।

अर्थाच्चन्द्रस्योदयास्तकालो नाम तिथिरित्यभिहितान्। पूर्णिमाया अमावास्यायाश्च कृते "पञ्चदशी" शब्दस्याभिधानमपि विद्यते। एतेन ज्ञायते यद् एकादिगणनया पञ्चदशदिवसे पूर्णिमा, पञ्चदशदिवसे चामावस्या भवतीति दृष्ट्वैव तदभिधानमेवं कृतम्। यथा—चन्द्रमा वै पञ्चदशः। एष हि पञ्चदश्यामपक्षीयते। पञ्चदश्यामारभ्यते[2]। कृष्णचतुर्दशी--कृष्णपञ्चमी-शुक्लचतुर्दशीति शब्दानां प्रयोगोऽपि प्राप्यते[3]।

मन्ये एवमेवैकादिसंख्या-गणनायां सुबोधतया सरलतया च कथनेन प्रतिपदादितिथीनां प्रचलनमपि क्रमशो जातम्।

चन्द्रप्रकाशे सूर्यस्य कारणत्वम्—

चन्द्रमण्डले यः प्रकाशो दृश्यते, तस्य कारणं चन्द्रो नास्ति। वस्तुतस्तु चन्द्रे नास्ति कोऽपि प्रकाशः। रात्रौ चन्द्रबिम्बात् प्राप्तानि किरणानि प्रकाशितस्य चन्द्रस्य न भवति, अपि तु सूर्यस्य किरणानि यदा चन्द्रबिम्बोपरि पतन्ति, तदा चन्द्रः प्रकाशितो भवति। सूर्यकिरणाश्चन्द्रबिम्बान् प्रत्यावर्तिता अस्माभिश्चन्द्रकिरणरूपेण दृश्यन्ते। इयं परीक्षणैः प्रमाणितं वैज्ञानिकं तथ्यं वैदिककाले सुविज्ञातमासीदिति तेषां खगोलविज्ञाने पूर्णज्ञानस्य प्रमाणम्। यथा च तैत्तिरीयसंहितायाम्—"सूर्यरश्मिश्चन्द्रमा गन्धर्वः[4]"।

पूर्णिमायां चन्द्रबिम्बस्य सम्पूर्णप्रकाशस्य कारणं सूर्यबिम्बस्य सम्मुखे चन्द्रबिम्बस्य स्थितिर्भवति। अमावस्यायां सूर्येण सह चन्द्र एकस्यामेव रेखायां भवति, अतः प्रकाशाभावाद् रात्रौ चन्द्रस्यादर्शनम् अर्थात् चन्द्रविहीना रात्रिर्जायते। अमावस्याशब्दस्य व्युत्पत्तिरपि "अमा सूर्येण सह वसते" इत्यमावस्याशब्दः। इदं वैज्ञानिकतथ्यमपि स्पष्टतया प्रतिपादितं विद्यते वैदिकवाङ्मये। यथा—"एष वै सोमो राजा देवानामन्नं यच्चन्द्रमाः स यत्रैष एतां रात्रिं न पुरस्तान्न पश्चाद्ददृशे तदिमं लोकमागच्छति स इहैवापश्चोषधीश्च प्रविशति स वै देवानां वस्वन्न् हृयेषां तद्यदेष एतां रात्रिमिहामावसति तस्मादमावस्या नाम[5]"।

---

१. तत्रैव—३१०।१।२,३ ; २. तै० ब्रा०—१।५।१०।
३. सामविधानब्राह्मणे—२।५, १।३ ; ४. तै० सं०—३।४।७।१।
५. शत० ब्रा०—१।५।४।५।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

चन्द्रमा अमावास्यायामादित्यमनुप्रविशति–"आदित्याद्वै चन्द्रमा जायते[१]।"

सूर्यचन्द्रमसोर्गतिनिर्धारणेनैवामावस्यायाः, पूर्णिमाया अथवा कस्या अपि तिथेर्ज्ञानं कर्तुं शक्यते। यतो रविचन्द्रयोर्द्वादशमासान्तरेणैका तिथिः समुत्पद्यते। एवं तिथि रविचन्द्रयोर्गत्याधारिता भवति। यतो वैदिकसाहित्ये तासां तिथीनामुल्लेखो विद्यते, तेन निश्चितमेव रविचन्द्रयोरुभयोस्तासां गतिर्ज्ञानं वैदिककाले चासीदिति।

अमावस्या पूर्णिमा च पर्वशब्देन सम्बोधिते विद्येते। तयोः पर्वसन्ध्योर्ज्ञानं गतिज्ञानाभावान्न ज्ञातुं शक्यते। पर्वसन्ध्योर्यज्ञस्य विधानमासीद् वैदिके युगे। तद्यथा—"सन्धौ यजेत, सन्धिमभितो यजेत"।

एवं कथनेन रविचन्द्रयोर्गतेर्ज्ञानं सुस्पष्टम्। किञ्च, दिवसस्य वृद्धिर्निम्नता च तस्मिन् वैदिककाले ज्ञाते आस्ताम्। एवं सिध्यति यत् सम्प्रति प्रचलितदिनमानस्य ज्ञानं तैर्वैदिकमहर्षिभिः कृतमासीत्। तथा चाधोलिखितमन्त्रेणास्य पुष्टिर्जायते—

इषिरेण ते मनसा सुतस्य भक्षीम हि पित्र्यस्येव रायः।
सोम राजन् प्र ण आयूंषि तारीरहानीव सूर्यो वासराणि[२] ॥

विषुवद्दिवसः—

खगोलशास्त्रे विषुवत्कालस्य महत्त्वं सर्वाधिकं भवति। यस्मिन् समये विषुवद्वृत्ते सूर्यो भवति, तस्मिन् काले दिनरात्रिमानं समानं जायते। अस्य कालस्य निर्धारणं सुमहत्प्रयत्नेन क्रियते। वैदिककालेऽस्य विषुवत्कालस्य ज्ञानमासीदिति तत्रोल्लेखेन वक्तुं शक्यते। यथात्र प्रसङ्गे—'यथा वै पुरुष एवं विषुवांस्तस्य यथा दक्षिणोर्ध एवं पूर्वार्धो विषुवतो यथोत्तरोर्ध एवमुत्तरोर्धो विषुवतस्तस्मादुत्तर इत्याचक्षते प्रबाहुक्सतः शिर एव विषुवान्[३]'।

"सन्ततिर्वा एते ग्रहाः। यत्परः समानः। विषुवान् दिवा कीर्त्यं। यथा शालायै पक्षसी। एवं संवत्सरस्य पक्षसी[४]।

दिनस्य पूर्वाह्ण-मध्याह्न-अपराह्ण-सायाह्नेति चत्वारो विभागाः (चत्वारः प्रहराः) वैदिकसाहित्ये[५] निर्धारिताः सन्ति। दिवसस्य १५ मुहूर्तानां, रात्रेश्च पञ्चदशमुहूर्तानां नामानि प्रस्तुतानि तैत्तिरीयब्राह्मणे[६]।

मुहूर्तस्यापि सूक्ष्मभागस्य प्रतिमुहूर्तम् इति संज्ञाऽस्ति। एकस्मिन् मुहूर्ते

१. ऐ० ब्रा०—४०।५;
२. ऋ० सं० ८।४८।७।
३. ऐ० ब्रा०—१८।२२;
४. तै० ब्रा०—१।२।३।
५. तै० ब्रा०–३।१२।९।१, श० ब्रा०—२।४।२।८;
६. तै०ब्रा०–३।१०।१–९।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पञ्चदश प्रतिमुहूर्ता भवन्ति । यथा—"अथ यदाह । इदानीं तदानीमिति । एष एव तत् । एष ह्येव ते मुहूर्तानां मुहूर्ताः ।" (तै० ब्रा०-३।१०।९।९)

"इदानीं तदानीमेतर्हि क्षिप्रमजिरम् । आशुर्निमेषफणिद्रवन्नति द्रवन् । त्वरस्त्वरमाण आशुरथीयान् जवः ।" (तै० ब्रा०—३।१०।१।४)

एते पञ्चदशप्रतिमुहूर्ता भवन्ति । कलाकाष्ठादिसूक्ष्मकालस्य विवेचनमपि विद्यते, नारायणोपनिषदि[१] ।

नक्षत्राणि—

नभोमण्डले ग्रहातिरिक्तस्य प्रकाशमानपिण्डस्य नक्षत्रसंज्ञा भवतीति सामान्यधारणायाः प्रचलनम् ऋग्वेदादेव प्राप्यते । ऋग्वेदे एवं वर्णितं यत् सूर्यस्योदयकाले नक्षत्राणि रात्रिश्च चौरवत् पलायन्ते[२] ।

सप्तविंशतिनक्षत्राण्यृग्वेदे न वर्णितानि । तत्र तिष्य (पुष्य)-चित्रा-रेवती-मघा-फल्गुनीत्येतेषां स्पष्टोल्लेखो विद्यते[३] । तैत्तिरीयब्राह्मणे नक्षत्राणां विषय एवं व्याख्यातम्—

"प्राहुर्वा अग्रे क्षत्राण्यातेषुः । तेषामिन्द्रः क्षत्राण्यादत्त ।
न वा इमानि क्षत्राण्यभूवन्निति । तन्नक्षत्राणां नक्षत्रत्वम्[४] ।।"

अत्रायमभिप्रायो यद् यः क्षताभावपदार्थरूपस्तन्नक्षत्रम् । यस्य क्षतिर्न भवति, तन्नक्षत्रम् । निरुक्ते तु–"नक्षत्राणि नक्षतेर्गतिकर्मणः", "नेमानि क्षत्राणीति च ब्राह्मणम्" । एवं नक्षत्रशब्दस्य व्युत्पत्तिर्व्याख्याता ।

तैत्तिरीयब्राह्मणे तारकाणां व्याख्या त्वेवं कृता विद्यते- "सलिलं वा इदमन्तरासीत् । यत्तरन्, तत्तारकाणां तारकत्वम् ।" तत्रैव नक्षत्राणां विषये—"अमुं सलोकं नक्षते, तन्नक्षत्राणां नक्षत्रत्वम् । देवगृहा वै नक्षत्राणि" (१।५।२) ।

एवमेव नक्षत्राणां विषय ऋक्संहितायां विविधवर्णनमस्ति । पुनर्वसुरग्नेः कारणम्,[५] रेवती धनवती,[६] चित्रामघा वाजनीवती सूर्यस्य योषा, इत्यादिकं नक्षत्राणां गुणधर्मस्य कथनमस्ति । ऐतरेयब्राह्मणे रोहिणी-मृगमृगव्याधस्य च कथा सुललिता विद्यते । सैव कथा किञ्चित्परिवर्तितास्ति तैत्तिरीयब्राह्मणे । नक्षत्राणां व्युत्पत्तिर्ब्राह्मणग्रन्थेषु प्रचुरतया कृताऽस्ति । सप्तर्षीणां विषयेऽप्याख्यानमुपलभ्यते ।

---

१. नारायणोपनिषद्–अनु० १; २. ऋ०सं०–१।५०।२, अथर्व०–१३।२।१७,२०।४७।१४ ।
३. ऋ०सं०–५।५४।१३, १०।५४।८, ४।५१।४७; ४. तै०ब्रा०–२।७।१८।३ ।
५. ऋ०सं०–१०।१९।१; ६. ऋ०सं०–५।५१।१४ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अश्विन्यादिसप्तविंशतिनक्षत्राणां विषये य उल्लेखोऽस्ति, सोऽत्र कोष्ठे स्थाप्यते। शतपथब्राह्मणे, तैत्तिरीयसंहितायाम्, तैत्तिरीयब्राह्मणे, अथर्ववेदे च नक्षत्राणां नामानि क्वचित् समानानि, क्वचिच्चासमानानि सन्ति। सारणीयकद्वारा नक्षत्राणामधिपतिः, लिङ्गनिर्देशः, वचनञ्च विलिख्य प्रदर्श्यंते।

वेदकालिक-नक्षत्राणि

क्र० सं०	नक्षत्रनाम	देवता	लिङ्गम्	वचनम्
१.	कृत्तिका	अग्निः	स्त्री०	बहुवचनम्
२.	रोहिणी	प्रजापतिः	स्त्री०	एकवचनम्
३.	मृगशीर्षः	सोमः	नपुं०	एकवचनम्
	इन्वका	सोमः	स्त्री०	बहुवचनम्
४.	आर्द्रा	रुद्रः	स्त्री०	एकवचनम्
	बाहू	रुद्रः	पुं०	द्विवचनम्
५.	पुनर्वसुः	अदितिः	पुं०	द्विवचनम्
६.	तिष्यः	बृहस्पतिः	पुं०	एकवचनम्
७.	आश्लेषा	सर्पः	स्त्री०	बहुवचनम्
८.	मघा	पितृ०	स्त्री०	बहुवचनम्
९.	फल्गुनी	अर्यमा	स्त्री०	द्विवचनम्
	पूर्वफल्गुनी	अर्यमा	स्त्री०	द्विवचनम्
१०.	फल्गुनी	भगः	स्त्री०	द्विवचनम्
	उत्तरफल्गुनी	भगः	स्त्री०	द्विवचनम्
११.	हस्तः	सविता	पुं०	एकवचनम्
१२.	चित्रा	इन्द्रः (त्वष्टा)	स्त्री०	एकवचनम्
१३.	स्वाती (निष्ट्या)	वायुः	स्त्री०	एकवचनम्
१४.	विशाखा	इन्द्राग्नी	स्त्री०	द्विवचनम्
१५.	अनुराधा	मित्रः	स्त्री०	बहुवचनम्
१६.	रोहिणी, ज्येष्ठा	इन्द्रः	स्त्री०	एकवचनम्
१७.	(१) विचृतौ	पितृ	पुं०	द्विवचनम्
	(२) मूलबर्हणी	निर्ऋतिः	स्त्री०	एकवचनम्
	(३) मूलम्	निर्ऋतिः	नपुं०	एकवचनम्
१८.	आषाढा	आपः	स्त्री०	बहुवचनम्
	पूर्वाषाढा	आपः	स्त्री०	बहुवचनम्

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

१९.	आषाढा	विश्वेदेवाः	स्त्री०	बहुवचनम्
	उत्तराषाढा	विश्वेदेवाः	स्त्री०	बहुवचनम्
	अभिजित्	ब्रह्म	नपुं०	एकवचनम्
२०.	श्रोणा	विष्णुः	स्त्री०	एकवचनम्
२१.	श्रविष्ठा	वसु०	स्त्री०	बहुवचनम्
२२.	शतभिषक्	इन्द्रः (वरुणः)	पुं०	एकवचनम्
२३.	प्रोष्ठपदम्	अजएकपाद्	पुं०	बहुवचनम्
२४.	पूर्वप्रोष्ठपदम्	अजएकपाद्	पुं०	बहुवचनम्
२५.	प्रोष्ठपदम्	अहिर्बुध्न्यः	पुं०	बहुवचनम्
	उत्तरप्रोष्ठपदम्	अहिर्बुध्न्यः	पुं०	बहुवचनम्
२६.	रेवती	पूषा	स्त्री०	एकवचनम्
२७.	अश्वयुज्	अश्विन्	स्त्री०	द्विवचनम्
२८.	अपभरणी	यमः	स्त्री०	बहुवचनम्

ग्रहाः—

ग्रहाणां विषय ऋग्वेदकालादेव सूक्ष्मज्ञानस्य परम्पराऽऽयाति । रविचन्द्रयोर्विषये विविधस्थलेष्वृग्वेदे चर्चा विद्यते । राहुकेतू विहाय भौमादिपञ्चग्रहाणां विषय ऋग्वेदे स्पष्टतयोल्लेखो विद्यते । बृहस्पतेर्विषये मन्त्रोऽयम्—"बृहस्पतिः प्रथमञ्जायमानो महो ज्योतिषः परमे व्योमन् ।"

(अथर्व० २०।८८।४, ऋ० सं० ४।५०।४)

शुक्रस्य "वेन"संज्ञया तत्रोदाहृतमस्ति मन्त्रः, यथा—"अथ वेनश्चोदयत् पृश्निगर्भाज्योतिर्जरायू रजसो विमाने ।" (ऋ० सं० १०।१२।३)

शतपथब्राह्मणे[1], तैत्तिरीयसंहितायामपि शुक्रस्य विषय एवमेवोक्तम् ।

उल्का, धूमकेतुः—

अथर्ववेद उल्का-धूमकेत्वोश्च विषये नामग्रहणपूर्वकमुल्लेखो वर्तते । यथात्र मन्त्रः—

"उत्पाताः पार्थिवान्तरिक्षाः शं नो दिविचरा ग्रहाः ।
शन्नो भूमिर्वेपमाना शमुल्कानिर्हतञ्च यत् ।

नक्षत्रमुल्काभिहतं शमस्तु । शन्नो ग्रहाश्चन्द्रमसाः ।।
शमादित्याश्च राहुणा । शन्नो मृत्युर्धूमकेतुः शं रुद्रस्तिग्मतेजसः ।"

(अथर्ववेदे—१९।९।७-१०)

---

१. श० ब्रा० ४।२।१, तै० सं० १।२।५।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एवमत्र मन्त्रे सप्तविंशतिनक्षत्रैर्नवग्रहैश्च भिन्नानां धूमकेतूल्कानां स्पष्टं वर्णनं दृश्यतेऽथर्वसंहितायाम् ।

ग्रहणम्—

भारतीयखगोलविज्ञानस्य प्रथमः खगोलवैज्ञानिकः श्रेष्ठो वा 'अत्रिः' विद्यत इति वक्तुं शक्यते । यतः सूर्यग्रहणस्य ज्ञानं तस्य स्पर्शमोक्षस्य च कथनं तेनैव महर्षिणा कृतमित्यृग्वेदस्योल्लेखेन ज्ञायते । यथात्र मन्त्रः—

स्वर्भानोरधयदिन्द्र माया अवो दिवो वर्तमाना अवाहन् ।
गूलहं सूर्यं तमसापव्रतेन तुरीयेण ब्रह्मणाऽविन्ददत्रिः ॥

(ऋ० सं० ५।४०।६)

मन्त्रेऽस्मिन् सामान्यरूपेण सूर्यग्रहणस्य वर्णनमस्ति । तस्मादत्र विषये किमप्याश्चार्यं विचिकित्साऽस्वाभाविकता वा नास्ति । एतेन सुस्पष्टं भवति यत् तस्मिन् ऋग्वेदकाले सहजतया ग्रहणस्य ज्ञानं क्रियते स्म । अत्र मन्त्रेऽत्रिऋषेर्नामोल्लेखस्तु सादरं विद्यते । तस्य ग्रहणस्य अत्रिः प्रकाशक उद्घोषकश्चासीदिति मतम् ।

एवं वेदकालिकखगोलविज्ञानस्य विषये किञ्चिन्मया विवेचितम् । वैदिकसाहित्यस्य परिवीक्षणेन सुस्पष्टतयैव खगोलशास्त्रे वैदिकर्षीणां विशिष्टज्ञानस्य नवीनानुसन्धानस्य च परिचयो जायते । तेषां विशिष्टज्ञानमिदं तपोबलेन, ध्यानेन यान्त्रिकसाहाय्येनावासीदिति त्वन्वेषणस्य विषयो विद्यत इति शम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

बालारिष्टयोगविवेचनम्

डॉ० कु० स्निग्धासेन
ज्योतिषविभागे
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी

❀ ❀ ❀

भारतीयज्योतिषशास्त्रं ग्रहनक्षत्रपरकमस्ति। तत्र गणितबलेन ग्रहाणां नक्षत्राणाञ्च स्थितेर्ज्ञानं जायते। परन्तु केवलं तेषां ज्ञानमात्रमेव भारतीयमनीषिणामुद्देश्यं नासीत्। सुदूरवर्तिनां तेषां ग्रहनक्षत्राणां स्थितिवशाद् भूपिण्डवासिनां प्राणिनामुपरि शुभाशुभप्रभावस्य परिज्ञानमुद्देश्यभूतमासीत्। परिशीलनेनेदं परिज्ञातं यत् प्रसवकालादारभ्य निधनकालपर्यन्तं प्राणिनां सर्वं शुभाशुभफलं ग्रहनक्षत्रैरेव विद्यते, अत एवेयमुक्तिः प्रायः समीचीना भाति—"ग्रहाधीनं जगत् सर्वम्" इति। इयं कल्पनाऽनेकेषां विदुषां कृतेऽतिशयोक्तिपूर्णा भविष्यतीति मन्ये; परन्तु प्रत्यक्षफलदर्शिनामनुभूतियुक्तानां दैवज्ञानां कृते कल्पनेयं यथार्था वर्तते। तत्र भारतीयज्योतिषशास्त्रे तन्वादिद्वादशभावेषु जीवनस्य सर्वं शुभाशुभफलं विचार्यते। कोऽपि जनो विद्यास्त्रीपुत्रपौत्रयशःप्रतिष्ठासौभाग्यादीनां फलं तदैवोपभोक्तुं शक्नोति, यदा तस्य जीवनं सुरक्षितं स्यात्। पूर्णायुर्युक्तैरेव जनैः सर्वं शुभाशुभफलमुपभुज्यते। अत आचार्यैः सर्वतः प्रथमं कस्यापि जातकस्यारिष्टविचारः क्रियते। यथा सारावल्याम्—

> आयुर्ज्ञानाभावे सर्वं विफलं प्रकीर्तितं यस्मात्।
> तस्मात्तज्ज्ञानार्थेऽरिष्टाध्यायं प्रवक्ष्यामि[1]॥

एवमेव प्रजापतिदासेन पञ्चस्वरायामपि भणितम्—

> अपास्य भरणं जीवं प्रपश्यन्ति शुभाशुभम्।
> मरिष्यति यदा दैवात् को भुङ्क्ते तच्छुभाशुभम्॥
> तस्मात् सर्वप्रयत्नेन आयुः स्थानं विचिन्तयेत्।
> बालस्य जन्ममात्रेण जन्मारिष्टं विचारयेत्[2]॥

हिंसार्थकस्य 'रिष्' धातोः क्तप्रत्ययेन रिष्टशब्दो निष्पद्यते, यस्यार्थोऽशुभकरो मृत्युपूर्वसूचको वा भवति; परञ्च ज्योतिषग्रन्थेषु रिष्टशब्दः कथञ्चिदेव

---

१. सारावली, अ० १०, श्लोकः १; २. पञ्चस्वरा—१०१७-८।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दृश्यते। प्रायः सर्वत्र 'अरिष्ट'शब्दस्य प्रयोग उपलभ्यते। तत्रारिष्टशब्दस्य विचारे तावदिदं प्रतिभाति यत्—"नामैकदेशग्रहणेन नामग्रहणम्" इति कथनेनादृष्टकृते रिष्टेऽरिष्टः स्यात्। अतो ज्योतिषशास्त्रेऽदृष्टजनित एवारिष्टः सूच्यते। ग्रहजन्यमरिष्टमप्यदृष्टमेव, यतो जातकोपरि जातस्यारिष्टप्रभावस्य प्रत्यक्षरीत्या विश्लेषणं कर्तुं न पार्यते।

अत एवारिष्टशब्दस्येयं व्युत्पत्तिरेव समीचीना भवति। यद्यपि नञ्समासेना रिष्टशब्दः सौभाग्यार्थे भवति, तथापि रूढार्थेऽयमशुभसूचकोऽपि प्राप्यते। अरिष्टशब्दो ज्योतिषशास्त्रे रिष्टार्थे समानरूपेण समार्थबोधको वर्तते। यथा बृहज्जातकस्यान्तेऽयमुल्लेखः—

"श्रीवराहमिहिरकृते बृहज्जातकेऽरिष्टाध्यायः"।

सारावल्याम्— "रिष्टाध्यायं प्रवक्ष्यामि[1]"।

जातकपारिजाते—"अष्टौ बालारिष्टमादौ[2]"।

जातकाभरणे— "रिष्टाध्यायाधीनमायुर्नराणां यस्मात्तस्माद्रिष्टमात्रं प्रवच्मि[3]।"

पुनश्चात्रारिष्टशब्दस्य परिभाषा मेदिन्यामेव लभ्यते—

रोगिणं मरणं यस्मादवश्यं भावि लक्ष्यते।
तल्लक्षणमरिष्टं स्याद्रिष्टमप्यभिधीयते॥ इति।

अस्मिन् निबन्धे बृहज्जातक-सारावली-जातकपारिजात-जातकाभरणेति-ग्रन्थचतुष्टये समागतानां बालारिष्टयोगानां विवेचनं कर्त्तव्यमस्ति। तत्र बृहज्जातकस्य रचयिता वराहमिहिरः ४२७ शकोत्पन्नः फलितज्योतिषस्य प्रथमाचार्यत्वेन समादृतोऽस्ति। ततः पश्चादेव सारावल्या रचयितुः कल्याणवर्मणः ५००-८०० शकमध्ये समुत्पन्नस्य ग्रन्थोऽपि फलितज्ञैर्मान्यता प्राप्तोऽस्ति। जातकपारिजातस्य रचयिता दैवज्ञवैद्यनाथः १३४७ शकोत्पन्नः सुप्रसिद्धोऽस्ति। जातकपारिजातो ज्योतिषग्रन्थेषु स्ववैशिष्ट्येन सर्वाधिकलोकप्रियो वर्तते। जातकाभरणस्य रचयितुर्ढुण्ढिराजदैवज्ञस्य १४६३ शके समुत्पन्नस्य जातकाभरणनामको ग्रन्थः प्रायः सर्वेषां ज्योतिर्विदां मान्यः। इमे ग्रन्था विभिन्नकालेषु विरचिताः सन्ति। एतेषु सर्वेषु बालारिष्टयोगानां वर्णनं वर्तते। तेषु कुत्रापि साम्यम्, कुत्रापि वैषम्यमपि दृश्यते। एतेषां साम्यवैषम्याणां समुद्घाटनं निबन्धस्योद्देश्यभूतमस्ति।

---

१. सारावली—१०।१; २. जातकपारिजातः—४।३।
३. जातकाभरणम्—श्लोकः १।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

जातकस्यारिष्टकालः प्रसवकालात् कियन्तं कालं यावत् स्यादिति विषये बृहज्जातके स्पष्टरूपेण सीमाया निर्धारणं न कृतम्, तथाप्यरिष्टवर्णनप्रसङ्गे ष्वष्ट-वर्षाणि यावद् अरिष्टस्योल्लेखः प्राप्यते। सारावल्यां श्रीकल्याणवर्मणा सद्य उत्पन्नशिशोः प्रारभ्य षोडशवर्षीय जातकस्य कृतेऽरिष्टविचारः कृतोऽस्ति। तस्यैतन्मतानुसारेण षोडशवर्षं यावद् अरिष्टकालस्य सीमा वर्तत इति मन्ये।

जातकपारिजाते बालारिष्टकालस्य निर्धारणं स्पष्टरूपेण दृश्यते। अस्य मतानुसारेण द्वादशवर्षपर्यन्तम् आयुषो निर्णयो भवितुन्नार्हति। कारणमिदमत्र यज्जन्मकालात् वर्षचतुष्टयं यावन्मातुः पापकर्मणा तदूर्ध्वं पुनर्वर्षचतुष्टय (अष्ट-वर्षाणि) यावत् पितुः पापकर्मणः, अग्रे वर्षचतुष्टयं (द्वादशवर्षाणि) यावच्च पूर्वार्जितैः स्वकीयैः दोषैर्बालकोऽरिष्ट प्राप्नोति। यथा—

आ द्वादशाब्दान्तरयोनिजन्मनामायुष्कला निश्चयितुं न शक्यते।
मात्रा च पित्रा कृतपापकर्मणा बालग्रहैर्नाशमुपैति बालकः॥
आद्ये चतुष्के जननीकृताघैर्मध्ये तु पित्रार्जितपापसङ्घैः।
बालस्तदन्त्यासु चतुः समासु स्वकीयदोषैः समुपैति नाशम्॥

पुनरप्यग्रे जातकपारिजातमते बालारिष्टमष्टवर्षपर्यन्तं स्वीकृतं तथा विंशतिवर्षपर्यन्तं प्रतिकूलग्रहजनितं योगरिष्टमङ्गीकृतम्—"अष्टौ बालारिष्ट मादौ" इत्यादि।

जातकाभरणे दैवज्ञढुण्ढिराजेन द्वादशवर्षभूतस्य बालस्य कृतेऽरिष्टस्य विचारः कृतो वर्तते, यथा--यदा राहुः शनैश्चरेण रविणा च दृष्टः, सप्तमभावे शुभग्रहदृष्टिरहितश्च स्यात्, तदा जातको द्वादशवर्षं यावज्जीवति।

पुनरपि चन्द्रराशेरंशविचारेणारिष्टयोगस्य यदा प्राप्तिर्भवति, तस्य कालस्य निर्धारणं मिथुनराशेस्त्रयोविंशतिभागे यदा चन्द्रः स्यात्, तदा त्रयोविंशतिवर्षे जातकस्यारिष्टो भवतीति निर्देशः[१]। अनेनेदं सम्भाव्यते यज्जातकाभरणानुसारेण-बालारिष्टस्य कृते वर्षस्य सर्वाधिका सीमा निर्धारिता।

अरिष्टविचारे चन्द्रस्य महत्त्वम्—

अरिष्टं त्रिविधं भवति—१. नियतम्, २. अनियतम्, ३. योगजञ्चेति। तत्र नियतं नाम निश्चितम्। प्राक्तनकर्मानुसारेण प्राप्तव्यं सुनिश्चितमरिष्टं-नियतं वक्तुं शक्यते। अनियतं नाम निश्चितम्, तत्र पित्रोः कर्मादोषानुसारेण स्वास्थ्ये दुर्लक्ष्यत्वाच्च यदारिष्टं स्यात्, सामयिकस्थितिजन्यारिष्टं भवति।

१. जातकाभरणम्, अरिष्टाध्यायः—४७ तमः श्लोकः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

योगजमरिष्टं तु जन्मकालिकग्रहनक्षत्राणां स्थितिवशादुत्पन्नं भवति। यथा सारावल्याम्—"त्रिविधमिह शास्त्रकारानियतमनियतं च योगजं प्राहुः[१]"।

अत्र विषये आचार्यव्यङ्कटमतमपि सादृश्यं भजति। यथा—

पित्रोर्दोषैः मृताः केचित् केचिद्बालग्रहैरपि।
अपरेऽरिष्टयोगाच्च त्रिविधा बालमृत्यवः॥

तत्र जन्मकालाच्चतुर्वर्षपर्यन्तमनियतं तदूर्ध्वं विंशतिवर्षपर्यन्तं योगजमरिष्टं वक्तुं शक्यते[२]। ज्योतिषशास्त्रानुसारेणैतान्यरिष्टानि विविधग्रहाणां प्रतिकूलस्थितिजन्यानि भवन्ति।

प्रायो दृश्यते यच्चन्द्रस्य विविधस्थितिवशादेवारिष्टं समुत्पद्यते। इयं स्थितिः प्रायः सर्वेषु ज्योतिषग्रन्थेष्ववलोक्यते। यथा—

१. यदि चन्द्रः पापग्रहयुक्तः ७, ८, १२ भावेषु स्यात्तदाऽरिष्टो भवति। इयं स्थितिः पापग्रहेण दृष्टेऽपि भवति[३]।

२. लग्नात् षष्ठाष्टमे स्थाने स्थितश्चन्द्रः शुभग्रहदृष्टोऽप्यष्टमवर्षे मृत्युं करोति।

३. यदि षष्ठाष्टमे स्थाने स्थितश्चन्द्रः शुभग्रहेण पापग्रहेण च सहैव दृष्टः स्यात्, तदा जातकश्चतुर्थवर्षपर्यन्तं जीवति। अत्र यदि चन्द्रश्शुभग्रहस्य गृहे, शुभग्रहेण युक्तः स्यात्, तदा मरणं न करोति[४]।

४. केन्द्रेषु चन्द्रस्तथाऽन्ये पापग्रहाः स्युस्तदा जातको विनश्यति[५]।

५. लग्ने, सप्तमे च पापग्रहा भवेयुस्तथा चन्द्रः पापयुक्तः कुत्रापि स्यात्, तदापि जातको नश्यति[६]।

६. जन्मलग्नाद् द्वादशे क्षीणचन्द्रो भवेत्, लग्नेऽष्टमे च पापग्रहा भवेयुस्तथा केन्द्रः शुभग्रहरहितः स्यात्, तदापि शीघ्रं निधनं जायते[७]।

७. लग्ने क्षीणचन्द्रो रन्ध्रे, केन्द्रे च पापग्रहाः स्थिता भवेयुर्वा पापग्रहमध्ये चन्द्रः ४, ७, ८ भावेषु क्वापि भवेदथवा पापग्रहमध्ये स्थितो लग्नगतचन्द्रो भवेत्, पापग्रहः सप्तमेऽष्टमे वा भवेत्, तदापि जातको न जीवति[८]।

---

१. बृ० जा०, अ० ६; सारावली, अ० १०—३; जा० पा०, अ० ४।
२, तत्रैव।
३. तत्रैव—५; सारावली, अ० १०—३०।
४. तत्रैव—६; ५. तत्रैव—१; ६. तत्रैव—३।
७. तत्रैव—४, सा० अ० १०—४०, जा० पा० अ० ४-३३; जातकाभरणम्—३१।
८. बृ० जा०, अ०—४।६।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

८. चन्द्रः कस्यापि राशेरन्त्यनवांशे, शुभग्रहणे दृष्टो भवेत्, तदा जातकः सद्यो म्रियते[१] ।

९. शनिराहुयुतश्चन्द्रो लग्नस्थितः स्यात्, तथाष्टमे भौमे भवेत्, तदा मात्रा सहैव जातको म्रियते[२] ।

१०. क्रमशः १, ८, ९, १२ भावेषु चन्द्रभौमरविशनैश्चरा भवन्ति गुरुश्च न वीक्षते, तदाऽऽशु मरणं भवति[३] ।

११. पापग्रहयुतश्चन्द्रः १, ५, ७, ९, ८, १२ एषु भावेषु कुत्रापि स्थितो गुरुशुक्रबुधैरदृष्टो भवति, तदापि बालो म्रियते[४] ।

१२. अरिष्टयोगप्राप्तश्चन्द्रो यदा जन्मराशितः पुनः स्वराशिं समायाति, अथवा यस्मिन् काले पापग्रहैः पूर्णाक्रान्तः स्यात्, तदा मरणं विदधाति[५] ।

१३. यदि क्षीणचन्द्रो लग्नगतः पापग्रहेण दृष्टः कर्कवृषमेषातिरिक्तराशौ स्यात्, तदा जातकं मारयति[६] ।

१४. जन्मकाले चन्द्रो भौमसूर्याभ्यां युतः शुभग्रहादृष्टः, मिथुने, कन्यायां वा भवेत्, तदा नवमे वर्षे जातकस्य मरणं भवति[७] ।

१५. यदि १, ६, ८, १२ भावे सपापश्चन्द्रः शुभग्रहदृष्टो भवेत्, केन्द्रे च शुभग्रहा न भवेयुः, तदा जातको म्रियते[८] ।

१६. लग्नगते क्षीणचन्द्रे, केन्द्रेऽष्टमे वा पापग्रहेषु गतेष्ववश्यं मरणं भवति[९] ।

१७ यदि चन्द्रः पापग्रहमध्यगतः ४, ७, ८ भावे स्यात्, तदा दैवरक्षितोऽपि बालो विनश्यति । अत्र यदि निर्बलैः शुभग्रहैर्दृष्टो भवति, तदापि मरणं विधत्ते ।

१८. चन्द्रग्रहणे जन्मे सति, सपापश्चन्द्रो लग्ने स्यात्, भौमश्चाष्टमे भवेत्, तदा मात्रा सहैव बालको म्रियते[१०]।

---

१. बृ० जा० अ० ६–१०, सारावली, अ० १०; जा० पा०. अ० ४–३७ जातकाभरणम् ।
२. तत्रैव —११, तत्रैव— ४२; तत्रैव —३६ ।
३. तत्रैव —९; तत्रैव— ४१; तत्रैव —३७ ।
४. तत्रैव —१०; तत्रैव— ४१; तत्रैव —३८ ।
५. तत्रैव —११; तत्रैव— ९८; तत्रैव —३८ ।
६. तत्रैव —१२ ।
७. तत्रैव —१२ ।
८. तत्रैव —१२ ।
९. तत्रैव —१२ ।
१०. तत्रैव —३४ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

१९. रविकुजार्किदृष्टश्चन्द्रः कस्मिन्नपि मातुर्निधनं करोति। शुभग्रहदृष्टश्चन्द्रो निधनमत्र न करोति[१]।

२०. चन्द्रस्थानात् ७, ८, ९ स्थानेषु सर्वे पापग्रहाः पापग्रहो वा भवेत्, तदा मात्रा सहैव जातकोऽपि म्रियते[२]।

२१. पापग्रहयुतः क्षीणचन्द्रो राहुणा दृष्टस्तदा शीघ्रमेव जातकं मारयति[३]।

२२. चन्द्राद् द्वादशस्थो लग्नेशभूतः पापग्रहः स्यादथवा लग्नेशः कस्मिन्नपि राशौ चन्द्रस्य नवांशे भवति, तदा नवमे वर्षे बालको नश्यति[४]।

२३. क्षीणचन्द्रो लग्ने पापग्रहाः केन्द्रेऽष्टमे वा भवेयुरथवा षष्ठाष्टमे शुभग्रहाः पापग्रहेण दृष्टाः स्युस्तदा बालको यमालयं प्राप्नोति[५]।

२४. चन्द्रः १, ६, ८, १२, भावे पापदृष्टः शुभदृष्टिरहितो भवति, तदा जातको म्रियते[६]।

२५. तुलाराशिस्थः क्षीणचन्द्रो गुरुणा न वीक्षितः, तदा बालकः सप्तमेऽष्टमे वा वर्षे म्रियते, यदि चात्र लग्ने रविशनिभौमाः स्युः[७]।

२६. जलचरलग्ने वृश्चिके वा चन्द्रो भवेत्, शनिर्लग्नस्थो सप्तमस्थो वा भवेत्, शुभग्रहकेन्द्ररहितो भवेत्, तदा जातकः शीघ्रं नश्यति[८]।

२७. जन्मकालिकचन्द्रो मेषादिराशीनां क्रमशः ८, ९, २२, २२, ५, १, ४, २३, १८, २०, २१, १० एष्वंशेषु स्थितो जातकं हन्ति[९]।

अत्रास्मिन् विषये जातकाभरणे मिथुनस्य २३ अंशगते चन्द्रे मरणमादिशति, सारावल्यां च २२ अंश इत्यान्तर्यं वर्तते। तथा हि मेषादिराशेर्यस्मिन्नंशे गते चन्द्रे जातकस्यारिष्टो भवति, तेष्वेवांशतुल्यवर्षेषु मरणकालो निर्दिष्टः[१०]।

एवं चन्द्रमधिकृत्य बालारिष्टयोगास्तेषामुद्धरणञ्च प्रस्तुतानि, यानि बृहज्जातके सारावल्यां जातकपारिजाते जातकाभरणे च सामान्यरूपेणैकरूपतां भजन्ते। केचिदन्येऽपि चन्द्रकृतबालारिष्टयोगाः सन्ति, ये केवलं जातकपारिजात एव प्राप्यन्ते, त एवं प्रकारकाः सन्ति—

१. तत्रैव— ३७।
२. तत्रैव— ४४।
३. तत्रैव— ११०।
४. तत्रैव— १०९।
५. सारावली—१०।३८ ; जा० पा० ४।२१; ६. सारावली—१०।१९; जा० पा० ४।२९।
७. सारावली—१०।४३। ४६; जा० पा० ४।४६।
८. सा० २०।१११-११३; जा० पा० ४।४७।
९. सारावली, तत्रैव ; १०. जा० पा० ४।४।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

१. जन्मकालिकश्चन्द्रः ६, ८, १२, भावस्थो सूर्यातिरिक्तपापग्रहेण दृष्टो भवेत्, तदा लग्नगतेऽपि गुरौ, बालो न जीवति[१]।

२. गण्डान्तनक्षत्रे मृत्युभागे चन्द्रः पापग्रहेण दृष्टो युतो वा भवेत्, तदा बालको मृत्युमुपैति[२]।

३. चन्द्रनवांशे शनिश्चन्द्रमसा दृष्टः, लग्नेशोऽपि शनिना वीक्षितः स्यात्, तदा जातकः षड्वर्षं यावज्जीवति[३]।

४. चन्द्रनवांशे सप्तमस्थो भौमः शुभग्रहदृष्टिरहितस्तदा बालकः सप्तसप्तति-नक्षत्रे मरणं याति[४]।

५. षष्ठाष्टमस्थश्चन्द्रः केन्द्रस्थितान् पापग्रहान् न पश्यति कोऽपि शुभ-ग्रहश्च तथैव, तदा बालको विंशतिवर्षे मरणमेति[५]।

६. चन्द्रो मन्दस्य सहायको भवेत्, सूर्यश्चाष्टमे स्यात्, तदा जातकः २९ वर्षे यमपुरं याति[६]।

७. चन्द्रो लग्नेशाष्टमेशयोर्मध्ये भवेत्, गुरुश्च द्वादशे स्यात्, तदा २७ वर्षे वा ३० वर्षे जातकस्य मृत्युर्भवति[७]।

८. क्षीणचन्द्रः पापग्रहयुक्तोऽष्टमेशः केन्द्रे, अष्टमे लग्ने वा पापग्रहो लग्नं च निर्बलम्, तदा जातकः ३२ वर्षे मृत्युं प्राप्नोति[८]।

एवमिमे योगा जातकपारिजाते प्राप्यन्ते। एतेषां योगानां पूर्वोक्तेषु त्रिषु ग्रन्थेषु समुल्लेखो न दृश्यते। चन्द्रातिरिक्तग्रहाणां प्रभावेणाऽपि बालारिष्टयोगाः समुत्पद्यन्ते। तेषां मध्ये पापग्रहा एव हेतवः सन्ति। यथा—रवि-भौम-शनय एते विशेषतोऽरिष्टकरा भवन्ति। यथा—

१. यदि वक्री शनिः कुजगृहगः १, ६, ८, भावेषु कुत्रापि स्यात्, भौमं च पश्येत्, तदा बालको वर्षद्वयं जीवति[९]।

अत्र जातकाभरणे २, ४, ७, १० भावगतेऽप्यरिष्टं मन्यते।

२. रविकुजशनयोऽष्टमे स्युस्तदा जातको मासाभ्यन्तरे म्रियते।

षष्ठस्थानगतेऽपि सद्यो मरणं कथ्यते। सारावल्यां कुजराशौ गते सति फलमिदमुक्तम्।

३. सूर्ये दशमभावे भौमस्य शनेर्वा राशौ, पापग्रहदृष्टो भवति, तदा जातको म्रियते।

---

१. जा० पा० ४।५; २. जा० पा० ४।२१; ३. जा० पा० ४।९१।
४. जा० पा० ४।२९; ५. जा० पा० ४२।६०; ६. अ० ४१।६४।
७. अ० ४१।६५; ८. अ० ४१।६७; ९. अ० ४१।४।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

४. पापदृष्टश्शनिर्लग्ने षोडशदिने, पापयुतश्शनिरेकमासे, पापदृष्टयुतशनिरेकवर्षे मरणं करोति ।

५. सूर्यग्रहणे पापग्रहयुतसूर्यो लग्ने स्यादष्टमे च कुजो भवेत्, तदा मात्रा सहैव जातकस्य निधनं शस्त्रेण भवति ।

६. जन्मकाले १, ६, ७, ८, १२, भावेषु पापग्रहा भवन्ति, तदा मात्रा सहैव जातको म्रियते ।

७. जन्मकाले ६, ८, भावे पापग्रहा भवन्ति, तदा जातको म्रियते । अत्र यदि ७, १, ८ भावेषु पापग्रहा भवन्ति, तदा माता जीवति, बालको म्रियते ।

एवमेव पापग्रहातिरिक्तेन शुभग्रहेणाऽपि बालारिष्टयोगाः प्रभवन्ति । तत्र गुरुशुक्रग्रहौ प्रमुखौ भवतः । यथा—

१. गुरुमकरराशावथवा भौमगृहे भवेज्जन्मकालश्च सन्ध्या भवति, तदा बालको मासान्ते म्रियते[1] ।

२. गुरुभौमगृहे, अष्टमभावे रविचन्द्रभौमशनिना दृष्टो बालकं तृतीयवर्षे हन्ति[2] ।

३. गुरुणा सह सूर्यः कर्कराशौ लग्नगतस्स्यात्, अष्टमेशश्च केन्द्रे भवेत्, तदा जातको २२ वर्षे म्रियते[3] ।

४. शुक्रः कर्के, सिंहे वा ६, ८, १२, भावेषु स्थितः षष्ठे वर्षेऽरिष्टं करोति[4] ।

५. शनिराशिगतो गुरुः, अष्टमभावे पापग्रहेण दृष्ट एकादशे दिवसे जातकं मारयति[5] ।

६. जन्मकाले त्रिकोणे गुरुर्लग्नेशः, लग्नाद् गुरुणा वा केन्द्रे भौमो भवति, तदा सद्यो मरणं जायते[6] ।

७. कर्कलग्ने गुरुशुक्रावथवा गुरुचन्द्रौ भवेतामष्टमे न कोऽपि ग्रहस्तदारिष्टं जायते[7] ।

८. गुरुर्जातकानां जीवनमुच्यते, तस्य स्थितिवशान्मृत्युविचारः क्रियते । यथा—गुरुः ३, ४, ५, ७, ९, १०, १२, १ भावेषु भवति, तदा क्रमशः ५, १०, ४६, २१, १००, ४०, ६०, ३०, वर्षस्य जातको जीवनं लभते[8] ।

एवमत्र बालारिष्टयोगविषयकान्तर्भूततथ्यानां पूर्वोल्लिखितग्रन्थानामनुसारेण विवेचनं कृतम् । कालक्रमानुसारमेषु पुस्तकेषु सर्वतः प्राचीनं वराहमिहिर-

---

१. जा० पा० ३० ; २. जा० पा०—४१ ; ३. जा० पा०—६१ ।
४. जातकाभरणे, अरिष्टाध्याये—६; सारावली अ० १०-९ ।
५. जातकाभरणे, आरिष्टाध्याये—२५; ६. सारावली—१०।९१ ।
७. सारावली—अरिष्टाध्याये—९६; ८. सारावली—अरिष्टाध्याये—११७ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

लिखितं बृहज्जातकं वर्तते। तत्रारिष्टाध्याये द्वादशश्लोकाः प्राप्यन्ते। ततः पश्चाल्लिखितेषु ग्रन्थेषु बालारिष्टविषये क्रमशो विकासो दृश्यते, सहैव बृहज्जातकस्य प्रभावोऽवशिष्टेषु त्रिषु ग्रन्थेष्ववलोक्यते। बृहज्जातकस्य शतवर्षान्तिरं सारावल्याः रचना मन्यते। तत्र बृहज्जातकस्य बालारिष्टयोगानां पूर्णतः उद्धरणं प्राप्यते। श्लोकास्तु तादृशा न सन्ति; परन्तु योगानां प्रकारास्तथैव सन्ति। सारावल्या अष्टशतवर्षानन्तरं जातकपारिजातस्य रचनाऽस्ति। तस्मिन् ग्रन्थे बृहज्जातकस्य सर्वेषां बालारिष्टयोगानां श्लोका अविकला एव गृहीताः सन्ति। जातकपारिजाते सारावल्या बालारिष्टयोगा अपि दृश्यन्ते। जातकपारिजातस्य रचनाकालस्तु शतवर्षानन्तरं जातकाभरणस्य रचना जाता। तत्र जातकपारिजातस्य बालारिष्टयोगानां समावेशो वर्तते; परन्तु त एव योगाः समाहृताः; ये सारावल्यामपि सन्ति। जातकाभरणे सारावल्याः पूर्णप्रभावो दृश्यते। प्रायः सारावल्याः सर्वेषां योगानां जातकाभरणे सन्निवेशोऽस्ति। अत एवेदं वक्तुं शक्यते यज्जातकाभरणकारस्य दृष्टिपथं जातकपारिजातो न समागतः, कारणमिदमन्वेषणस्य विषयतामधिगच्छति। जातकाभरणे बृहज्जातकस्यापि योगा उपलभ्यन्ते।

अथ बृहज्जातक-सारावली-जातकपारिजात-जातकाभरणान्तर्गतानां बालारिष्टयोगानां परस्परतुलनार्थं श्लोकानां सङ्ख्यासूची प्रदर्श्यते।

बृहज्जातकम्	सारावली	जातकपारिजातः	जातकाभरणम्
अ० ६ श्लोकसं०	अ० १० श्लोकसं०	अ० ४ श्लोकसं०	अरिष्टाध्या० श्लोकसं०
१			
२			
३		३२	
४	४०	३३	३१
५	३०	३४, २८	२१
६	२१, २२, ६४	३५	१३
७	३८	११	३६
८	४२	१२	२
९	४१	३६	३
१०	९८	३७, ४३	४
११	९९	३८	
१२	४	३९	
	५	४०	
	६	४१	
		२२	

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

७	३१	४
८	६८	५
१०	४२	७
१२	३१	८
१४	४५	१०
२७	४७	२०
२९	५१	२१
३२	२१	२३
३७	३६	२९
४३	४६	३३
१०५	४८	४४
१९	२९	६
३५	१०	९
३८	२१	११
६४	३५	१२
९		१४
१३		१५
१५		१६
१६		१७
२२		१९
२३		२२
२४		२६
२५		२७
२६		२८
३१		३०
३३		४०
३४		४६
३६		४९
३९		४७
१०१		
१०६		
१०९		
१०७		

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS
CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कालिदासस्य विरहोन्मादः

डॉ० वनेश्वरपाठकः

संस्कृतविभागाध्यक्षचरः,

सेण्ट-जेवियर्स-कालेज, राँची (विहारप्रदेशः)

* * *

कालिदासः श्रृङ्गारस्य प्रेम्णश्च रससिद्धः कवीश्वरोऽस्ति। तस्य श्रृङ्गार-रससिद्धता प्रायः सर्वैरेव कविभिः काव्याचार्यैश्च प्रशंसिताऽस्ति। महाकवेः कालिदासस्य प्रबलः पक्षधर आनन्दवर्द्धनाचार्यः कालिदासमेवाभिलक्ष्य लिखति—

अपारे काव्यसंसारे कविरेकः प्रजापतिः।
यथास्मै रोचते विश्वं तथेदं परिवर्त्तते॥
श्रृङ्गारी चेत् कविः काव्ये जातं रसमयं जगत्[१]। इत्यादि।

आनन्दवर्द्धनः श्रृङ्गारमेवैकं परममधुरं रसं मन्यते—'श्रृङ्गार एव मधुरः परः प्रह्लादनो रसः', 'श्रृङ्गार एव रसान्तरापेक्षया मधुरः प्रह्लादहेतुत्वात्[२]।' तट्टीकाकारोऽभिनवगुप्तस्तु श्रृङ्गारस्यापरपक्षं विप्रलम्भं पूर्वपक्षात् सम्भोगान्मधुरतरं मन्यते—'सम्भोगश्रृङ्गारान्मधुरतरो विप्रलम्भः, ततोऽपि मधुरतमः करुण इति[३]।'

अत एव सर्वेषु श्रृङ्गाररसप्रधानकाव्येषु (श्रव्येषु दृश्येषु च) सर्वत्र विप्रलम्भस्य हृदयहारि वर्णनं दृश्यते। प्राचामियं मान्यता च—'न विना विप्रलम्भेन सम्भोगः पुष्टिमश्नुते।' कालिदासस्यापि मनः सम्भोगवर्णनापेक्षया विप्रलम्भवर्णन एवाधिकतरं रमते। कुमारसम्भवे पतिवियुक्ताया रत्या विलापवर्णनं तथा रघुवंशे पत्नीवियुक्तस्याजस्य मनोदशाया मर्मस्पर्शिचित्रणं च विरहवर्णनस्यानुपमेयमुपमानभूतं विप्रलम्भस्य परिधिमतिक्रम्य करुणरसे स्थानमाश्रयते। अन्यत्र तस्य रचनासु विप्रलम्भवर्णनं दर्शनीयमस्ति।

विप्रलम्भे (अर्थाद् विरहे) दश कामदशा भवन्ति[४]। तासून्मादोऽप्यन्यतमा दशाऽस्ति। शोकभयादिभिश्चित्तसम्मोह उन्मादः कथ्यते। अस्यामवस्थायाम्-

---

१. ध्वन्यालोकः—३।४२ (संग्रहश्लोकौ); २. ध्वन्यालोकः—२।७।

३. ध्वन्यालोकः २।८, लोचनटीका।

४. अभिलाषश्चिन्तास्मृतिगुणकथनोद्वेगसंलापाश्च।
उन्मादोऽथ व्याधिर्जडता मृतिरिति दशात्र कामदशाः॥ (सा० द०, परि० ३)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स्थाने हसित-रुदित-गीत-प्रलपनादीनि भवन्ति। उन्मादस्य प्रमुखविशेषताऽस्ति चेतनाचेतनविवेकशून्यता। यथाह विश्वनाथः—

चित्तसम्मोह उन्मादः कामशोकभयादिभिः।
अस्थानहासरुदितगीतप्रलपनादिकृत् ॥
उन्मादश्चापरिच्छेदश्चेतनाचेतनेष्वपि[1]।

विद्यानाथेनापि लिखितम्—'उन्मादस्तुल्यवृत्तित्वं चेतनाचेतनेष्वपि[2]।

विरहोन्मादस्यास्यां दशायां चेतनाचेतनविवेकशून्यो जनः स्वविरहिण्याः प्रियायाः सम्बन्धे कमपि किमपि प्रष्टुं तथा तां प्रति कमपि दूतत्वेन प्रेषयितुं शक्नोति। उन्मादस्येयं दशा आदिकाव्ये रामायणे (अरण्यकाण्डे) सीता-हरणानन्तरं सीताविरहोन्मत्ते रामे दृश्यते। विरहोन्मादे स वृक्षान्, वीरुधः, पर्वतान्, गोदावरीनदीम्, पशुपक्षिणश्च सीताविषयिणीं वार्तां पृच्छति। भागवतेऽपि गोपवधूनां विरहवर्णन एतादृशाः प्रसङ्गा विद्यन्ते। रामायणे रामो हनूमता सीतां प्रति सन्देशं प्रेषयति। भागवते दशमस्कन्धे मथुरास्थितः कृष्णो गोपीनां समीप उद्धवेन सन्देशं प्रेषयति, तत्रैव च राधायाः प्रियसखी ललिता हंसेन मथुरास्थितं कृष्णं प्रति राधाया मनोव्यथायाः सन्देशं प्रहिणोति। महाभारते (आदिपर्वणि) नलोपाख्याने नलो दमयन्त्याः समीपं हंसेन स्वं सन्देशं प्रेषयति। ऋग्वेदे (दशममण्डले) सरमाया दौत्यं प्रसिद्धमेव।

इत्थं रामायणे वर्णितं हनूमत्सन्देशम्, भागवते महाभारते च वर्णितान् उद्धवसन्देश-हंससन्देशादीनाधारीकृत्य संस्कृतसाहित्ये दूतकाव्यरचनायाः परम्परा प्रचलिता। तेषु दूतकाव्येष्वधिकांशतो मेघचन्द्र-पवन-पद्म-प्लवङ्ग पदाङ्क-मनो-मयूखादयोऽचेतनपदार्थाः, शुक-भ्रमर-पिक-काक-कोक-हंस-वकादयोऽपूर्णचेतन-पदार्थाः, कुत्रचिद् भक्तिशीलादयो भावात्मका अमूर्तपदार्थाः, कुत्रचिच्च विप्रमित्रादयः पूर्णचेतनपदार्थाः सन्देशवाहकत्वेन प्रेषिताः सन्ति।

रामायणे, महाभारते, भागवते च सन्देषप्रेषणकथासु चेतनपदार्था एव दौत्याय प्रहिताः सन्ति, तथा ते चेतनपशुपक्षिणो मनुष्या इव सर्वेन्द्रियशक्ति-सम्पन्नाः पटुकरणाः सन्ति। अतस्तेषां दूतत्वेन प्रेषणे कवेस्तादृशं वैदग्ध्यं न। कस्यचनाचेतनपदार्थस्य सन्देशवाहकत्वेन प्रेषणं तथा तत्समक्षं स्वविरहोत्कण्ठा-निवेदनं वस्तुतो वैदग्ध्यपूर्णा मौलिककल्पनाऽस्ति। अस्य प्रथमं श्रेयः कालिदासस्य मेघदूतस्यैवास्ति। कालिदासेन काव्यशैल्या खल्वेकां नवीनां विधामुद्भाव्य संस्कृतसाहित्यस्येतिहासे नवयुगस्यावतारणा कृताऽस्ति। पाश्चात्त्या मनीषिणोऽपि मेघदूतस्य प्रेमाभिव्यञ्जनया मानसिकेनान्तर्द्वन्द्वेन च प्रभाविता-

१. सा० द० ३।१६१, १९६; २. प्रतापरुद्रयशोभूषणम्, प्रकरणम्–१।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दृश्यन्ते । मेघदूतेन प्रथमं परिचितो जर्मनकविर्गेटे मेघदूतस्य विषये लिखति—"The first acquaintanec with this work made an epoch in our life', मेघदूतेनातिशयं प्रभावितः फ्रेंच विद्वान् हिपो फौचे-महोदयो लिखति—There is nothing as perfect in the elejiac literature of Europe as the Meghadūta of Kālidāsa.

परन्तु मेघदूते, मेघदूतमनुसृत्य लिखितेषु शताधिकदूतकाव्येषु च सन्देश-प्रेषणस्यायोग्यान् मेघ-शुक-पवन-चन्द्र-चक्रवाकादीन् वाग्विरहितान् व्यक्तवाचश्च, तथा दूरदेशेषु विचरणशीलान् पदार्थान् दूतत्वेन प्रयुक्तान् दृष्ट्वा प्रसिद्धेनालङ्कारिकेण भामहेन काव्यानीमानि 'अयुक्तिमद्' दोषे परिगणितानि सन्ति । यथाह सः—

अयुक्तिमद् यथा दूता जलमृन्मारुतेन्दवः ।
तथा भ्रमरहारितचक्रवाकशुकादयः ॥
अवाचोऽव्यक्तवाचश्च दूरदेशविचारिणः ।
कथं दौत्यं प्रपद्येरन्निति युक्त्या न युज्यते[1] ॥

दूतप्रेषणस्य विषये विश्वनाथस्यापि मतमस्ति यत्—

निःसृष्टार्थो मितार्थश्च तथा सन्देशहारकः ।
कार्यप्रेष्यस्तथा दूतो दूत्यश्चापि तथाविधाः ॥
उभयोर्भावमुन्नीय स्वयं वदति चोत्तरम्[2]॥.......इत्यादि ।

अन्येनाऽप्यत्र प्रोक्तम्—

'परेङ्गितज्ञः परवाग्व्यङ्ग्यार्थस्यापि तत्त्ववित् ।
सदोत्पन्नमतिर्धीरो दूतः स्यात् पृथिवीपतेः ॥
दूतं चैव प्रकुर्वीत सर्वशास्त्रविशारदम् ।
इङ्गितज्ञं तथा सभ्यं दक्षं सत्कुलसम्भवम् ॥ इत्यादि ।

वस्तुतः, अचेतनानां मेघादीनाम्, अपूर्णचेतनानां पशुपक्ष्यादीनां च दूत-कर्मणि नियुक्तिर्विरहोन्मादस्य पराकाष्ठाऽस्ति ।

यद्यपि कालिदासः 'सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः' इति दूतकर्मणो वैशिष्ट्यं विजानाति, तथाप्यसौ धूमज्योतिः सलिलमरुतां सन्निपातेन, अपटुकरणेन मेघेन सन्देशार्थं प्रेषयिष्यन् विरहोन्माद एतादृशकर्मण औचित्यं समर्थयति । स विरहदशायां कामार्तस्य जनस्य चेतनाचेतनविवेकशून्यतां क्षम्यां मन्यते—'कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु' (मेघ०१।५)। सम्भवतः

१. काव्यालङ्कारः, १।४२-४३; २. सा० द० ३।५९-६० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कालिदासस्यानेन समर्थनेन प्रभावितो भामहोऽपीदं स्वीकृतवान् यत् सुमेधाः (विद्वान् कविः) यद्येवं कल्पनां कुरुते, तदा तद् ग्राह्यमस्ति—

यदि चोत्कण्ठया यत् तदुन्मत्त इव भाषते ।
तदा भवतु भूम्नेदं सुमेधोभिः प्रयुज्यते[1]।। इत्यादि ।

कालिदासस्यास्याः समर्थनसरणेरनुसरणं प्रायः सर्वैरेव दूतकाव्यकविभिः कृतम् । तद्यथा रूपगोस्वामी—

न तस्माद् दोषोऽयं यदिह विहगं प्रार्थितवती ।
न कस्मिन् विश्रम्भं दिशति हरिभक्तिप्रणयिता[2] ।।

अज्ञातकविः—

युक्तायुक्तेष्वपि हि विदुषामर्थिनां नो विवेकः[3] ।

श्रीवादिचन्द्रसूरिः—

दूतं मोहात् पवनमहृदं प्राहिणोदश्रुनेत्रः ।
प्रायो मोहो भवति भविनां बोधशून्यत्वहेतुः[4] ।।

श्रीकृष्णसार्वभौमः—

कन्दर्पेण व्यथितहृदयोन्मत्ततुल्या यया च[5] ।

डॉ० वनेश्वरः—

इत्यौत्सुक्यादपरिकलयन् प्रार्थयत् स प्रवासी ।
शोकाक्रान्त्या विकृतिमयते कस्य पुंसो न बुद्धिः ।।

(प्लवङ्गदूतम्, १।२०)

आचार्यक्षेमेन्द्रेणापि प्रबन्धगतौचित्यस्योदाहरणस्वरूपं मेघदूतस्य 'जातं वंशे भुवनविदिते पुष्करावर्त्तकानाम्' इत्यादिश्लोकमुद्धरता विरहोन्मत्तेन यक्षेणाचेतने मेघे चेतनत्वमध्यारोप्य कृताया दूतकर्मकारित्वस्थापनायास्तथा तत्समक्षं कृताया याच्ञाया औचित्यं समर्थितमस्ति । उक्तश्चात्र तेन—'अत्राचेतनस्य चेतनारोपेण मेघस्य दौत्ययोग्यताधानाय प्रथितपुष्करावर्त्तकपर्जन्यवंश्यत्वममात्यप्रकृतिपुरुषत्वं च यदुपन्यस्तम्, तेन समस्तप्रबन्धस्योत्प्रेक्षितेतिवृत्तरुचिरतरस्य निरतिशयमौचित्यमुद्योतितम्[6]' ।

अचेतनान् भावांश्चेतनवत्, चेतनांश्चाचेतनवद् व्यवहारयितुः कवेः स्वातन्त्र्यमानन्दवर्द्धनेनापि समर्थितमस्ति—

---

१. काव्यालङ्कारः, १।४०;
२. हंसदूतम्, १।८ ।
३. हंससन्देशम्, १।५;
४. पवनदूतम्, १।५ ।
५. पदाङ्कदूतम्, १।३;
६. औचित्यविचारचर्चा, १३ वृत्तिः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भावानचेतनानपि चेतनवच्चेतनानचेतनवत् ।
व्यवहारयति यथेष्टं सुकविः काव्ये स्वतन्त्रतया[१] ॥

आचार्यकुन्तकेनापि मेघस्य दौत्यौचित्यं समर्थितमस्ति । 'सहृदयहृदयाह्लादकारिशब्दार्थयोः साहित्यं काव्यम्' इति विवेचनप्रसङ्गे तेन मेघदूतस्य—

भर्तुर्मित्रं प्रियमविधवे विद्धि मामम्बुवाहं
त्वत्सन्देशाद्धृदयनिहितादागतं त्वत्समीपम् ।
यो वृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानां
मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि[२] ॥

इति श्लोकमुद्धृत्य अत्र 'ननु चान्यः कश्चिदेवंविधव्यवहारविदग्धं बुद्धिः कथं न नियुक्तः' इत्याद्युपक्रमता लिखितम्—'अत्र यः पदार्थपरिस्पन्दः कविनोपनिबद्धः प्रबन्धस्य मेघदूतत्वे, स एव जीवितमिति सुतरां सहृदयहृदयाह्लादकारी[३]।' अर्थात् कविना मेघदूते यस्य पदार्थस्य (मेघस्य) अम्बुवाहकत्वादिस्वभावो वर्णितः, स (स्वभावः) एवास्य प्रबन्धस्य मेघदूतत्वे प्राणभूतः सञ्जातोऽस्ति ।

कालिदासस्य मालविकाग्निमित्रेऽभिज्ञानशाकुन्तले च विरहोन्मादस्य वर्णनं विद्यते । मालविकाग्निमित्रे तृतीयेऽङ्के मालविकाविरहोन्मत्तोऽग्निमित्रो मन्मथमुपालभमानो ब्रूते—'भगवन् सङ्कल्पयोने ! प्रतिबन्धवत्स्वपि विषयेष्वभिनिवेश्य किं तथा प्रहरसि यथा जनोऽयं न कालान्तरक्षमो भवति ।

क्व रुजाहृदयप्रमाथिनी क्व च ते विश्वसनीयमायुधम् ।
मृदुतीक्ष्णतरं यदुच्यते तदिदं मन्मथ ! दृश्यते त्वयि[४] ॥

एवमेव शाकुन्तले तृतीयेऽङ्के विरहोन्मत्तो दुष्यन्तो मन्मथं चन्द्रं चोपालभमानो ब्रूते—'भगवन् कुसुमायुध ! त्वया चन्द्रमसा च विश्वसनीयाभ्यामतिसन्धीयते कामिजनसार्थः । कुतः—

तव कुसुमशरत्वं शीतरश्मित्वमिन्दो-
र्द्वयमिदमयथार्थं दृश्यते मद्विधेषु ।
विसृजति हिमगर्भैरग्निमिन्दुर्मयूखै-
स्त्वमपि कुसुमबाणान् वज्रसारी करोषि[५] ॥''

अत्र मन्मथोपालम्भनेऽग्निमित्रे दुष्यन्ते चोभयत्र साम्यं दृश्यते । विरहोन्मत्तयोर्द्वयोर्हृदि कुसुमायुधस्य कुसुमशरत्वे विश्वसनीयता नास्ति । शाकुन्तले शकुन्तलावियुक्तो दुष्यन्त उन्मत्तानां पन्थानं गृह्णाति । शकुन्तलाहस्तात् परिभ्रष्ट-

१. ध्वन्या ३।४२ वृत्तिः; २. मेघ० १।२२ ।
३. वक्रोक्तिजीवितम्, १।९ वृत्तिः ; ४, मालविका० ३।२ ; ५. अभिज्ञा० ३।३ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मङ्गुलीयकं हस्ते गृहीत्वा 'कथं नु तं बन्धुरकोमलाङ्गुलिं करं विहायासि निमग्नमम्भसि[१]' इत्याद्युपालम्भनवचसा तदङ्गुलीयकमुपालभमानं दुष्यन्तं दृष्ट्वा विदूषको ब्रूते—'कथं गृहीतोऽनेन पन्था उन्मत्तानाम्' इत्यादि। शकुन्तलायाः प्रतिकृतावङ्कितं भ्रमरं शासतो दुष्यन्तस्योन्मादस्तीव्रतरां दशां प्राप्नोति। विरहोन्मत्तस्य राज्ञस्तं पूर्वापरविरोधिनमपूर्वं विरहमार्गं विलोक्य अप्सराः सानुमत्यपि तं प्रति सहानुभूतिमनुभवति। विदूषकोऽपि तस्य सङ्गेनोन्मत्त इव सञ्जायते। यथाह सः—'एष तावदुन्मत्तः। अहमप्येतस्य सङ्गेन ईदृग्वचन एव संवृत्तः[२]।'

शकुन्तलादपि तीव्रतरा विरहोन्माददशा विक्रमोर्वशीये चतुर्थेऽङ्केऽवलोक्यते। रामायणे सीताविरहोन्मत्तेन रामेण यं कमपि प्रति कृतः सीतासम्बन्धिवृत्तान्तजिज्ञासाप्रश्नः विक्रमोर्वशीये उर्वशीवियुक्तस्य पुरुरवसो विरहोन्मादस्य परिकल्पनाया आधारोऽस्ति। रामायणे सीतावियोगे, वर्षाकाले समुपस्थिते, मेघं दृष्ट्वा रामस्य विरहव्यथाऽतितरां वर्द्धते—'शोकश्च मम विस्तीर्णो वर्षाश्च भृशदुर्गमाः[३]' इत्यादि। सर्वथा सुखिनोऽपि जनस्य मनस्युत्कण्ठाकारिणं नववारिधरमुदितं दृष्ट्वा पुरुरवसोऽपीयमेव दशा—

अयमेकपदे तया वियोगः प्रियया चोपनतः सुदुःसहो मे।
नववारिधरोदयादहोभिर्भवितव्यं च निरातपत्वरम्यैः[४]॥

मेघस्योत्सङ्गे स्फुरन्तीं विद्युतं विलोक्य रामस्येयमुक्तिः—

नीलमेघाश्रिता विद्युत् स्फुरन्ती प्रतिभाति मे।
स्फुरन्ती रावणस्याङ्के वैदेहीव तपस्विनी[५]॥

विद्युत्वन्तं मेघमवलोक्य पुरुरवसः—'आः दुरात्मन् रक्षः! तिष्ठ तिष्ठ, मे प्रियतमामादाय गच्छसि' इत्याद्युन्मत्तप्रलापस्य परिकल्पनाया आधारोऽस्ति। पुरुरवा तं मेघमुर्वश्या अपहारिणं राक्षसं मत्वा लोष्ठं गृहीत्वा तं हन्तुं प्रधावति। सीतावियोगे रामोऽप्युन्मत्त इवानेकस्थानेषु परिधावन् दृश्यते—

शोकरक्तेक्षणः श्रीमानुन्मत्त इव लक्ष्यते।
इत्येवं विलपन् रामः परिधावन् वनाद्वनम्॥

क्वचिदुद्भ्रमते योगात् क्वचिद् विभ्रमते बलात्।
क्वचिन्मत्त इवाभाति कान्तान्वेषणतत्परः॥

कान्तान्वेषणतत्परो रामः कदम्ब-बिल्वार्जुन-ककुभ-तिलकाशोक-ताल-जम्बू-

---

१. अभिज्ञा० ६।१३; २. अभिज्ञा० ६।२० श्लोकतः परम्।
३. रामायणम्, ४।२८, ५९; ४. विक्रमो० ४।१०; ५. रामा० ४।२८, १२।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कर्णिकाराम्र-पनस-कुरर-दाडिम-वकुल-पुन्नाग-चन्दनादिवृक्षान्, मृग-गज-शार्दूलादिपशून्, गोदावरीनदीं, पर्वतांश्च सीताविषयं वृत्तान्तं पृच्छति। उर्वशीमन्विष्यन् पुरुरवा अपि मयूरं कोकिलं राजहंसं चक्रवाकं भ्रमरं गजराजं पर्वतं सरितं हरिणमशोकं च तद्विषयिणीं वार्तां पृच्छति।

पुरुरवाः सेन्द्रगोपं नवशाद्वलं दृष्ट्वा तम् उर्वश्या ओष्ठरागयुक्तमश्रुबिन्दुचित्रितं शुकोदरश्यामं स्तनांशुकं मत्वाऽऽदातुमिच्छति—

हृतोष्ठरागैर्नयनोदबिन्दुभिर्निमग्ननाभेर्निपतद्भिरङ्कितम् ।
च्युतं रुषा भिन्नगतेरसंशयं शुकोदरश्याममिदं स्तनांशुकम्[1] ॥

भवतु, 'आदास्ये तावत्'.........इत्यादि।

कालिदासस्यास्याः कल्पनाया आधारोऽसंशयं सीतावियोगविधुरस्य रामस्य वर्षाप्रकरणस्येयमुक्तिरस्ति—

बालेन्द्रगोपान्तरचित्रितेन विभाति भूमिर्नवशाद्वलेन।
गात्रानुपृक्तेन शुकप्रभेण नारीव लाक्षोचितकम्बलेन[2] ॥

रामः स्तनाभिरामस्तवकाभिनम्रामशोकलतां सीताप्राप्तिबुद्ध्याऽऽलिङ्गितुमिच्छति। पुरुरवा अपि प्रियानुकारिण्यां लतायां परिष्वङ्गप्रणयी भवति।

इत्थमिदं सुस्पष्टं यद् विक्रमोर्वशीये चतुर्थेऽङ्के पुरुरवसो विरहोन्मादवर्णनं रामायणे वर्णितां रामस्य विरहोन्माददशामाधृत्यैव परिकल्पितमस्ति। विरहोन्मादस्य मर्मस्पर्शि वर्णनमभिलक्ष्यैव विक्रमोर्वशीयस्य चतुर्थोऽङ्कः कुन्तकेन 'उन्मत्ताङ्कः' निगद्यते[3]।

विक्रमोर्वशीयस्य चतुर्थेऽङ्के प्रयुक्तो भाषाविपर्ययोऽपि पुरुरवस उत्कटं विरहोन्मादमेव द्योतयति। अस्मिन्नङ्के संस्कृत-प्राकृतापभ्रंशेति भाषात्रयस्य प्रयोगो दृश्यते। विरहोन्मत्तो राजा कदाचित् संस्कृतं कदाचित् प्राकृतं कदाचिच्चापभ्रंशं भाषते। उन्मत्तावस्थायां राज्ञो भाषाविपर्यय एष शास्त्रसम्मतोऽस्ति। आचार्यभरतेनापि प्रोक्तम्—'कारणव्यपदेशेन प्राकृतं सम्प्रयोजयेत्'। 'उन्मत्तस्यापि ब्रुवतः प्राकृतं सम्प्रयोजयेत्[4]।'

विश्वनाथोऽप्याह—

उन्मत्तानामातुराणां सैव स्यात् प्राकृतं क्वचित्।
कार्यतश्चोत्तमादीनां कार्यो भाषाविपर्ययः॥

(सा० द० ६।१६५, ६।१६८)

---

१. विक्रमो०—४।१४; २. रामा० ४।२८, ३४।
३. वक्रोक्तिजीवितम्, उन्मेषः ४, प्रकरणवक्रता; ४. नाट्यशास्त्रम्, १६।३२, ३४।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

उन्मत्तावस्थायामपि पुरुरवाः शास्त्रमर्यादां परिपालयन् संस्कृतमेव ब्रूते चेत्, तस्योन्मत्तता का ? अत्र राज्ञोऽपभ्रंशप्रयोगो विचारणीयोऽस्ति। कलाया दृष्ट्याप्यपभ्रंशगीतीनांमासां कोऽपि मनोरम उपयोगो नास्ति। कालिदासस्य शिल्पिनस्त्वेतत् सर्वथाऽननुरूपमेव। साहित्येऽपभ्रंशप्रयोगोऽपि कालिदासात् परमेव सञ्जातः। अतोऽपभ्रंशे प्रयुक्ता एता गाथाः (जम्भलिका, खण्डधारा, द्विपदिका, चर्चरीप्रभृतयो गीतयः) कालिदासकृता न; ताः प्रक्षिप्ताः सन्तीति भूयसां विदुषां मतम्। अपभ्रंशगीतिषु प्रयुक्तं 'गाथा'छन्दोऽपि विचारणीयमस्ति। 'गाथा'छन्दः प्राकृतस्य छन्दो न त्वपभ्रंशस्य। गीतिषु प्रयुक्तो ग्राम्यापभ्रंशोऽपि विचारणीयोऽस्ति। विक्रमोर्वशीयस्येमानि गीतिपद्यानि तदानीं प्रचलितानि लोकगीतानि सन्ति, येषां समावेशस्तत्र कालिदासेन कृत इत्यपि केषाञ्चन मतम्[1]।

तात्पर्यमिदं यदेतादृशो भाषाविपर्ययः, छन्दसोऽविचारितप्रयोगोऽप्यत्र विरहोन्मत्तस्य राज्ञः पुरुरवसो विरहोन्मादस्य तीव्रतरत्वमेव सूचयति।

कालिदासस्य विरहोन्मादं विचारयद्भिरस्माभिः प्रसङ्गतस्तस्य सम्भोगोन्मादोऽपि विचारणीयोऽस्ति। तस्मिन् यादृशो विरहोन्मादस्तादृशस्ततोऽप्यधिको वा सम्भोगोन्मादो दृश्यते। अत्र कुमारसम्भवं महाकाव्यमस्य प्रत्यक्षमुदाहरणम्। जगतो मातापित्रोः पार्वतीपरमेश्वरयोर्विवाहानन्तरं तयोः सम्भोगशृङ्गारवर्णने कालिदासेनाऽश्लीलतायाः सीमाऽतिक्रान्ताऽस्ति। अश्लीलतापि च साऽतीव ग्राम्या। यथा—

ऊरुमूलनखमार्गपङ्क्तिभिस्तत्क्षणं कृतलोचनो हरः।
वाससः प्रशिथिलस्य संयमं कुर्वतीं प्रियतमामवारयत्[2]॥

औचित्यस्य परमविचारकेण क्षेमेन्द्रेण श्लोकोऽयं प्रबन्धानौचित्यस्योदाहरणत्वेनोपन्यस्तोऽस्ति। कथितं च तेन—'अत्राम्बिकासम्भोगवर्णने पामरनारीसमुचितनिर्लज्जसज्जनखराजिविराजितोरुमूलहृतविलोचनत्वं त्रिलोचनस्य भगवतस्त्रिजगद्गुरोर्यदुक्तं तेनानौचित्यमेव परं प्रबन्धस्य पुष्णाति[3]॥

१. विक्रमोर्वशीयस्योत्तरभारतीयेषु प्राचीनसंस्करणेषु यान्येतानि प्राकृत—(अपभ्रंश) पद्यानि सन्ति, तानि दक्षिणभारतीयसंस्करणेषु न सन्ति। प्राकृत—(अपभ्रंश) पद्यैः सह नृत्यानां विधानाद् उत्तर भारतीयं संस्करणं त्रोटकं कथ्यते—

सप्ताष्टनवपञ्चाङ्कं दिव्यमानुषसंश्रयम्।
त्रोटकं नाम तत्प्राहुः प्रत्यङ्कं सविदूषकम्॥

प्राकृत—(अपभ्रंश) पद्यानां तेषामभावाद् दक्षिणभारतीयं संस्करणं नाटकं निगद्यते, इत्यन्यो विचारांशः।

२. कुमार० ८।२७; ३. औचित्यविचारचर्चा, १२ वृत्तिः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आनन्दवर्द्धनेनाऽप्यत्र कालिदासस्य सम्भोगोन्मादस्यानौचित्यमुद्घाटितम्। तेनैतिहासिकस्य कविकल्पितस्य वा कथाशरीरस्य निर्माणे विभावानुभावसञ्चारिणामौचित्येन सन्निवेशस्यावश्यकता प्रदर्शिता—

विभावभावानुभावसञ्चार्यौचित्यचारुणः।
विधिः कथाशरीरस्य वृत्तस्योत्प्रेक्षितस्य वा[1]॥ इत्यादि।

अत्र भावौचित्यस्य व्याख्यां कुर्वता तेन लिखितम्—'भावौचित्यं तु प्रकृत्यौचित्यात्। प्रकृतिर्हि उत्तम-मध्यमाधमभावेन, दिव्यमानुषादिभावेन विभेदिनी' इत्यादि। प्रकृत्यौचित्येन वर्णनं रसस्य परा सम्पत्, अनौचित्येन वर्णनं तु रसभङ्गस्य कारणमित्यानन्दवर्द्धनस्याशयः। यस्य यादृशी प्रकृतिस्तस्य तादृशं वर्णनमेवौचित्यभाग् भवति। 'काव्ये यदुत्तमप्रकृते राजादेरुत्तमप्रकृतिभिर्नायिकाभिः सह ग्राम्यसम्भोगवर्णनं तत् पित्रोः सम्भोगवर्णनमिव सुतरामसभ्यम्। तथैवोत्तमदेवताविषयम्' इत्यानन्दवर्द्धनस्य विचारः[2]।

यद्यपि कालिदासस्य प्रबलपक्षधरेण तेनोत्तमदेवतयोस्तयोस्तादृशसम्भोगश्रृङ्गारवर्णनस्यौचित्यस्य समर्थने प्रयासो विहितः। उक्तञ्च तेन—"यत्त्वेवंविधे विषये महाकवीनामप्यसमीक्ष्यकारिता लक्ष्ये दृश्यते, स दोष एव। किन्तु स (दोषः) शक्तितिरस्कृतत्वात् (महाकवीनां शक्त्या आच्छादितत्वाद् दोष इव) न लक्ष्यते।

अव्युत्पत्तिकृतो दोषः शक्त्या संव्रियते कवेः।
यस्त्वशक्तिकृतस्तस्य स झटित्यवभासते॥

तथाहि—महाकवीनामप्युत्तमदेवताविषयप्रसिद्धसम्भोगश्रृङ्गारनिबन्धनाद्यनौचित्यं शक्तितिरस्कृतत्वाद् ग्राम्यत्वेन न प्रतिभासते, यथा कुमार सम्भवे देवीसम्भोगवर्णनम्।" तथाप्येवंविधे विषये औचित्यपरित्यागे महाकवीनामप्यसमीक्ष्यकारिता, स दोष एवेति स्वीकृतमेव ध्वनिकारेण।

सारांशोऽयं यद् यद्यप्यसौ कालिदासस्य पक्षे स्थितस्तस्यानौचित्यं यथाकथञ्चित् समर्थयितुं प्रयतते, तथाप्यन्तःकरणेनासौ कालिदासस्यासमीक्ष्यकारितामेतां दोषत्वेनाङ्गीकरोत्येव।

काव्यप्रकाशकारो मम्मट आनन्दवर्द्धनस्य 'विभावभावानुभावसञ्चार्यौचित्यचारुणः' इत्यादिकारिकायां वर्णितस्य भावौचित्यस्य विपर्ययं भावानौचित्य-

---

१. ध्वन्या० ३।१०।

२. अभिनवगुप्तोऽपि प्रकृतिविपरीतवर्णनमनुचितं मन्यते—'एतदुक्तं भवति—यत्र विनेयानां प्रकृतिखण्डना न जायते, तादृग् वर्णनीयम्' इत्यादि।

(ध्वन्या० लोचनटीका, ३।१०)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मेव प्रकृतिविपर्ययाख्यं दोषं मन्यमानः कालिदासस्य सम्भोगोन्मादमिममनुचितमुद्घोषयति—'किन्तु रतिः सम्भोगशृङ्गाररूपोत्तमदेवताविषया न वर्णनीया। तद् वर्णनं हि पित्रोः सम्भोगवर्णनमिवात्यन्तमनुचितम्।'

निष्कर्षः—निष्कर्षतः, शापहेतुकविप्रलम्भस्योदाहरणभूते कालिदासस्य काव्यद्वये, मेघदूते, विक्रमोर्वशीये च, विरहोन्मादवर्णनं तथा तस्य महाकाव्ये कुमारसम्भवे सम्भोगोन्मादवर्णनं विशेषतो विवेचनीयमस्ति। मेघदूते विक्रमोर्वशीये च कालिदासकृतं विरहोन्मादवर्णनं रामायण-महाभारत-भागवतपुराणाद्यनुगतं काव्याचार्याणां सम्मतं च, अत एव सर्वथोचितमिति प्रायोवादः; किन्तु वयमत्र विरहोन्मादस्यौचित्यमन्यथा विचारयामः। भामहाचार्यो मेघदूतेऽवाचस्तथा दूरदेशविचरणशीलस्य मेघस्य दौत्यमयुक्तं मन्यते। स वाणीरहितानामव्यक्तवाणीनाञ्च मेघ-मारुत-भ्रमर-शुकादीनां दौत्यं अयुक्तिमदाख्ये दोषे परिगणयति। अस्माकं मते तु 'अयुक्तिमद्' दोषस्य स्थानेऽत्र प्रकृतिविपर्ययाख्यं रसदूषणमेव युक्तिमद् विभाति। आनन्दवर्द्धनो भावौचित्यं प्रकृत्यौचित्यं मन्यते मम्मटस्य मते भावानौचित्यं प्रकृतिविपर्ययाख्यो दोषः। धूमज्योतिः सलिलमरुतां सन्निपातस्य मेघस्य प्रकृतिरपटुकरणत्वमथ चाचेतनत्वमस्ति। दूतस्य प्रकृतिः पटुकरणत्वं तथा चेतनत्वमस्ति। एतत् कालिदासोऽपि स्वीकुरुते, तथापि स मेघं दौत्ये प्रेरयति। अस्यौचित्यं किम्? औचित्यं कालिदासेन स्वयमेव दर्शितम्—'कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु' इति।

कालिदासस्य समर्थनेनानेन प्रभावितो भामहोऽत्रायुक्तिमद्दोषं पश्यन्नपि दौत्यस्यास्यौचित्यं पश्चात् समर्थयति— 'यदि चोत्कण्ठया यत् तदुन्मत्त इव भाषते' इत्यादि। अचेतनान् भावान् चेतनवत्, चेतनांश्चाचेतनवद् व्यवहारयितुः कवेः स्वातन्त्र्यमानन्दवर्द्धनेनापि समर्थितम्—

भावानचेतनानपि चेतनवच्चेतनानचेतनवत्।
व्यवहारयति यथेष्टं सुकविः काव्ये स्वतन्त्रतया॥

'अत्राचेतनस्य चेतनाध्यारोपेण मेघस्य दौत्ययोग्यताधानाय.........निरतिशयमौचित्यमुद्द्योतितम्' इत्याद्युक्तवतः क्षेमेन्द्रस्याप्यत्र सम्मतिः प्रतिभाति। कुन्तकाचार्येणापि मेघस्य दौत्यं समर्थितमस्ति। किन्त्वत्र यदनौचित्यं तत् तैर्नोन्मीलितम्। 'कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेष्विति ब्रुवता महाकविना यदत्रौचित्यमुन्मीलितपूर्वं तदेवाश्रित्य तैर्यत् किञ्चिदुक्तम्। यं मेघमालोक्य विरहिणो यक्षस्य चेतोऽन्यथावृत्ति (उत्कण्ठाकुलं) विद्यते, सर्वथा निर्वृत्तोऽपि जन उत्कण्ठाकारिणा येन मेघोदयेनानर्थाधीनो भवति, तमेव मेघं स विरहिण्या यक्षिण्याः समीपं दूतत्वेन प्रेषयति। तं मेघमवलोक्य तस्यास्तपस्विन्याश्चेतः कीदृशं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भविष्यति, तस्यां किमापतिष्यतीति स न चिन्तयति। मम्मटानुयायिन आलोचकास्त्वत्र प्रकृतिविपर्ययं नाम दोषं पश्यन्तो दौत्यकर्मणोऽयुक्तस्य मेघस्य दौत्येऽनौचित्यम्, अनौचित्येन चात्र रसभङ्गमपि स्थिरीकुर्वन्ति।

वस्तुतः कालिदासस्य कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेष्विति समर्थने किमपि क्षोदक्षेमसहं तत्त्वं न। विरहोन्मादस्येयं दशा बौद्धिकपरिवेशस्यानुकूलाऽपि न। कालिदासस्य समर्थनमिदमनुसृत्य पुरातनैरधुनातनैश्च कविभिर्यानि दूतकाव्यानि लिखितानि, लिख्यन्ते च, तत्र कोमलकल्पनायाः किमपि वैचित्र्यं चेदस्तु; किन्तु तत्र किमपि जीवनं न, केवलः गड्डलिकाप्रवाह एषः।

विक्रमोर्वशीये विरहोन्मत्तस्य राज्ञो भाषाविपर्ययः, संस्कृतस्य स्थाने प्राकृतस्यापभ्रंशस्य च प्रयोगः, यद्यपि शास्त्रमर्यादानुकूल एव; तथाप्यत्र विभिन्नरागाणां बहूनां गीतानां तादृशप्रयोगः प्राकृते प्रियस्य गाथाछन्दसः अपभ्रंशे उपयोगः विरसतामुत्पादयति।

सारांशोऽयं यत् कालिदासस्य विरहोन्मादः, सम्भोगोन्मादोऽपि च, यथाकथञ्चिदौचित्येन समर्थितावप्यालोचकानामालोचनेऽनौचित्येनैवावभासेते। सम्भाव्यते यद् वर्णनीयेन सह साधारणीकरणाद् वर्ण्यविषयेण सह तस्यान्तःकरणस्य संवादाच्च सारस्वतकविः कालिदासोऽपि तथैव सम्भूतः परिवेशस्य प्रत्यासत्तेश्च प्रभावस्तु पतत्येवेति शम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

संस्कृतदृश्यकाव्यानां भरतवाक्येषु स्वदेशानुरागः

डॉ० हरिनारायणदीक्षितः

अध्यक्षः, संस्कृतविभागस्य,

कुमायूँ विश्वविद्यालये, नैनीताल (उ० प्र०)

❃❃❃

संस्कृतसाहित्यस्य स्वाध्यायशीला मनीषिण इदं तथ्यं सम्यग् विदन्ति यत् संस्कृतस्य दृश्यकाव्येष्वन्ते भरतवाक्यमवश्यमेव कथ्यते। संस्कृतस्य प्रायः सर्वास्वेव दृश्यकाव्यकृतिषु दृश्यते यन्निर्वहणसन्धेरन्तिमदृश्यस्यान्तिमेषु क्षणेषु यदा प्रधानोऽभिनेता 'फलागमम्' लभमानो भवति, तदा तस्य कश्चिन्न कश्चित् प्रधानः शुभचिन्तकः सहयोगी परमादरणीयो वाऽभिनेता तदुपकण्ठ एव भवति। एवञ्च यावदेव नायकः 'फलागमम्' लब्धवान् भवति, तावदेव स नायकं पृच्छति यत् कथय, अथ भवतः किमन्यदभीष्टं साधयानि ? एतदुत्तरे नायकः स्वाभीष्टफलागमस्य सर्वाङ्गपूर्णायाम् उपलब्धौ संक्षिप्तं प्रकाशं पातयन् तथा तामेव स्वव्यक्तिगतजीवने सर्वोपरि मन्यमानः प्रसन्नतां प्रकटयति; तस्यां चोपलब्धौ स्वकीयं तं प्रमुखं शुभचिन्तकं सहयोगिनं प्रति स्वीयां कृतज्ञतामपि प्रकटयति; किन्तु स्वदेशस्य, स्वधर्मस्य, स्वसंस्कृतेः, स्वभाषायाः, स्वराजस्य, स्वप्रजानाम्, स्वसमाजस्य च कल्याणायापि सः स्वकीयां हार्दिकीं तथाऽभीष्टतरां कामनां प्रकटयति, या नितान्तं सहजा सामयिकी च बोभवीति। कथनस्यावश्यकता नास्ति यत्संस्कृतभाषाया दृश्यकाव्यकारो नायकस्य इमामेव कामनाम् अद्यावधि 'भरतवाक्यम्' इति संज्ञया व्यवहरन्नस्ति।

यद्यपि केनापि नाटचशास्त्राचार्येण भरतवाक्यमिति नाम्ना कस्यापि नाटचशास्त्रीयतत्त्वस्योल्लेखो नैव कृतोऽस्ति; किन्तु नाटचशास्त्रसम्मतस्य निर्वहणसन्धेः 'काव्यसंहारप्रशस्ति'नामकयोर्द्वयोरन्तिमयोरङ्गयोरस्य भरतवाक्यस्य प्रतिरूपम् अवश्यमेव द्रष्टुं लभ्यते। यतो हि 'काव्यसंहारः' निर्वहणसन्धेस्तस्मिन् स्थले मन्यते, यत्र प्रधानोऽभिनेता स्वाभीष्टलक्ष्यं प्राप्नोति, स चेदं पृच्छयते यत्स किमन्यदिच्छति यत्तस्मै दीयेत[1] ? अस्मिन् तारतम्ये काव्यसंहारनामक-

1. (क)–वरप्रसादसम्प्राप्तिः काव्यसंहार इष्यते—(नाट्यशास्त्रम्, १९।१०१ पूर्वार्द्धम्)।
   (ख)–वराप्तिः काव्यसंहार । यथा—किं ते भूयः प्रियमुपकरोमि ?
   (दशरूपकम्, १।५४ प्रथमचरणः)।
   (ग)–वरेच्छा काव्यसंहारः। इप्सितं दातुमभिलाषो वरेच्छा। तज्जनितो "भूयः किं ते प्रियमुपकरोमि" इति प्रश्न इत्यर्थः। (नाट्यदर्पणः, १।६५ तृतीयचरणः)।
   (घ)–वरप्रदानसम्प्राप्तिः काव्यसंहार इष्यते।
   यथा सर्वत्र किं ते भूयः प्रियमुपकरोमि ? इति। (साहित्यदर्पणः, ६।११४ पूर्वार्धम्)।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

निर्वहणसन्ध्यङ्गानन्तरं प्रशस्तिनामकं निर्वहणसन्ध्यङ्गमपि समागच्छति, यस्मिन् स्वराज-स्वदेशादीनां बहुमुखाय कल्याणाय शुभकामना क्रियते[1]।

अस्मिन् सन्दर्भे रामचन्द्र–गुणचन्द्रयोः धारणाऽस्ति यत् काव्यसंहार-प्रशस्तिनाम्नोः सन्ध्यङ्गयोः क्रमेण संयोजनाऽवश्यमेव करणीया; यतो ह्यनया संयोजनया प्रतिपाद्यस्य आनन्ददायकतायाम् उपयोगितायां च वृद्धिर्भवति[2]।

उल्लेखनीयमस्ति यद् भरतमुनिप्रभृतिभिः प्राचीनैर्नाट्यशास्त्राचार्यैः संस्थापिताय प्रशस्तिनामकाय निर्वहणसन्ध्यङ्गाय एव संस्कृतस्य दृश्यकाव्यकाराः प्रत्यक्षरूपेण भरतवाक्यस्य संज्ञां दत्वा अस्यैव माध्यमेन स्वीयां हार्दिकीं कामनां तथा हार्दिकं सन्देशं सर्वमान्यमनीषिणो भरतमुनेः नाम्ना भारतीयसमाजस्य समक्षं प्रस्तुवन्ति। यतो हि आचार्येण भरतमुनिनापि स्वकीयनाट्यशास्त्रस्य प्रशस्तौ भारतीयसंस्कृतेः प्रतीकभूतायाः गोजातेः ब्राह्मणजातेश्च कल्याणकामना कृतासीत्; समग्रायां वसुन्धरायां सुभिक्षस्य नैरुज्यस्य च अभिलाषो विहित आसीत्; स्वकीयस्य च राज्ञो राज्यस्य अखण्डतामिच्छता तेन। राज्ञा द्वारा तस्य राज्यस्य रक्षा–सुरक्षे अपि वांछिते आस्ताम्[3]।

---

१. (क)—नृपदेवप्रशस्तिश्च प्रशस्तिरभिधीयते। (नाट्यशास्त्रम्, १९।१०१ उत्तरार्धम्)।

(ख)—प्रशस्तिः शुभशंसनम्। यथा वेणीसंहारे—प्रीतश्चेद् भवान्, तदिदमेवमस्तु—

अकृपणमतिः कामं जीव्याज्जनः पुरुषायुषं
भवतु भगवद्भक्तिर्द्वैतं विना पुरुषोत्तमे।
कलितभुवनो विद्वद्बन्धुर्गुणेषु विशेषवित्
सततसुकृती भूयाद् भूपः प्रसाधितमण्डलः॥ (दशरूपकम्, १।५४ द्वितीयचरण।)

(ग)—प्रशस्तिः शुभशंसना। जगतः कल्याणशंसना प्रशस्तिः।
(नाट्यदर्पणः, १।३५ चतुर्थचरणः)।

(घ)—नृपदेशादिशान्तिस्तु प्रशस्तिरभिधीयते। यथा प्रभावत्याम्—

राजानः सुतनिर्विशेषमधुना पश्यन्तु नित्यं प्रजाः
जीयासुः सदसद्विवेकपटवः सन्तो गुणग्राहिणः।
सस्यस्वर्णसमृद्धयः समधिकाः सन्तु क्षमामण्डले
भूयादव्यभिचारिणी त्रिजगतो भक्तिश्च नारायणे॥
(साहित्यदर्पणः, ६।११४ उत्तरार्धम्)।

२. नाट्यदर्पणः, १।६५ उत्तरार्धम्, वृत्तिभागः।

३. एवं नाट्यप्रयोगे बहुविधिविहितं कर्मशास्त्रं प्रणीतं
नोक्तं यच्चात्र लोकादनुकृतिकरणात्संविभाव्यं तु तज्ज्ञैः।
किं चान्यत्सम्प्रपूर्णा भवतु वसुमती नष्टदुर्भिक्षरोगा
शान्तिर्गोब्राह्मणानां भवतु नरपतिः पातु पृथ्वीं समग्राम्॥
(नाट्यशास्त्रम्, ३७।३१)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रतीयते यद् भरतमुनेरस्मिन् नाट्यशास्त्रीये प्रशस्तिवाक्ये स्वदेशसंस्कृतिं, स्वभूमिं, स्वराजं, स्वसमाजं च प्रति भरतमुनिमनोनिष्ठया योगक्षेमात्मिकया भावनया संस्कृतस्य दृश्यकाव्यकारो भृशमेवं प्रभावितो जातो यत् स्वकीयायामपि कृतौ निर्वहणसन्धेः प्रशस्तिनामकर्मणं भरतवाक्यनाम्नैव लिखितुं प्रवृत्तः। वयं पश्यामो यदद्यापि स तस्मिन्नेव रूपे भरतमुनिं प्रति स्वनिष्ठामास्थां च प्रकटयति।

प्रकृते प्रसङ्गे दृश्यकाव्यानां स्वाध्यायं कुर्वता मयाऽनुभूतमस्ति यत् संस्कृतसाहित्यस्य सर्वविधैर्दृश्यकाव्यकारैरात्मनिष्ठः स्वदेशानुरागो नैजे भरतवाक्ये त्ववश्यमेव प्रकटितोऽस्ति। तदीयानां दृश्यकाव्यानां कथानकानि शृङ्गारिकाणि स्युः, किं वा धार्मिकाणि, सामाजिकानि स्युरथवा राजनीतिकानि, दार्शनिकानि स्युः, उत वा सांस्कृतिकानि; एतावत्तु निश्चितमेवास्ति यत् तदीयेषु भरतवाक्येषु स्वदेशानुरागस्य संवेगोऽवश्यमेव प्राप्यते। उदाहरणार्थमत्र कतिपयदृश्यकाव्यानां भरतवाक्यानि मूलरूपेण समुद्ध्रियन्ते—

(१) इमां सागरपर्यन्तां हिमवद्विन्ध्यकुण्डलाम्।
महीमेकातपत्राङ्कां राजसिंहः प्रशास्तु नः॥
(भासकृतं दूतवाक्यम्, १।५६, बालचरितम् ५।२०)

(२) सर्वत्र सम्पदः सन्तु नश्यन्तु विपदः सदा।
राजा राजगुणोपेतो भूमिमेकः प्रशास्तु नः॥
(भासकृतं कर्णभारम्, १।२५)

(३) गां पातु नो नरपतिः शमितारिपक्षः॥
(भासकृतं उरुभङ्गम्, १।६६)

(४) भवन्त्वरजसो गावः परचक्रं प्रशाम्यतु।
इमामपि महीं कृत्स्नां राजसिंहः प्रशास्तु नः॥
(भासकृतम् अभिषेकनाटकम्, ६।३५)

(५) गोब्राह्मणानां हितमस्तु नित्यं सर्वप्रजानां सुखमस्तु लोके।
इमामुदीर्णार्णवनीलवस्त्रां नरेश्वरो नः पृथिवीं प्रशास्तु॥
भवन्त्वरजसो गावः परचक्रं प्रशाम्यतु।
इमामपि महीं कृत्स्नां राजसिंहः प्रशास्तु नः॥
(भासकृतं अविमारकम्, ६।२१-२२)

(६) यथा रामश्च जानक्या बन्धुभिश्च समागतः।
तथा लक्ष्म्या समायुक्तो राजा भूमिं प्रशास्तु नः॥
(भासकृतं प्रतिमानाटकम्, ७।१५)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(७) आशास्यमीतिविगमप्रभृतिप्रजानां
सम्पत्स्यते न खलु गोप्तरि नाग्निमित्रे ॥
(कालिदासकृतं मालविकाग्निमित्रम्, ५।२०)

(८) परस्परविरोधिन्योरेकसंश्रयदुर्लभम् ।
संगतं श्रीसरस्वत्योर्भूतयेऽस्तु सदा सताम् ॥
(कालिदासकृतं विक्रमोर्वशीयम्, ५।२४)

(९) प्रवर्ततां प्रकृतिहिताय पार्थिवः सरस्वती श्रुतिमहती महीयताम् ।
ममापि च क्षपयतु नीललोहितः पुनर्भवं परिगतशक्तिरात्मभूः ॥
(कालिदासकृतम् अभिज्ञानशाकुन्तलम्, ७।३५)

(१०) वाराहीमात्मयोनेस्तनुभवनविधावास्थितस्यानुरूपां
यस्य प्राग्दन्तकोटिं प्रलयपरिगता शिश्रिये भूतधात्रि ।
म्लेच्छैरुद्विज्यमाना भुजयुगमधुना संश्रिता राजमूर्त्तेः
स श्रीमद्‍वन्धुभृत्यश्चिरमवतु महीं पार्थिवश्चन्द्रगुप्तः ॥
(विशाखदत्तकृतं मुद्राराक्षसम्, ७।१७)

(११) क्षीरिण्यः सन्तु गावो भवतु वसुमती सर्वसम्पन्नसस्या
पर्जन्यः कालवर्षी सकलजनमनोनन्दिनो वान्तु वाताः ।
मोदन्तां जन्मभाजः सततमभिमता ब्राह्मणाः सन्तु सन्तः
श्रीमन्तः पान्तु पृथ्वीं प्रशमितरिपवो धर्मनिष्ठाश्च भूपाः ॥
(शूद्रककृतं मृच्छकटिकम्, १०।६०)

(१२) उर्वीमुद्दामसस्यां जनयतु विसृजन् वासवो वृष्टिमिष्टा-
मिष्टैस्त्रैविष्टपानां विदधतु विधिवत्प्रीणनं विप्रमुख्याः ।
आ कल्पान्तं च भूयात्स्थिरसमुपचिता संगतिः सज्जनानां
निःशेषं यान्तु शान्ति पिशुनजनगिरो दुर्जया वज्रलेपाः ॥
(हर्षवर्धनकृता रत्नावली ४।२२)

(१३) उर्वीमुद्दामसस्यां जनयतु विसृजन् वासवो वृष्टिमिष्टा-
मिष्टैस्त्रैविष्टपानां विदधतु विधिवत्प्रीणनं विप्रमुख्याः ।
आ कल्पान्तं च भूयात्स्थिरसमुपचिता संगतिः सज्जनानां
निःशेषं यान्तु शान्ति पिशुनजनगिरो दुःसहा वज्रलेपाः ॥
(हर्षवर्धनकृता रत्नावली, ४।२२)

(१४) वृष्टिं हृष्टशिखण्डिताण्डवभृतो मुञ्चतु काले घनाः
कुर्वन्तु प्रतिरूढसन्ततहरित्सस्योत्तरीयां क्षितिम् ।
चिन्वानाः सुकृतानि वीतविपदो निर्मत्सरैर्मानसैः
मोदन्तां घनबद्धबान्धवसुहृद्गोष्ठीप्रमोदाः प्रजाः ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अपि च—

शिवमस्तु सर्वजगतां परहितनिरता भवन्तु भूतगणाः ।
दोषाः प्रयान्तु नाशं सर्वत्र सुखी भवतु लोकः ॥
(हर्षवर्धनकृतं नागानन्दनाटकम्, ५।४०-४१)

(१५) अकृपणमरुक् श्रान्तं जीव्याज्जनः पुरुषायुषं
भवतु भगवन् भक्तिर्द्वैतं विना पुरुषोत्तमे ।
दयितभुवनो विद्वद्बन्धुर्गुणेषु विशेषवित्
सततसुकृती भूयाद् भूपः प्रसाधितमण्डलः ॥

अपि च—

अवनिमवनिपालाः पान्तु वृष्टिं विधत्तां
जगति जलधराली शस्यपूर्णास्तु भूमिः ।
त्वयि मुरनरकारौ भक्तिरद्वैतयोगाद्
भवतु मम सुदीर्घं हव्यमश्नन्तु देवाः ॥
(भट्टनारायणकृतं वेणीसंहारनाटकम्, ६।४६-४७)

(१६) क्ष्मापालाः क्षीणतन्द्राः क्षितिवलयमिदं पान्तु ते कालवर्षाः
वार्वाहाः सन्तु राष्ट्रं पुनरखिलमपास्तेति सम्पन्नसस्यम् ।
लोके नित्यप्रमोदं विदधतु कवयः श्लोकमाप्तप्रसादं
संख्यावन्तोऽपि भूम्ना परकृतिषु मुदं संप्रधार्य प्रयान्तु ॥
(भवभूतिकृतं महावीरचरितम्, ७।४२)

(१७) शिवमस्तु सर्वजगतां परहितनिरता भवन्तु भूतगणाः ।
दोषाः प्रयान्तु शान्ति सर्वत्र सुखी भवतु लोकः ॥
(भवभूतिकृतं मालतीमाधवम्, १०।२५)

(१८) पाप्मभ्यश्च पुनाति वर्धयति च श्रेयांसि सेयं कथा
मङ्गल्या च मनोहरा च जगतो मातेव गङ्गेव च ।
तामेतां परिभावयन्त्वभिनयैर्विन्यस्तरूपां बुधाः
शब्दब्रह्मविदः कवेः परिणतां प्राज्ञस्य वाणीमिमाम् ॥
(भवभूतिकृतमुत्तररामचरितम्, ७।२१)

(१९) आम्नायार्थविभाविनः प्रतिदिनं नन्दन्तु विप्राः परं
सद्यस्तावदमी भवन्तु सुखिनो यावद् धरित्रीधराः ।
भृत्याः प्रौढधियः स्वकर्मनिरताः स्युर्भक्तियुक्ताः सदा
राष्ट्रे स्वस्थसमृद्धपुष्टसबलानन्दिप्रजे कण्टके ॥
(अनङ्गहर्षकृतं तापसवत्सराजम्, ६।१०)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(२०) प्रमुदितसुजना समृद्धसस्या भवतु मही विजयी च भूमिपालः ।
कविभिरुपहिता निजप्रबन्धे गुणकणिका ह्यनुगृह्यतां गुणज्ञैः ॥
(क्षेमीश्वरकृतं चण्डकौशिकम्, ५।३०)

(२१) सत्ये नन्दतु सज्जनानां सकलो वर्गः खलानां पुन-
र्नित्यं खिद्यतु भवन्तु ब्राह्मणजनाः सत्याशिषः सर्वदा ।
मेघो मुञ्चतु सञ्चितमपि सलिलं शस्योचितं भूतले
लोको लोभपराङ्मुखोऽनुदिवसं धर्मे मतिर्भवतु च ॥
(राजशेखरकृता कर्पूरमञ्जरी, ४।२३)

(२२) स्थाणुर्वेधास्त्रिधामा मकरवसतयः पावको मातरिश्वा
पातालं भूर्भुवःस्वश्चतुरुदधिसमाः साममन्त्राश्च वेदाः ।
सम्यक् संसिद्धिविद्यापरिणततपसः पीठिनस्तापसाश्च
श्रेयांस्यस्मिन्नरेन्द्रे विदधतु सकलं वर्धतां गोकुलं च ॥
(वीरनाग-(दिङ्नाग) कृता कुन्दमाला, ६।४५)

(२३) पर्जन्योऽस्मिन् जगति महतीं दृष्टिमिष्टां विधत्तां
राजानः क्ष्मां गलितविविधोपप्लवाः पालयन्तु ।
तत्त्वोन्मेषोपहततमसस्त्वत्प्रसादान्महान्तः
संसाराब्धिं विषयममतातङ्कपङ्कं तरन्तु ॥
(कृष्णमिश्रकृतं प्रबोधचन्द्रोदयम्, ६।३३)

(२४) आबालाद् वदनाम्बुजे तनुभृतां सारस्वतं जृम्भतां
देवे कौस्तुभधाम्नि चन्द्रमुकुटे द्वैता मतिः खेलतु ।
वाग्देव्या सह मुक्तवैशसरसा देवीव दीव्यादियं
शेषस्येव फणाञ्चलेषु सततं लक्ष्मीः सतां सद्मसु ॥
(जयदेवकृतं प्रसन्नराघवम्, ७।९४)

(२५) भूपालाः परिपालयन्तु विधिवद्धर्मेण वर्णाश्रमान्
पृथ्वी कामफला भवत्वविरतं वर्षन्तु काले घनाः ।
ईर्ष्यामुज्झतु दुर्जनः परगुणेष्वासज्जतां सज्जनः
सत्काव्यामृतवर्षिणी कविमुखे वाणी चिरं नन्दतु ॥
(शेषकृष्णकृतं कंसवधम्, ७।२६)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(२६) कुर्वन्तु कुमुदप्रभां त्रिभुवने कीर्त्ति नृपाः
जानन्तु इतरेतरमुपकृर्ति घना मानुषाः ।
शृण्वन्तु गतमत्सरं सहृदयाः कवीनां कृतिं
जयन्तु कवयश्चिरं भवतु भारतीमङ्गलम् ॥

(रुद्रदासकृता चन्द्रलेखा, ४।३०)

(२७) सम्पूर्णा धरणिः सुवृष्टिभिरियं सम्पन्नसस्या भवे-
देतस्याः पतिरप्यतीव कुरुतात् स्वामेव धर्मस्थितिम् ।
गावो भूमिसुराः परस्परकृतां पुष्टिं भजन्तां सदा
मोदन्तां मृदुसूक्तयश्च कवयः क्षोणीन्द्रसंलालिताः ॥

(देवराजकृतं बालमार्त्तण्डविजयम्, ५।१७४)

(२८) राजानः प्रभवन्तु नीतिनिपुणा विप्राश्च विद्यायुताः
सद्व्यापारसमन्विता अपि विशः शूद्रा द्विजासेवकाः ।
लज्जाशीलविभूषिता युवतयो भूमिश्च सस्यान्विता
ईर्ष्यादम्भविवर्जिता अपि जनाः सर्वे भवन्तु क्षितौ ॥

(अम्बिकादत्तव्यासकृतं सामवतम्, ६।२५)

(२९) आम्नायार्थप्रसितमतयो ब्राह्मणाः सिद्धमन्त्राः
सम्पद्यन्तां नरपतिगणाः क्षात्रतेजः समिद्धाः ।
वैश्याः सर्वे नवनिधियुताः कारवः कारुदीप्ताः
स्वान्त्र्यश्रीर्विलसतुतरां विश्वतो भारतेऽस्मिन् ॥

(मूलशंकरयाज्ञिककृतं प्रतापविजयम्, ९।८)

(३०) मोदन्तां नितरां स्वकर्मनिरताः पर्याप्तकामाः प्रजाः
एधन्तां नयविक्रमाङ्कयशसो लोकप्रियाः पार्थिवाः ।
सस्यानां समृद्धये जलमुचः सिञ्चन्तु काले रसां
सप्तांगप्रकृतिप्रकर्षरुचिरं राष्ट्रं चिरं वर्धताम् ॥

(मूलशंकरयाज्ञिककृतं छत्रपतिसाम्राज्यम्, १०।१२)

(३१) सर्वे सत्पथगामिनः शिवरताः स्वातन्त्र्यदेवप्रियाः
ब्रह्मण्या निजधर्मकर्मकुशला राष्ट्रानुगा मानिनः ।
विद्वांसः स्वकदारमात्रनिरता दक्षा दृढप्रत्ययाः
भूयासुर्वसुधाधिपा नयविदः पुण्ये पुनर्भारते ॥

(मथुराप्रसाददीक्षितकृतं वीरप्रतापम्, ७।१८)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(३२) सर्वे सन्तु निरामयाः सुसुखिनः शस्यैः समृद्धा धरा
भूपालाश्च मितव्यया नयविदो दक्षाः प्रजारक्षणे।
विद्वांसो धनपूजिता नवनवाः सम्पादयन्तः कृतीः
भूयासुः पतिपुत्रशौर्यसहिता वीराङ्गना भारते॥
(म० प्र० दीक्षितकृतं भारतविजयनाटकम्, ७।१७)

(३३) मुक्तेरप्यधिकास्तु भक्तिरुचिता जन्मावनौ जन्मतः
वंगानां चिरभिन्नभिन्नमनसां नित्या भवत्वेकता।
ईतिर्नश्यतु रीतिरस्तु रुचिरा नीतिः सती जायतां
शिष्टानुग्रहदुष्टनिग्रहविधि देश्येव चालम्बताम्॥
(हरिदाससिद्धान्तवागीशकृतं वंगीयप्रतापम्, ८।३५)

(३४) आदेशकारिणः शिष्याः गुरवः शिष्यवत्सलाः।
स्नातकाः सच्चरित्राश्च सन्तु सर्वत्र भारते॥
(वासुदेवद्विवेदिकृतकौत्सस्य गुरुदक्षिणा, १।४)

(३५) भूयाद् भारतवर्षमेतदखिलं ह्यासेतुहैमाचलं
ध्वस्ताराातिबलप्रभावमुदितस्वत्वाभिमानोन्नतम्।
त्यक्तान्योन्यविरोधमत्र जनताः सद्धर्मवर्त्मानुगाः
वर्धन्तां शिवराजपुण्यचरितान्यन्तः स्मरन्त्योऽनिशम्॥
(डॉ० श्रीधरभास्करवर्णेकरकृतं शिवराजाभिषेकम्, ७।१०)

(३६) महिममयी सा धरणिलसित्री स्थिरसुखसम्पत्सततविधात्री।
अतलभवाब्धौ विहितवहित्रा जनयतु हर्षं कुसुमविचित्रा॥
(यतीन्द्रविमलचौधुरीकृतं महाप्रभुहरिदासम्, ७।३२)

(३७) भवन्तु सुखिनः सर्वे मातृलीलाप्रसादिनः।
मधु क्षरतु सर्वत्र जगन्मधुमदस्तु नः॥
(यतीन्द्रविमलचौधुरीकृतं भारतहृदयारविन्दम्, ५।११)

(३८) अधुना यूयं वयमपि कृषकाः।
जयतु भारतं जयो गान्धिनः॥
(डॉ० भागीरथप्रसादत्रिपाठिकृतः कृषकाणां नागपाशः, १।२)

(३९) स्वदेशक्षेमार्थं सकलजनतासौ प्रयततां
पराश्चास्मत्सीमाक्रमणकुधियो यान्तु विजिताः।
समृद्धोऽयं देशो विविधविभवैः संचितबलो
विधत्तां सर्वत्राप्यनुपहतशान्ति च भुवने॥
(पुल्लेलरामचन्द्ररेड्डिकृतं सुसंहतभारतम्, ६।३८)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(४०) परमेशवन्दनां करवाम पावनाम् ॥
भारतभूरुच्छ्रिता। सकलमातृदेवता।
प्रिया, तदीयदासता। विलीयतां तदार्तता।
प्रभोः प्रार्थनाम् ॥
युद्धलालसां पुनः। जहातु सर्वथा जनः।
शान्तिदूतसज्जनः। सम्मतोऽस्तु मानिनः।
प्रभोः प्रार्थनाम् ॥
कालिदासचरितमिदम्। भवतु रसिकतोषदम्।
नमाम शारदापदम्। देववाग्घितप्रदम्।
श्रीरामकामनाम्। करवाम पावनाम् ॥
(श्री० भि० वेलणकरकृतं कालिदासचरितम्, ५।३६)

(४१) यदा यदा रिपुरुदेति भूमेः वीरसुतः स्वं जुहोतु होमे।
स्वातन्त्र्ये मुक्तिः सति नियमे स्मरणमिदं स्यादनवरतम् ॥
दिने दिने संभवन्तु भुवने दधीचिमुनयो मातुरक्षणे।
तत्त्यागोज्ज्वलजीवनगाने श्रीरामसुधाव्रतचरितम् ॥
(श्री० भि० वेलणकरकृतो हुतात्मा, ६३-६४)

(४२) स्वातन्त्र्यज्योतिरुदितम्।
तिमिरान्तसुप्रभातम् ॥
नररत्नदेहहवनैः। प्राणप्रणीतपवनैः।
राष्ट्रेरितं प्रदीप्तम् ॥
सुचिराय भारतसुतैः। यतनीयमविरतं तैः।
विलसेत्ततो नितान्तम् ॥
नाट्ये सुधाभिषिक्ते। श्रीरामविनतसूक्ते।
रमतां सदा सुगीतम् ॥
(श्री० भि० वेलणकरकृता राज्ञी दुर्गावती, ३।१९)

(४३) जयतु भारतभूमिरियं जयतु शान्तता।
क्षमाशीलिनी भवताज्जगति वीरता ॥
सम्परायदुरितहरम्। जनपीडापरिहारम्।
त्र्यम्बकं नमाम जयतु मातृभूमिसफलता ॥
(श्री० भि० वेलणकरकृतः कैलासकम्पः, ३।२९)

(४४) भारतानां जना भ्रातृताबन्धनाः।
वैरिविध्वंसने सन्तु धैर्येन्धनाः ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

संकटोत्तेजिता विजयमदर्वाजिताः ।
अनयिनोद्वेजिताः शान्तिनिष्ठाधनाः ॥
संगरे वीरता ज्ञाननिधिलीनता ।
अस्तु तेषां भृता जीवने चेतना ॥
(श्री० भि० वेलणकरकृता स्वातन्त्र्यलक्ष्मीः, ३।१३-१५)

(४५) नान्यायं सहते प्रजा प्रतिदिनं भूपादपि प्रेरितं
तेषां हृत्पटले जनार्दनसखः तेजः समुत्पादयेत् ।
किं कुर्याज्जनतां विना मतिबलो नेता नरो मादृशः
लोकाः स्युः सबला इति प्रभुपदे नः स्यात्सदा प्रार्थना ॥
(श्री० भि० वेलणकरकृतः कल्याणकोषः, ३।६)

(४६) समास्तु नृपधीस्तथा सदयतास्तु तच्चेतसि
प्रजातु निजदेशविभवकृतिश्च सा वर्धताम् ।
करोतु कविताकृतौ कविसहायतां शारदा
शिवः सुकविवाचि तां जनयतां जनानां रुचिम् ॥

(४७) निगमसदृशमेतत्पुण्यदं पाणिनीयं
प्रियतमजनवृन्दं यत्नतः पाठनीयम् ।
फलमिह पदबोधे लाघवं साधनीयं
द्विजकुलमपि मेधावर्धनं ज्ञापनीयम् ॥
(दर्शनकेसरिगोपालशास्त्रिकृतं पाणिनीयनाटकम्, ९।३)

(४८) नारीनाटकमाशु सम्प्रसरतां नार्योऽपि शिक्षाप्रियाः
स्युर्वीरा निजधर्मकर्म निरता मातृत्वगर्वावृताः ।
पाश्चात्यानुकृतिं विहाय मनसा पूर्वाभिमुख्यश्चिराद्
आर्याणां पुनरानयन्तु विगतं नारीमहत्त्वं भुवि ॥
(दर्शनकेसरिगोपालशास्त्रिकृतं नारीजागरणम्, ७।१)

(४९) प्राक् प्राप्नोतु चिराद् गिरासहचरीमुद्रां समुद्रात्मजा
नो चेन्मुञ्चतु वैरमित्यपि न चेन्मूढेषु मा मज्जतु ।
येषां दुर्मदमोहदुर्दिनदृशां दोषस्पृशामग्रतः
कालग्रस्त इवावसीदति सतामन्तर्निगूढो गुणः ॥

अपि च—

पुरस्तात्पैशुन्यं परिहरतु गोष्ठीं गुणजुषा-
मथैषामौन्नत्ये मुदितमिदमास्तां जगदपि ।
कवेरेतत्कल्पावधिमधुरगम्भीरगुरुभिर्
गिरां गुम्फैः स्यूतं सुकृतमनुगृह्णन्तु सुहृदः ॥
(म० म० हरिहरकृतं प्रभावतीपरिणयम्, ७।६६-६७)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(५०) नित्यं व्याप्रियतां प्रजाजनहिते धर्मव्रतो भूपतिः
विद्वांसः परमाः प्रकीर्णयशसो यच्छन्तु नृभ्यः श्रुतम् ।
पीत्वा वाक्यरसं प्रकाममनितां काव्यप्रियौ जम्पती
भूयासुः सुखिताः प्रसन्नमतयस्ते यैश्च पुण्यैः स्तुतम् ॥
(डॉ० वी० के० भट्टाचार्यकृतं कविकालिदासम्, ७।२३)

(५१) स्वाधीनाः स्मो वयन्त्वद्य स्वश्रमफलभोगिनः ।
गीताकुरानयोः पाठं कुर्याम संहिताः तदा ॥
(रामकृष्णशर्मकृतं बांग्लादेशोदयम्, १०।१७)

(५२) समत्वं देवानां मनुजदनुजानां च मिलनं
विभूतिर्विश्वेषां निजनिजरुचेः पूरणकरी ।
दयामैत्रीमोदा व्यवहृतिपदं यान्तु सुखदाः
जनः सर्वस्सर्वोदयमभिलषेत् प्रेमसहितम् ॥
(श्रीकृष्णजोशिकृतं श्रीकृतार्थकौशिकम्, ६।५४)

(५३) भवतु सकलयोगक्षेमवानेष देशो
विलयमयतु लोके वैरभावोऽप्यशेषः ।
भवतु बहुसमृद्धिश्चान्नवस्त्रोद्यमस्य
भवतु निखिललोके सत्यविद्यागमश्च ॥
(श्रीकृष्णजोशिकृतं श्रीपरशुरामनाटकम्, १०।४०)

(५४) भिन्नेषु लोकनिवहेषु समानता स्यात्
सद्भावनाविपुलितः प्रणयो मिथः स्यात् ।
लोके समृद्धिरखिलास्तु जनः सुखी स्यात्
नारायणस्य नितरां परिकीर्त्तनं स्यात् ॥
(श्रीकृष्णजोशिकृतं सत्यसावित्रम्, ७।२४)

(५५) स्वदेशत्राणार्थं सकलजनतासौ प्रयततां
न भूयात्सीमातिक्रमणमसकृद् दानवकृतम् ।
धनैर्धान्यैः पूर्णं भवतु विभवैः राष्ट्रमिदकम्
उदेतु स्वातन्त्र्यं भवतु जनशान्तिश्च भुवने ॥

अपि च—

नरीनर्त्तु साम्यं निखिललोकमध्ये
स्वतन्त्रा भवन्तु प्रवरमानवा ये ।
नयं मित्रतां प्रेम सुमतिं गृहीत्वा
शुभं मानवं राज्यमनघं प्रसार्यम् ॥
(डॉ० शिवसागरत्रिपाठिकृता प्राणाहुतिः, १।३०–३१)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(५६) आ शैलादा च कन्यां यदवधिसरितश्शैलकान्तारपुञ्जाः
तीर्थाः ये मुक्तिकल्पा अगणितकणिका भारतीयाचलायाः ।
तेषां भूयान्निनादः पटहशतमितोऽयं सदा विश्वव्यापी
देशोऽयं सोऽस्मदीयः सुकृतधनवतां विद्विषां मानमर्दी ॥

भूपालास्सन्तु ये केऽपि सौराष्ट्रासमधारिणी ।
एकसूत्रा परं भूः स्यादाहिमालयसागरम् ॥
(डॉ० अभिराजराजेन्द्रमिश्रकृतं राधामाधवीयम्, १।२०–२१)

(५७) भारतभूमिरार्यजनसंवसतिरियमहो
यामुनगाङ्गनीरधवला हिमगिरिशिखरा ।
ज्ञानविवेकयागयमिता बहुगुणसहिता
जीवतु सा चिरं विभवदा कलिमलरहिता ॥
(डॉ० अभिराजराजेन्द्रमिश्रकृतः फण्टूसचरितभाणः, १।३)

(५८) कण्ठे कण्ठे निकामं विबुधगुरुगिरं यत्नतः स्थापयित्वा
चित्ते चित्ते चरित्रं दुरितदरहरं पावनं पूर्वजानाम् ।
विद्वेषाग्निं हत्वा निखिलजनमनःकामनां कल्पयित्वा
राष्ट्रेऽस्मिन् भारताख्ये विलसतु नितरां लोकतन्त्राधिकारः ॥
(डॉ० अभिराजराजेन्द्रमिश्रकृतम् अकिञ्चनकाञ्चनम्, १।१४)

(५९) धर्मे मतिर्भवतु कर्मणि च प्रवृत्तिः
त्यागे रतिर्भवतु लोकहितेऽनुरक्तिः ।
संवर्धतां सुरगवी गतिदा समेषां
राष्ट्रं समृद्धमधिकं किल भारतं स्यात् ॥
(भोजमणिशुक्लकृतं कादम्बरीनाटकम्, ३।२०)

उपर्युद्धृतानि कतिपयानि भरतवाक्यानि मामकीनाया अस्या धारणाया जनकानि पोषकाणि च सन्ति यत् संस्कृतदृश्यकाव्यानां भरतवाक्येषु स्वदेशानुरागस्य संस्पर्शः सन्तिष्ठते । यतो ह्येषु उत्तरस्यां दिशि हिमालयादारभ्य दक्षिणस्यां दिशि सागरपर्यन्तं विस्तीर्णे भारतभूमिभाग एकातपत्रस्य प्रशासनस्याऽऽशंसाः कृताः सन्ति; भारतभूमेर्मानवीकरणं कृत्वा हिमालय-विन्ध्याचलौ तदीयकुण्डलद्वयरूपेण मतौ स्तः; क्वचिद् हिमगिरिर्भारतमातुर्मुकुटरूपेण, सागरस्य च नीलो कलराशिस्तस्याः शाटीरूपेण वर्णितोऽस्ति । एतेषु (भरतवाक्येषु) इयमप्याकाङ्क्षा कृतास्ति यद् आस्माकीना भूमिर्धन-धान्य-सस्य-फलादिभिः सदैव सम्पन्ना भवेत्; अत्र समयेऽभीष्टा जलवृष्टिर्भवेत्; ईति-भीति-दुर्भिक्षादयो विपत्तयोऽत्रत्येषु निवासिषु नैव पतेयुः; अत्र लक्ष्मीः सरस्वती चोभे

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एव संगत्य निवासं कुर्याताम्; अत्यत्रः शासकः प्रजानां हितैषी भवेत्; हितकारको भवेत्; स्वराष्ट्ररिपुदमनो भवेत्; स्वदेशधर्मं प्रति च जागरूको भवेत्, अत्रत्या पशुसम्पद् विशाला भवेत्; अत्रत्या गावश्चाधिकदुग्धदायिन्यो भवेयुः।

अत्र सज्जनानां विकासस्तथा दुर्जनानां विनाशो भवेत्; जनानां मनांसि तावद् ईर्ष्या-कलहादिरहितानि भवेयुः; सर्वत्राऽऽमोद-प्रमोदसाम्राज्यं स्यात्; जनेषु सांस्कृतिकी साहित्यिकी च संचेतना संचरेत्; परोपकारभावना वर्धेत्; स्वधर्मं स्वभाषां संस्कृतभाषां च प्रति निष्ठा भवेत्; ब्राह्मणेषु वेदविद्याबोधाय वास्तविकी योग्यताऽऽहिता स्यात्; क्षत्रियेषु राजनीतिनैपुण्यं सर्वरक्षासामर्थ्यं च प्रविशेत्; वैश्येषु व्यापारं प्रति सद्भावना स्यात्; सत्यता स्यात्; निष्ठा स्यात्; भृत्यवर्गे कर्त्तव्यनिष्ठा क्रियाशीलता च प्रकटिता भवेत्।

भरतवाक्येष्विदमप्याकाङ्क्षितमस्ति यद् अस्माकं देशस्य सर्वैरेव जनैर्देशभक्तैर्भवितव्यम्; स्वदेशस्य गर्वो विधेयः; स्वधर्मं स्वकर्त्तव्यं च प्रति जागरूकैर्भाव्यम्; स्वमातृभूमये किं वा स्वजन्मभूमये स्वव्यक्तिगतमोक्षेच्छापेक्षयाऽधिकं महत्त्वं प्रदातव्यम्; सङ्घे, मातृभाषायाः। या संस्कृतभाषाऽस्ति, तस्याः पठन-पाठनाभ्यां संवर्धनं करणीयम्; पारस्परिकं कलहं परित्यज्य स्वसमग्रराष्ट्रकल्याणे प्रवर्त्तितव्यम्; तथा भारतीयसभ्यतासुधामपहाय पाश्चात्यसभ्यतामदिरापानाय विस्मृत्यापि नैव प्रयतितव्यम्। सर्वेषामुन्नतिः स्यादित्येवं प्रकारा कामना सर्वैरेव करणीया, यतो ह्ययमेव सर्वोदयोऽस्ति; गीताकुराणाभ्यां सम्मानो दातव्यः, यतो हीमावुभावेव ग्रन्थौ धार्मिकौ स्तः; कृषकेभ्योऽपि सम्मानो दातव्यः, यतो हीमेऽन्नमुत्पादयन्ति, यथा सर्वेषां जीवनरक्षायै कल्पते; तथा वर्तमानशासनप्रणाली (या सर्वजनहिताय वर्तते) स्वच्छतापूर्वकं सुस्थिरीकरणीया।

भरतवाक्येषु स्वराष्ट्रस्य स्वाधीनतां प्रति सदैव संवेदनशीलो भवेज्जन इत्यपि सन्देशः सन्निहितोऽस्ति। महिलाभ्योऽपि वीराङ्गनायितुं प्रेरणा प्रदत्तास्ति, फलतस्ता अपि राष्ट्ररक्षायां स्वकीयं सक्रियं सहयोगं दातुं शक्नुयुः।

एवम्भूतां हार्दिकीमनुभूतिं कुर्वन्तो वयं संक्षेपेण कथयितुं शक्नुमो यत् संस्कृतसाहित्यस्य भरतवाक्येषु प्रकटितानां कामनानां केन्द्रितं लक्ष्यम् इदमेव वरीवृत्यते यद् भारतीयसमाजः सर्वथैव सुखी, समृद्धः, शक्तिसम्पन्नः, सम्मानितो विश्वप्रियश्च भवेत्। आस्माकीनो विश्वासो विद्यते यद् भरतवाक्येषु निहितमिदं लक्ष्यं स्वदेशानुरागात्मकरूपेण स्वीकर्त्तुं कस्यचिदपि भारतीयमनीषिणो मनसि काचिदपि विप्रतिपत्तिर्नैव भविष्यतीति शम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नाट्यशास्त्रे संगीतम्

डॉ० टि० जि० अनन्तसुब्रह्मण्यन्
प्राध्यापकः,
केन्द्रीयसंस्कृतविद्यापीठम्, तिरुपतिः

* * *

तत्र प्रथमं नाट्यशास्त्रस्योत्पत्तिरुच्यते—

सर्वशास्त्रार्थसम्पन्नं सर्वशिल्पप्रवर्तकम् ।
नाट्याख्यं पंचमं वेदं सेतिहासं करोम्यहम् ।। (ना० अ० १, १५)

एवं संकल्प्य भगवान् सर्वान् वेदाननुस्मरन् ।
नाट्यवेदं ततश्चक्रे चतुर्वेदाङ्गसम्भवम् ।। (ना० अ० १, १६)

जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च ।
यजुर्वेदानभिनयान् रसानाथर्वणादपि ।। (ना० अ० १, १७)

इति ब्रह्मणा प्रथमतो नाट्यशास्त्रं निर्मितम् । अनन्तरं चतुर्मुखेन भरतमुनये तच्छास्त्रं दत्तम् । भरतमुनिः शतसंख्याकान् स्वपुत्रान् प्रत्युपदिदेश । ततो नाट्यं प्रायोगिकं खल्विति बुद्ध्या—

अशक्या पुरुषैः सा तु प्रयोक्तुं स्त्रीजनादृते ।
ततोऽसृजन्महातेजा मनसाप्सरसो विभुः ।।
नाट्यालङ्कारचतुराः प्रादान्मह्यं प्रयोगतः ।। (ना० अ० १, ४५, ४६)

नाट्यप्रयोगार्थम् अप्सरसः सृष्टाः । नाट्यस्य प्राधान्यं संगीतं तदर्थं चतुर्मुखेन—

स्वातिभाण्डो नियुक्तस्तु सहशिष्यैः स्वयंभुवा ।
नारदाद्याश्च गन्धर्वा गानयोग्ये नियोजिताः ।। (ना० अ० १, ५०)

स्वातिभाण्डेत्यादिघृषिगणं नियोज्य नारदादिगन्धर्वा गानकर्मणि नियुक्ताश्च । नाट्यं कीदृशम्, किमर्थं प्रयुज्यत इति जिज्ञासामुच्यते—

वेदविद्येतिहासनामाख्यानपरिकल्पनम् ।
विनोदकरणं लोके नाट्यमेतद् भविष्यति ।। (ना० अ० १, १२२)

नाट्ये बहवो विभागाः सन्ति, तथापि ताण्डवम्, नृत्तमिति प्रसिद्धम् । ताण्डवमेतत् तण्डुमहर्षिणा निर्मितम् "ताण्डवम्" इति नाम, पुरुषकर्तृकमेतत् ।

नृत्तम्, नृत्यम्, नाट्यम् इत्येते शब्दाः पर्यायवाचकाः—स्त्रीकर्तृकमेतत् । किन्त्वेकैकस्य मनागेव भेदः । नृत्तं प्रति भरतेनोच्यते—

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रायेण सर्वलोकस्य नृत्तमिष्टं स्वभावतः ।
मङ्गल्यमिति कृत्वा च नृत्तमेतत्प्रकीर्तितम् ॥ (ना० अ० ४, २६६)
विवाहप्रसवावाहप्रमोदाभ्युदयेषु च ।
विनोदकरणं चेति नृत्तमेतत् प्रवर्तितम् ॥ (ना० अ० ४, २६७)

नृत्तमेतत् सर्वेषां जनानामाह्लादकरं भवति । अपि च मङ्गलार्थं नृत्तं प्रयोजयति । नृत्तं तु विवाहे, पुत्रजन्मोत्सवे, जामात्राह्वानसमये, विजयसन्दर्भे, अन्येषु सन्तोषजननकालेषु च प्रयुज्यते ।

नाट्यशास्त्रे सप्तविंशदध्याया वर्तन्ते । तेष्वष्टविंशाध्यायादारभ्य चतुस्त्रिंशाध्यायपर्यन्तं संगीतशास्त्रसम्बन्धिनो विषयाः प्रतिपाद्यन्ते । अस्मिन् ग्रन्थे प्रधानतया नाट्यविषया निरूपिताः सन्ति, नाटकसम्बन्धिनो विषयाश्च प्रतिपाद्यन्ते । केवलं नाट्यमात्रेण लोके प्रयोजनं न पर्यवस्यति । नाटकेन सह नाट्यं प्रदर्श्यते चेत् प्रयोजनं भविष्यतीति भरतस्याशय इति मन्ये ।

नाट्यस्य संगीतस्य च कः सम्बन्ध इति चेदुच्यते—संगीत विना नाट्यस्य स्थानं नास्ति—

एवं गानं च वाद्यं च नाट्यं च विविधाश्रयम् ।
अलातचक्रप्रतिमं कर्तव्यं नाट्ययोक्तृभिः ॥ (ना० अ० २८, ७)

गानवाद्याभ्यां सहैव नाट्यं जनरञ्जकं भवति । तथैव संगीतशास्त्रं च—

गीतं वाद्यं तथा नृत्तं त्रयं संगीतमुच्यते । (सं० र० १, २१)

गीतवाद्यनृत्तानां सम्मेलनमेव संगीतमिति शार्ङ्गदेवेनोच्यते । संग्रहचूडामणौ गोविन्ददीक्षितैस्तु—

नृत्यं गीतं च वाद्यं च दृश्यं श्राव्यं मनोहरम् । (सं० चू० २, १)

इत्युच्यते ।

गीतं च नादात्मकमित्युपेतं वाद्यं च नादानुगतं भवेत् तत् ।
एतद्द्वयेनानुगतं च नृत्तं नादस्त्रयाणामपि हेतुरस्मात् ॥
(सं० सु० ४२)

गीतमेतत् नादाधीनम्, वाद्यं तु नादानुगतम् (गीतानुगतम्)। एतद्द्वये-नानुगतमेव नृत्तमिति रघुनाथभूपेनोच्यते । अतो नाट्यमेतद् गीतवाद्यानुगतमेव । अनेनान्योन्याश्रयत्वं ज्ञायते द्वयोः । अत एव भरतेन नाट्यशास्त्रे संगीतसम्बन्धिनो विषयाः सप्तस्वध्यायेषु प्रतिपाद्यन्ते; किन्तु संगीतशास्त्रविषया अन्येषु शास्त्रेषु यथा प्रतिपादितास्सन्ति, तथा न प्रतिपादिता नाट्यशास्त्रे । नाटकस्याधिकमुख्यत्वदानेन तत्र नाटकसम्बन्धिनः साहित्यविषया एव अधिकतया दरीदृश्यन्ते । किन्तु नाटकेऽपि सङ्गीतस्यावश्यकत्वात् किञ्चित् प्रतिपाद्यते । अन्ये

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

संगीतग्रन्था भरतमुनिनाट्यशास्त्रादनन्तरमागता भरतमुनिमाधारीकृत्यैव संगीत-विषयान् प्रतिपादयन्ति ।

ते ग्रन्थाः संगीतशास्त्रं विस्तृतया, स्पष्टतया च प्रतिपादितवन्तः सन्ति । नाट्यशास्त्रादनन्तरं संगीतरत्नाकरग्रन्थमनुसृत्येवान्ये संगीतग्रन्था रचिता इति ज्ञायते । आधुनिककाले नूतनप्रायोगिकविधिमाश्रित्य बहवो ग्रन्था आगताः । नाट्यशास्त्रकाले नाटकेष्वेव नाट्यस्य प्रयोजनमासीदिति ज्ञायते । प्रत्येकतया संगीतस्य प्रायोगिकरीत्या प्रयोजनं न दृश्यते । अत एव नाट्यशास्त्रे नाट्यस्य प्रायोगिके यावत् संगीतम् अपेक्ष्यते, तावदेव भरतेन प्रतिपादितमिति मन्ये । अपि च गानेन सह वाद्यस्यापि प्राधान्यं दत्तम् । वाद्येषु मुख्यतया वीणावेणु-मृदङ्गमिति वाद्यत्रयमेव वर्ण्यते । नाट्यस्य तालसाहाय्यमनिर्वर्णनीयम् । संगीतस्य प्राधान्यं रागस्य रागालापन एव वर्तते । तादृशरागान् प्रति किमपि नोक्तम् । अपि च छन्दश्शास्त्राणां विवरणं दृश्यते । अत एव ज्ञायते यच्छन्दसां प्रधान्यं दत्वा तेषु संगीतं च प्रयुज्य नाट्यप्रयोगो विहित इति ।

अन्येषु संगीतग्रन्थेषु रत्नाकरादिषु नादः, श्रुतिः, स्वराः, ग्रामः, मूर्च्छना, मेलः, रागः, तालः, वाद्यम् इत्यादिरूपः क्रम इत्येते प्रकरणरूपेण विविच्य प्रतिपादिता वर्तन्ते । श्रुतिविषये किमपि नोक्तम् । स्वरविषयेऽधिकतया नोक्तं भरतेन । वेणुजाः शरीरजाश्चेति द्विधा स्वराः कथ्यन्ते—

व्यधिष्ठानाः स्वरा वैणाः शारीराश्च प्रकीर्तिताः । इति ।

(ना० अ० १८, १२)

अनन्तरं श्रुतीनां ज्ञानं तासां विभागाश्च वीणायामेव ज्ञातुं शक्यानि । इदं वीणावाद्यं क्रि० प० १६१४ शताब्दादनन्तरमेव श्रीरघुनाथभूपालकाला-दारभ्याऽऽधुनिकवीणास्वरूपमासाद्य दाक्षिणात्ये प्रसिद्धमासीत् । नाट्यशास्त्रकाले तन्त्रीवाद्यमिति सामान्यतया नाम दृश्यते । तन्त्रीवाद्यं तु द्विविधमिति नाट्यशास्त्रे प्रतिपाद्यते —

सप्ततन्त्री भवेच्चित्रा विपञ्ची तु भवेन्नव ।
कोणवाद्या विपञ्ची स्याच्चित्रा चाङ्गुलिवादना ॥ इति ।

(ना० अ० २९, ११८)

यद्यपि स्वराणां लक्षणं स्वरूपं च न प्रतिपादिते, तथापि स्वराणां भेदा वर्णिताः स्वरसम्बन्धिनो विषयाः—ग्रामः, मूर्च्छना, वादी, संवादी, अनुवादी, विवादी इत्यादिविभागाः प्रतिपादिताः सन्ति । ग्रामविषये षड्जग्रामो मध्यम-ग्रामश्चाङ्गीक्रियेते । द्वाविंशतिश्रुतिपक्षोऽनेन अङ्गीकृतः । किन्तु संगीतविषयाः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स्पष्टतया, अधिकतया न विमर्शिताः। इमे नाटचशास्त्रादनन्तरमागतेषु संगीत-रत्नाकरादिग्रन्थेषु विशदतया दृश्यन्ते।

संगीताभ्यास आरम्भशिक्षणार्थं किमपि न प्रतिपादितम्। नाटचशास्त्रा-दनन्तरमेव सा पद्धतिरागतेति ज्ञायते। नाटचशास्त्रे वर्णस्य लक्षणं नोक्तम्। संगीतरत्नाकरे वर्णस्य लक्षणं दृश्यते—'गानक्रियोच्यते वर्णः' (१, १५१) इति।

गानक्रियाया वर्णत्वमिति। स्वरपद्धतेर्वर्णनाद् विस्तारकरणाद् वा वर्ण इत्युच्यते। नाटचशास्त्रे वर्णलक्षणमनुक्त्वा तस्य विभाग उक्तो नाटचशास्त्रे—

आरोही चावरोही च स्थायि सञ्चारिणो तथा।
वर्णश्चित्वार एवैते ह्यलङ्कारास्तदाश्रयाः॥ इति।
(ना० अ० ३१, १४)

आरोही, अवरोही, स्थायी, संचारीति चत्वारो वर्णभेदाः। वर्णाश्रया अलङ्कारा इत्युच्यते भरतेन। किन्तु स्वरविन्यास एव अलङ्कार इति चोच्यते। संगीतग्रन्थेष्वलङ्कारा इति सप्ततालनिबद्धाः प्रसिद्धाः। स्वराणां विन्यास एवाऽ-लङ्काराः। अभ्यासार्थमध्याप्यन्तेऽलङ्काराः। अलङ्काराणामुपयोगो वर्णेषु स्वर-विन्यासार्थंरूप इति नाटचशास्त्रे दृश्यते। स्थायिगतवर्णविभागाः प्रदर्श्यन्ते ग्रन्थेषु। प्रसन्नादिः, प्रसन्नान्तः, प्रसन्नाद्यन्त इति चत्वारो विभागाः। प्रसन्नत्वं मन्द्रस्थायिस्वरस्य। स्वराणां मन्द्रस्थायित्वं स्वराणामधोनिक्षेपणाज्ज्ञातुं शक्यम्। यथा—(निः) इति। तारस्थायित्वं तु स्वराणामुपरि रेखाचिह्नेन ज्ञातुं शक्यम्। यथा (सं) इति। संगीतरत्नाकरे मन्दत्वं स्वराणामुपरि बिन्दु-निक्षेपणाज्ज्ञातुं शक्यम्। अस्यैव प्रसन्नत्वमित्युच्यते। (सं) प्रसन्नमिति पदस्य मन्द्रस्थायिस्वरस्य नामेति वक्तुं शक्यम्। शिरोगता रेखा तारस्वरस्य संकेतः। रत्नाकरे—

मन्द्रो बिन्दुशिरा भवेत्।
ऊर्ध्वरेखाशिरास्तारो॥ (र० स्वर–अ० १–८)

स्वराणां मन्द्रमध्यतारस्थानानि नाटचशास्त्र उच्यते—

यस्तु कण्ठे स्वरोधः स्यात् स तु तारः प्रकीर्तितः।
उपरोगतस्तथा मन्द्रो मूर्ध्नि तारस्तथा···॥ इति।
(ना० अ० २९–३९)

अत्र मन्द्रमध्यतारस्थानानि नादस्यैव, न तु स्वरस्य। नादस्य स्थानानि त्रीणीति रत्नाकरे—

व्यवहारे त्वसौ त्रेधा हृदि मन्द्रोऽभिधीयते।
कण्ठे मध्यो मूर्ध्नि तारो द्विगुणश्चोत्तरोत्तराः॥ इति।
(सं० र० पु० ६६)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अतश्च संगीतसुधायामपि—

मन्द्रो हृदि स्यादधःकण्ठदेशे मध्याह्वयो मूर्धनि तार उक्तः। इति।

(श्लोकः-१०१)

अतो भरतमुनेरभिप्रायश्चिन्तनीयः। नादोत्पत्त्यनन्तरं स्वराः संजायन्ते। स्वरास्तु श्रुतिमाधारीकृत्यैवोत्पद्यन्ते। द्वाविंशतिश्रुतिद्वारा स्वराणां विभागाः संजायन्ते। स्वराणां विभागेन बहवो रागाः सम्भवन्ति। भरतस्तु रागाणां विषये किमपि नोक्तवान्, तन्त्रीवाद्यविषये त्वेवमुच्यते भरतेन।

सप्ततन्त्री भवेच्चित्रा विपञ्ची तु भवेन्नव।
कोणविद्या विपञ्ची स्याच्चित्रा चाङ्गुलिवादना॥ इति।

(ना० अ० २९-११८)

अत्र सप्ततन्त्रीवाद्यं 'चित्रा' इत्युच्यते। नवतन्त्रीवाद्यं 'विपञ्ची' इति। कोणेन वादयितुं योग्या विपञ्ची। कोण इत्युक्ते दण्ड इत्यर्थः। दण्डेन सन्ताड्य वाद्यमानानि वाद्यानि बहूनि सन्ति। गोट्टुवाद्यम् इति किञ्चिद्वाद्यं वर्तते। गद् वाद्यमित्येकं वाद्यम्, चापवद् वेणुतन्त्रीसंयोगेन निर्मितम् वाद्यम्, तस्य नाम तमिल-भाषायां "विल्लु पाट्टु" इत्युच्यते ग्रामीणवाद्येषु प्राचीनतमम्। एतानि वाद्यानि कोणेनैव वादनीयानि भवन्ति।

अङ्गुलीभिर्वादयितुं योग्या 'चित्रा'। केचन वदन्ति कोणाङ्गुलिवादनीया विपञ्चीति। अङ्गुलिमात्रवादनीया चित्रेत्याहुः। आधुनिककाले 'वीणा' इति किञ्चिद्वाद्यं व्यवहारे वर्तते। इदं वीणावाद्यं क्रिस्तोः परं सप्तदशशताब्दादनन्तर-मेवागतमिति ज्ञायते। ततः पूर्वं तन्त्रीवाद्यानि वीणेति नाम्ना प्रसिद्धानि बहून्या-सन्निति ज्ञायते। एतानि वाद्यानि श्रुतिज्ञानप्रयोजकान्येवेति ज्ञायते, न तु स्वराणां प्रतिपादनार्थम्। अयं विषयो नाट्यशास्त्रादनन्तरमागतेभ्यः संगीतग्रन्थेभ्यो ज्ञायते। 'वीणा' इति वाद्यं स्वरावगमनार्थमिति। अयं विषयः संगीतसुधायां द्रष्टुं शक्यः। यथा—

सप्तस्वरास्तत्र निवेशनीयास्तन्त्रीषु तस्याश्च यथा स्वदेशम्।

(सं० सु० श्लो० १०८)

वीणा विधेया व्यवहारयोग्या द्वाविंशतिप्रोज्ज्वलपर्वयुक्ता।
तत्रैव षट्षष्टिविधाः श्रुतीश्च मन्द्रादिभेदानपि कल्पयन्ति॥ इति।

(सं० सु० श्लो० ११७)

अत एव वीणावाद्यं तावत् संगीतस्यातीवोपकारकं भवति। वीणाप्रकरण-मिति संगीतग्रन्थेषु प्रत्येकविभागो दरीदृश्यते। नाट्यशास्त्रे तादृशं प्रकरणं नास्ति; किन्तु नाट्यशास्त्रोक्तविपञ्चीवाद्यं प्राचीनग्रन्थेषु दृश्यते।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आदिकाव्ये रामायणे सुन्दरकाण्डस्यैकादशे सर्गे—"विपञ्चीं परिगृह्यान्या" इति।

सौन्दर्यलहर्यां "विपञ्च्या गायन्ती" इति च दृश्यते। अत्र विपञ्ची वीणा त्रितन्त्रीति केचिद् वदन्ति।

वीणावाद्यानि बहूनि सन्ति। यथा—

विश्वावसोस्तु बृहती तुम्बुरोस्तु कलावती।
महती नारदस्य स्यात् सरस्वत्यास्तु कच्छपी॥ इति वैजयन्ती।
"विपञ्ची सा तु तन्त्रीभिः सप्तभिः परिवादिनी" इत्यमरः।

अत एव 'विपञ्ची' इति वाद्यमाधुनिकवीणावाद्यमिति ग्रहीतुं शक्यम्। आधुनिकवीणायां सप्ततन्तव एव दृश्यन्ते। नाटचस्य गानं (गात्रं) प्रधानमिति भरतमुनिना निर्दिश्यते—

पूर्वं गानं ततो वाद्यं ततो नृत्तं प्रयोजयेत्।
गीतवाद्याङ्गसंयोगः प्रयोग इति संज्ञितः॥ इति।
(ना० अ० ३२, ३७८)

नाटकेषु गानं कथमुपयोक्तव्यं कस्यां भाषायामित्यस्मिन् विषये भरतमुनिः सम्यक् प्रतिपादयति—

दिव्यानां संस्कृतं गानं प्रमाणैस्तु विधीयते।
अर्धसंस्कृतमेवं तु मानुषाणां प्रयोजयेत्॥ इति।
(ना० अ० ३२, ३८४)

देवनृपाणां व्याकरणपरिष्कृतसंस्कृतगानं प्रशस्यते। नराणामर्धसंस्कृतं प्रयोक्तव्यमिति त्रिवर्गप्रसिद्धं संस्कृतं मध्ये मध्ये तत्तद्देशभाषादियुक्तं गानं गेयम्। दक्षिणापथे दाक्षिणात्यदेशे 'मणिप्रवालम्' इति काचित् भाषा व्यवह्रियते।

नाटचस्य गानप्राधान्यमनेन श्लोकेन ज्ञातुं शक्यते—

यथा वर्णादृते चित्रं न शोभोत्पादनं भवेत्।
एवमेव विना गानं नाटचं रागं न गच्छति॥ इति।
(ना० अ० ३२, ४२५)

अनन्तरं गातॄणां विपञ्चीवादकवंशवादकानां च गुणांस्तावदाह –

गाता प्रत्यग्रवयाः स्निग्धां मधुरस्वरोपचितकण्ठः।
लयतालकलापातप्रमाणयोगेषु तत्त्वज्ञः॥ (ना० अ० ३३, २)
रूपगुणकान्तियुक्ता माधुर्योपेतसत्त्वसम्पन्नाः।
पेशलमधुरस्निग्धानुनादिसमरक्तगुरुकण्ठाः॥ इति।
(ना० अ० ३३, ३)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तत्र स्त्रीणां लक्षणम्—

सुविहितगमकविधायिन्यः, अक्षोभ्यास्तालल‌यकुशलाः।
आतोद्यार्पितकरणा विज्ञेया गायिकाः श्यामाः॥ इति।
(ना० अ० ३३, ४)

प्रायेण तु स्वभावात् स्त्रीणां गानं नृणां च पाठ्यविधिः।
स्त्रीणां स्वभावमधुरः कण्ठो नृणां बलित्वं च॥ इति।
(ना० अ० ३३, ५)

औपरिष्टेषु श्लोकेषु गायकगायिकानां सामान्यलक्षणमुक्तम्।

अत्र गात्रगायकानां लक्षणमुच्यते—

सुनिविष्टपाणिलययतियोगज्ञो सुमधुरलघुहस्तः।
गातृगुणैश्चोपेतावव‌हितमनसो सुसंगीतो॥ (ना० अ० ३३, ७)

वीणावादकानां लक्षणमुच्यते—

स्फुटरचितचित्रकरणो गीतश्रवणाचलो प्रवीणो च।
चित्रादिवाद्यकुशलो वीणाभ्यां वादको भवतः॥
(ना० अ० ३३, ८)

वेणुवादकानां लक्षणमुच्यते—

बलवानवहितबुद्धिर्गीतलयज्ञस्तथा सुसंगीतः।
श्रावकमधुस्निग्धो दृढपाणिवंशवादको ज्ञेयः॥
(ना० अ० ३३, ९)

चतुस्त्रिंशाध्यायेऽवनद्धवाद्यानां लक्षणमुच्यते—

अवनद्धमित्युक्ते चर्मणा बद्धं वाद्यमित्यर्थः। नाट्यशास्त्रे मुख्यतया मृदङ्गः, पणवः, दर्दर इति वाद्यानां त्रयाणामेव मुख्यवर्णनं दृश्यते। नाट्यनाटकस्यैतानि वाद्यानि प्रधानानि। नाट्ये तालस्यावश्यकत्वमनिर्वर्णनीयम्। तालप्रधानानि वाद्यान्येतानि। मृदङ्गपुष्करवाद्यानां जन्म वर्ण्यते नाट्यशास्त्रे कथारूपेण। यथा—

"स्वातिर्नाम कश्चिन्महर्षिर्मेघावृते महत्यनध्याये दिवसे जलानयनार्थं जलाशयं प्रति जगाम, तदा महती वृष्टिरागता। वायुवेगाज्जलाशये स्थितानां कमलपत्राणामुपरि जलधाराः पतिताः। जलधारायतनेन पत्रेषु शब्दाः सञ्जाताः। तान् शब्दान् श्रुत्वा महदाश्चर्यं सम्भूतं महर्षेः। शब्दस्य ध्वनिर्गम्भीरमधुरहृद्यमासीत्। तच्छब्दं मनसि ध्यात्वाश्रममागत्य मृदङ्गरूपवाद्यं कृत्वा तस्मिन् वाद्ये तान् शब्दान् वादयामास। तदा तस्मिन् वाद्ये त-धि-नम् इति शब्दाः सञ्जाताः। तदारभ्य मृदङ्गपुष्करवाद्यान्युत्पन्नानि" इति।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मृत्पदस्य द्वावर्थावुच्येते। मृद् मृदेव, अन्योऽर्थः मृत्='चर्म' इति। यथा तथा वा भवतु, मृद् अङ्गं यस्य तत्—मृदङ्गम्। किन्तु मृत, चर्म, काष्ठम् इत्यादीनि वस्तून्येकीकृत्यैव मृदङ्गं क्रियते।

नानाविधतालवाद्यानि, तथैव तन्त्रीवाद्ये द्वे एव, सुषिरवाद्यमेकं (वेणु) च प्रतिपाद्यते। नाट्ये गातृसंगीतस्यैव प्राधान्यं दीयते भरतेन। अत्रोच्यते—

यं यं गाता स्वरं गच्छेत् तमातोद्यैः प्रयोजयेत्।
यतिपाणिसमायुक्तं गुरुलघ्वक्षरान्वितम्॥ इति।
(ना० अ० ३४, ३४)

गातृभिर्यथा गीयते तदनुसृत्यैव वाद्यकारैर्वाद्यानि प्रयोक्तव्यानीति गातृ-गानस्य मुख्यत्वं दृढीक्रियते।

अथ प्रायोगिकविधिमुपदिशति। नाट्यशास्त्रे 'कुतप' इति पदं प्रयुज्यते। तस्यार्थः संगीतगोष्ठीनां क्रम इति। कुतं शब्दं पाति, कुं=रङ्गं पातीति कुतप इति व्युत्पत्तिर्दृश्यते। यथा—

"तत्रोपविष्टे प्राङ्मुखे रंगे कुतप एव विन्यासः कर्तव्यः। तत्र पूर्वोक्तयो-र्नेपथ्यगृहद्वारयोर्मध्ये कुतपविन्यासः कार्यः। तत्र रङ्गाभिमुखो मोरजिकस्तस्य पाणविकदर्दरिको वामतः। एष प्रथममवनद्धकेन तस्य ततः कुतपविन्यास उक्तः। तत्रोत्तराभिमुखो गायकः। गायकस्य तु वामपार्श्वे वैणिकः। वैणिकस्य दक्षिणेन वंशवादकः। गातुरभिमुखं गायिका इति कुतपन्यासः।" (ना० अ० ३४, २१५)

उपरिनिर्दिष्टवाक्यैर्नाट्यप्रदर्शनसमये संगीतगोष्ठीनामुपवेशनक्रमो ज्ञायते। मृदङ्गवादकानां तालज्ञानमावश्यकमिति प्रतिपादयति भरतः—

अतालज्ञमकालज्ञमशास्त्रं च वादकम्।
चर्मघातकमित्येवं प्रवदन्ति मनीषिणः॥ इति।
(ना० अ० ३४, २५२)

चर्मवाद्यनिर्माणार्थं चर्मस्वीकरणे लक्षणान्युच्यन्ते यथा—

न ज्वरोपहतं चर्म न च काकमुखाहतम्।
नापि दोषहतं क्लिन्नं न च धूमाग्निदूषितम्॥ इति।
(ना० अ० ३४, २६३)

यस्य मृगस्य चर्म वाद्यार्थमस्माभिः स्वीक्रियते, तस्य मृगस्य चर्म न ज्वरादिरोगोपहतम्, काकादिपक्षिणां मुखं चञ्चुदंशविहीनम्, न दोषेण निहतम्, आर्द्रताविहीनम्, न च धूमाग्निना दूषितं स्यादिति।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गवां चर्मेव श्लाघनीयम् उपयोक्तव्यमित्युच्यते। नाटये संगीतस्य मुख्यत्वं सम्यक् प्रतिपाद्यते।

अनन्तरं कण्ठस्य गुणा उच्यन्ते—

श्रावकोऽथ घनः स्निग्धो मधुरो ह्यवधानवान्।
त्रिस्थानशोभीत्येवं तु षट् कण्ठस्य गुणाः मताः ॥ (ना० अ० ३३, १२)

श्रावकः = सुस्वरः।
घनः = अवच्छिन्नस्वरः।
स्निग्धः = अरुक्षध्वनिसंयुक्तः।
मधुरः = मनःप्रह्लादनकरः।
अवधानवान् = स्वरे—अधिके, हीने च ह्यविरक्तः।
त्रिस्थानस्वरः = शिरःकण्ठेष्वभिहितः (नाभिहृत्कण्ठेष्वभिहितः)
(मन्द्रमध्यतारस्थायिषु संचारः)

अथ कण्ठदोषानपि वर्णयति। अनन्तरम्—नृत्तमिति।

नृत्तारम्भात्पूर्वं वाद्यानामेकश्रुतौ संयोजनमावश्यकम्। तस्य श्रुतिसंयोजनमिति नाम। संयोजनकार्यं प्रथमतः कर्तव्यम्।

गातृवाद्यकलाकाराणां स्थानं निर्धार्यते। तस्य नाम प्रत्याहार इति। अनन्तरं गायकगायिकानां स्थानेषूपवेशनम्। तस्य 'अवतरणम्' इति नाम—

"तथावतरणं प्रोक्तं गायकानां निवेशनम्" इति (ना० अ० ५, १७)

अथ—

"परिगीतक्रियारम्भ आरम्भ इति कीर्तितः" इति। (ना० अ० ५, १७)

गात्रा तावत् प्रथमतः श्रुतिसंयोजनानन्तरं रागालापः कर्तव्यः। तस्य 'आरम्भः' इति नाम। अनन्तरम्—

"आतोद्यरञ्जनार्थस्तु भवेदाश्रवणाविधिः" इति (ना० अ० ५, १८)

अधुना सर्वेषां वाद्यानामेकश्रुतौ संयोजनं कर्तव्यम्।

"वाद्यवृत्तिविभागार्थं वक्त्रपाणिर्विधीयते" इति (ना० अ० ५, १९)

अथ विविधवाद्यानां वादनं समीचीनतया संयोजितं वा न वेति संशोधनं कर्तव्यम्।

"तन्तुयोजः करणार्थं तु भवेच्च परिघट्टना"। (ना० अ० ५, १९)

वीणादितन्त्रीवाद्यानां संयोजनं कर्तव्यम्। तस्य "परिघट्टना" इति नाम।

"तथा पाणिविभागार्थं भवेत् संघोटनाविधिः" इति। (ना० अ० ५, १९)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अधुना चर्मवाद्यानां श्रुतिसंयोजनम् । अस्य नाम 'संघोटना' इति ।

"तन्त्रीभाण्डसमायोगान्मार्गसारितमिष्यते" इति । (ना० अ० ५, २०)

वीणादितन्त्रीवाद्येन सह चर्मावनद्धवाद्यानां श्रुतिसंयोजनं कृत्वा वादनं कर्तव्यम् । तस्य 'मार्गसारितम्' इति नाम ।

उपरिनिर्दिष्टकार्यक्रमो यवनिकाया अन्त एव कर्त्तव्यः । अनन्तरं यवनिकाया बहिर्गीतविधिः कर्त्तव्याः । तस्य लक्षणम्—

"कीर्तनाद् देवतानां च ज्ञेयो गीतविधिस्तथा" इति । (ना० अ० ५, १२)

अतो भरतो नाटचशास्त्रे नाटचस्योपोद्बलकत्वेन संगीतशास्त्रं प्रतिपादयति । किन्तु संगीतशास्त्रस्य विस्तृतत्वमन्येषु रत्नाकरादिषु ग्रन्थेष्वेव द्रष्टुं शक्यम् । नाटकनाटचस्याङ्गत्वेन संगीतं प्रतिपाद्यते । अन्ततः—

वाद्ये तु यत्नः प्रथमं नु कार्यः शय्या हि नाटचस्य वदन्ति वाद्यम् ।
वाद्ये च गीते च हि संप्रयुक्तो नाटचप्रयोगो न विपत्तिमेति[1] ।। इति ।

---

१. ना० अ० ३४, २०४ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सौन्दर्यविमर्शः

श्रीशिवजीउपाध्यायः

प्राध्यापकः, साहित्यविभागे

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य, वाराणसी

***

शब्दार्थयोर्यत्साहित्यं तच्च सौन्दर्यमन्तरा चमत्काराधायकं न भवतीति कृत्वा किं सौन्दर्यमिति जिज्ञासायां तल्लक्षणं तावन्निरूप्यते—

सुन्दरस्यैकदेशित्वाद् गुणत्वादुपचारतः ।
सौन्दर्यं तत्र शब्दार्थसाहित्ये विनिवेश्यते ॥ १ ।

सुन्दरेति । सुन्दरस्य सौन्दर्यवतः पदार्थस्य चित्ताकर्षकस्य मनोरमस्य रमणीयस्य वस्तुनो वा, एकदेशित्वादेकांशे विद्यमानत्वात्तद्धर्मतया च, गुणत्वाद्-गुणरूपत्वादप्रधानत्वाच्च, उपचारत आरोपितधर्मतः, सादृश्यातिशयेनाभेदेनो-पचरितरूपत्वादित्यर्थः। सौन्दर्यं चमत्कारत्वापरपर्यायं सुन्दरत्वगुणरूपं तत्र सुप्रसिद्धे प्रक्रान्ते शब्दार्थसाहित्ये शब्दार्थयोः सहभावेन सम्पद्यमाने काव्यात्मके शब्दार्थसमसमुदयसम्पन्नस्वरूपे विनिवेश्यते विशेषनिवेशविधिना सन्निधीयते। तत्र विशेषो रचनात्मकवर्णनाधर्मगतः, निवेशोऽत्र शब्दार्थसङ्घटनविधानात्मकः। कैरिति काव्यकृद्भिः काव्यतत्त्वविद्भिश्चेति शेषः। तेन च सुन्दरं चमत्कार-वत्काव्यसाहित्यं सम्पद्यते सौन्दर्यसन्निधानेनेति भावः।

सुन्दरत्वेन यत्ख्यातं तदन्यद्वस्त्वसुन्दरम् ।
तदेतदुभयं लोके साहित्ये त्वन्यथा प्रथा ॥ २ ।

सुन्दरेति । सम्प्रति लोकगतं साहित्यगतं च सौन्दर्यं भिन्नमिति निदर्श्यते—लोके यद् वस्तु सुन्दरत्वेन सौन्दर्यवदात्मगुणेन ख्यातं ख्यातिं प्रसिद्धिमवाप्तं लौकिकानां पदार्थानां मध्ये, तदन्यत्ततः सौन्दर्यवतो वस्तुनो यदन्यद्वस्तु पृथग्भूतं सुन्दरवस्तुव्यतिरिक्तं निखिलं वस्तुजातमसुन्दरं सौन्दर्यगुणहीनं सुन्दरत्वच्युतमिति व्यवह्रियते। तदेतदुभयं तादृशोभयविधं सुन्दरत्वासुन्दरत्वात्मकं व्यवहारविधानं लोक्यमानधर्मवति लोक एव पर्यवसीयते, तस्य लोकव्यवहारमात्रपर्यवसितत्वात्। एतदतिरिक्तं साहित्ये शब्दार्थसहभावसंवलितकाव्यात्मके जगति, त्विति लोका-त्साहित्यव्यवच्छेदार्थम्। लोकादन्यथा भिन्नभावेन लोकव्यवहारव्यतिरिक्त-विधिनेत्यर्थः। प्रथा प्रथमानपरम्परा परिपाटी रूढिरिति यावत्। सौन्दर्यतत्त्व-बोधविषयिका लोकस्थितिरन्या, काव्यसाहित्यादस्तीति शेषः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वर्णाः पदानि वाक्यानि साहित्ये निखिलान्यपि ।
संदृब्धानि प्रशस्यन्ते सौन्दर्यातिशयान्वयात् ॥ ३ ।

वर्णा इति । वर्णाः कचटतपादयो वर्णसमाम्नायाः, पदानि सुप्तिङन्तानि वर्णसमुदायात्मकानि, वाक्यानि पदसमूहात्मकानि क्रियान्वितानि, एतानि निखिलान्यपि समस्तानि वर्णपदवाक्यत्वविशिष्टानि शाब्दसन्दर्भोद्भावितानि साहित्ये शब्दार्थोभयात्मककाव्यलक्षणे संदृब्धानि सम्यगारचितानि कल्पितानि सन्निवेशितानि च प्रशस्यन्ते, प्रशस्ति भजन्ते प्रशस्यमानपदवीमधिगच्छन्ति । तत्र हेतुरुच्यते—सौन्दर्यातिशयान्वयादिति हेतोः । सौन्दर्यस्य सौष्ठवस्य कमनीयकवनवैशिष्ट्यस्य योऽतिशय आधिक्यं प्रसरः प्राचुर्यं वा, तस्यान्वयात्सम्बन्धात्संसर्गाच्च सर्वाण्यपि साहित्यगतानि रमणीयान्येव विशिष्यन्त इति भावः ।

लोके सुन्दरत्वेनासुन्दरत्वेन वा ख्यातानि निखिलान्यपि वस्तूनि वर्णपदवाक्यतया काव्यसाहित्ये सन्निवेशितानि सौन्दर्यवन्ति भवन्तीत्यभिप्रायः ।

सौन्दर्यसृष्टिसाराणां पदार्थानां निदर्शनम् ।
साहित्यं सुचिरं नव्यं काव्यमालक्ष्य लक्ष्यते ॥ ४ ।

सौन्दर्येति । सौन्दर्यसृष्टेः सुन्दरत्वगुणगुम्फितस्य सर्गस्य सौन्दर्यसम्भृताया रचनायाश्च साराणां तत्त्वभूतानां मूलोल्लासिरूपाणां वा पदार्थानां वस्तूनां वर्ण्यपदभाजां निदर्शनं निःशेषदृश्यभाजनं दृष्टान्तकरणं सामग्र्येणोदाहरणं च साहित्यं शब्दार्थसहभावोद्भासितं तदाख्यं लोकोत्तरं सरसं वस्तु सुचिरं नव्यं सुष्ठु चिरन्तनं नवीनं सुन्दरं नित्यं नवं चैतत् तादृशमेव सुष्ठु नित्यनवीनं काव्यं कविकर्मालक्ष्योद्दिश्य लक्षणविषयीकृत्य लक्ष्यते निरूप्यते लक्ष्यतावच्छेदकतया प्रतिपाद्यते ।

वस्तुतस्तु साहित्यं काव्यञ्चेत्युभयं पर्यायमात्रभिन्नं तत्त्वतोऽभिन्नं काव्यसाहित्यमित्यभिधानप्रतिष्ठं सचेतसां चेतोनिविष्टं तिष्ठतीति तात्पर्यमवसातव्यम् ।

तादृक्सृष्टिविधातारो विधातृकृतसृष्टितः ।
सम्भारानाददानास्ते विशिष्यन्ते ततोऽधिकम् ॥ ५ ।

तादृगिति । तादृक्तादृशोक्तप्रकारकसौन्दर्यसारसमवायसमवेतायाः, सृष्टेः सर्गस्य काव्यात्मकनिर्माणस्येति यावत् । विधातारो विधानेन कर्तारः काव्योपयिकसामग्र्या निर्मातार इति भावः । विधात्रा ब्रह्मणा जगद्विधानकर्त्रा कृताया विहितायाः सृष्टितः सर्गतः सम्भारान् निर्माणानुकूलोपकरणपदार्थान् काव्यसृष्टिविधानोपयुक्तसौन्दर्यवत्सामग्रीविशेषानित्यर्थः । आददाना संगृह्णन्तः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स्वीकुर्वाणाश्च ते पूर्वोक्ता विष्वग्विश्वविश्रुता काव्यसृष्टिकर्तारः कवयः, ततो विधातृकृतसृष्टितोऽधिकं सातिशयं यथा स्यात्तथा समन्ततस्ततोऽपेक्षयाऽऽतिशय्यं सन्दधाना, विशिष्यन्ते वैशिष्ट्यमातन्वते विशेषानादधते नियतिकृतनियमराहित्ये न लोकोत्तरत्वं भजन्ते ।

यदर्थं सस्पृहो लोको यदाप्तुं परमोत्सुकः ।
यदाप्य परिभुज्यापि सोत्कण्ठस्तद्धि सुन्दरम् ॥ ६ ।

यदिति । यद् वस्तु नित्यनवायमानमनुत्तमं लोकोत्तरं सद् यस्यार्थं यस्य तादृशस्य कमनीयतमस्य वस्तुनः कृते लोको जनः प्राणिसमुदायः सस्पृहः साभिलाषः सविशेषमनवरतं समीहमानः । किञ्च यदाप्तुं यद् वस्तु विशिष्टमवाप्तुमधिगन्तुं वा परमोत्सुकः सातिशयमुत्कण्ठापरायणोऽत्यन्तमौत्सुक्यवान् भवतीति शेषः । यद् वस्तु तादृशमाप्याधिगम्य परिभुज्य परितो भुक्तिविषयीकृत्य निरन्तरमास्वाद्यमानतामानीय दर्शनरसनस्पर्शनादिविधया विशेषतः प्रतिक्षणमक्षिलक्ष्यीकृत्यापि सोत्कण्ठ उत्कण्ठयान्वितः सततमुत्कलिकोन्मुखो लोको भवति तद्, विशिष्टलक्षणलक्षितं वस्तु सुन्दरं सौन्दर्यवदुच्चैस्तरमनुत्तरं सौन्दर्यगुणगरिमगरिष्ठमुच्यते । हीति ध्रौव्यार्थकम् । नैरन्तर्यं नवीनं दृश्यश्रव्यसमीचीनं सुखास्पदं वस्तु लोकोत्तरं सुन्दरमित्युच्यते, तच्च, काव्यात्मकमिति ।

निर्गलद्रसनिर्व्यूढं गुणालङ्कारसञ्चितम् ।
निर्दुष्टं भावभूयिष्ठं काव्यसाहित्यमेव तत् ॥ ७ ।

निर्गलदिति । निश्शेषेण गलन्निस्यन्दमानो यो रस्यते आस्वाद्यते रस्यमानतयाऽऽस्वादविषयीकृतो रस आस्वाद आह्लादजनकश्चमत्कृतिप्राणस्तेन निर्व्यूढं निःशेषतया परिक्लृप्तमनुस्यूतं परिप्लुतं वा । गुणैर्माधुर्यादिभिरलङ्कारैरनुप्रासोपमादिभिश्च सञ्चितं सम्यक् चितं व्याप्तं रसानुगुणतयोपस्कृतम् । निर्दुष्टं दोषरहितं नित्यच्युतसंस्कृत्यादिदोषवर्जितम् । भावभूयिष्ठं भावैर्विभावानुभावव्यभिचारिसात्त्विकादिभिर्भूयिष्ठं भूम्ना परिनिष्ठितं भूयो भाव्यमानस्वभावभावितमित्यर्थः । काव्यसाहित्यमेव काव्यं च तत् साहित्यं कविकर्म काव्यं तस्य शब्दार्थसहभावसंवलितं साहित्यं वा । तदेवेत्येवकारोऽन्ययोगव्यवच्छेदकः । तादृशमेवोपर्युक्तं काव्यसाहित्याभिधं नित्यनवीनं वस्तु सुन्दरं सौन्दर्यगुणाभिन्नं भवतीति भावः ।

ममेदं न ममेदं च यावदेतादृशी मतिः ।
तावत्स्वपरभावेन वस्तु भाति न सुन्दरम् ॥ ८ ।

ममेति । इदं पुरो दृश्यमानं वस्तु ममास्मत्सम्बन्धि मदर्थमुपयुज्यमानं वेति । इदं चैतत् तद्वैपरीत्येन न मम मत्सम्बन्धगतं मदर्थमुपसेव्यमानं वा

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नास्ति । चेति भिन्नसम्बन्धक्रमबोधकं बोध्यम् । यावद् यदवधिपर्यन्तं यावत्सम्बन्धभेदावबोधककालमेतादृशी मतिर्ममत्वाममत्वावबोधिका बुद्धिर्भेदभावविनिविष्टा तिष्ठति, तावत्तदवधिककालान्तं भेदात्मकबुद्धिमत्समय इति यावत् । स्वपरभावेन स्वमात्मीयं परं च परकीयमिति स्वपरे तयोर्भावेन स्वपरत्वेन हेतुना वस्तु परिमितस्वरूपं किमपि रमणीयमरमणीयं वा लौकिकमलौकिकं वा भोग्यमभोग्यं वा वस्तु पदार्थपरपर्यायं सुन्दरं सौन्दर्यवदभिन्नं न भाति, भानविषयतामुपयाति प्रतीतिविषयीभवतीति ।

तदेतत्परिहारेण साधारण्येन सर्वदृक् ।
काव्यमेवेति साहित्ये सौन्दर्यं सम्प्रतिष्ठते ॥ ९ ॥

तदिति । तत्तस्माद्धेतोरेतत्परिहारेणैतस्य ममत्वाममत्वरूपस्वपरभावपरित्यागेन अपरिमितस्वभावेनेत्यर्थः । साधारण्येन साधारणभावेन सामान्येन साधारणीकरणात्मना व्यापारेण व्यङ्ग्यव्यञ्जकभावसम्बन्धेन सर्वदृक् सर्वत्रदृष्टिमत्सर्वसामान्यदर्शनं सर्वसहृदयजनग्राह्यमिति भावः । तदेतादृशं काव्यमेव शब्दार्थसहभावभावितं दृश्यश्रव्यात्मकं रसगुणालङ्कारादिवैशिष्टचनिरूपितं कविकर्मैवेत्येवकारेण स्वेतरव्यतिरेको व्यज्यते । इत्यतो हेतोः साहित्ये काव्यसाहित्ये वर्णनात्मकशब्दार्थसमुदये साहित्यसन्दर्भे सौन्दर्यं सुन्दरत्वगुणो रमणीयभावः परमाह्लादजनकः सम्प्रतिष्ठते, सम्यक् प्रतिष्ठामासादयति समन्तात्प्रतिष्ठितो भवतीति ।

सौन्दर्याधायकं काव्य-साहित्यं चेत्प्रतिष्ठितम् ।
तदन्यन्निखिलं शास्त्रं किमग्राह्यमसुन्दरम् ॥ १० ।

सौन्दर्येति । ननु सौन्दर्यस्य सुन्दरत्वगुणस्याधायकमासमन्तादाधारकं चेद् यदि काव्यञ्च तत्साहित्यं काव्यस्य साहित्यं वा प्रतिष्ठितं प्रतिष्ठामधिगतं प्रतिष्ठायां स्थिरीकृतं वा सौन्दर्यतत्त्वविद्भिः काव्यसाहित्यविद्वद्भिरिति शेषः । ततश्च तस्मात्काव्यसाहित्यादन्यदितरत् निखिलं वेदस्मृतिपुराणादिकं शासनाच्छास्त्रमित्यभिधीयमानं किमग्राह्यम् ? किमु ग्रहणायोग्यम् ? श्रवणमननाध्ययनानर्हमनुपादेयमनावश्यकं वा ? किं वा तस्मात्काव्यसाहित्यादतिरिक्तं सर्वं वेदादिशास्त्रं पौरुषेयापौरुषेयमसुन्दरम् ? सुन्दरत्वगुणहीनमाह्लादजनकत्वाभावादनावर्जकमनुपयुज्यमानं वा स्यादिति चेदुच्यते—

नैतदूह्यं यतश्शास्त्रोच्चयस्तत्त्वप्रमाणकः ।
काव्यसाहित्यमेकान्तं सौन्दर्यज्ञानसाधकम् ॥ ११ ।

नैतदिति । एतत्काव्यसाहित्येतरदन्यन्निखिलं शास्त्रमग्राह्यमसुन्दरमिति नोह्यम्, न वितर्क्यं न शङ्क्यमिति भावः । यतश्च हेतोः शास्त्राणां वेदस्मृत्यागम-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पुराणप्रभृतीनामुच्चय उच्चयनादुच्चयः समूहः संग्रहो वा, तत्त्वं निगूढं रहस्यं पारमार्थिकं स्वरूपं वा प्रमाणयतीति तत्त्वप्रमाणकः परमात्मतत्त्वबोधकः, अध्यात्मदिगुन्मीलक आत्मानात्मभेदनिरूपको निःश्रेयससाधको वा निरूपितः परमतत्त्वदर्शिभिः शास्त्रकृद्भिरिति शेषः। काव्यसाहित्यं तु शब्दार्थसहभावसंवलितं सदेकान्तं कैवल्येनातिशयमात्यन्तिकमनिवार्यतया च सौन्दर्यज्ञानसाधकं सुन्दरत्वगुणबोधसाधनभूतं सौन्दर्यतत्त्वनिरूपणात्प्रतिष्ठापितं काव्यसाहित्यमर्मवेदिभिः सुधीभिरिति।

अन्यच्चेत्थं समास्थेयं समग्रं सुन्दरं श्रुतम्।
काव्यसाहित्यमेवैतत्सौन्दर्यात्मकसृष्टिकृत्॥ १२।

अन्यदिति। अन्यत्तदतिरिक्तं समाधानं तत्त्वप्रमाणकं शास्त्रं सौन्दर्यज्ञानसाधकं काव्यसाहित्यमित्यतोऽन्यदुत्तरमेतादृशं समास्थेयं सम्यगाकलनीयं सम्यक्त्वेन मनस्यास्थाप्य समाधानान्तरप्रकारसूचकम्। यतश्च समग्रं सकलं श्रुतं श्रुत्यादिशास्त्रं सुन्दरं सौन्दर्यगुणान्वितम्, समुचितस्वनिहिततत्त्वार्थसार्थप्रकाशनक्षमत्वादिति भावः। परं ह्येतत्प्रकरणप्रतिपाद्यं वर्ण्यविषयत्वेन निर्दिश्यमानमिदं काव्यसाहित्यमेव केवलं कविकर्तृकशब्दार्थसहभावगुम्फितमनुत्तरं लोकोत्तरं सदेकं सौन्दर्यात्मकसृष्टिकृत् सौन्दर्यगुणवदद्भुतमनोहारि सर्गविधानकारि परिकल्पितं पर्यवस्थापितं वा पार्यन्तिकसौन्दर्यशास्त्रमर्मज्ञैरभिज्ञैरिति समाधेराशयः।

साहित्यं सर्वगं लोके शास्त्रे शब्दार्थवत्तया।
व्यञ्जकत्वाश्रयेणैतत्काव्यसाहित्यमुच्यते॥ १३।

साहित्यमिति। साहित्यं किल काव्यसाहित्यस्वरूपपर्यवसितं कथमित्युते— शब्दार्थसहभावभावितं साहित्यं खलु सर्वं गच्छतीति सर्वगं सर्वसहृदयसामान्यं सार्वजनीनमाबालयुवस्थविरमाह्लादयितुमलं भवतीति शेषः। तच्च तस्य सर्वगत्वं शब्दार्थवत्तया शब्दनाच्छब्दोऽर्थ्यमानतया चार्थस्तयोः सम्बन्धेन क्वचिच्छब्दप्राधान्येन, क्वचिदर्थप्राधान्येन क्वचिच्चोभयसामान्येन लोक्यमाने लोके जगति शास्यमाने शास्त्रे श्रुत्यादौ चोभयत्र संगच्छते। तदेतदेतादृशमुपर्युक्तप्रकारकं साहित्यं व्यञ्जनाव्यापारसंयोगनिबन्धनेन वा काव्य-साहित्यं काव्य-प्रधानं साहित्यं काव्यमयं तद्रूपं तदात्मकं वा साहित्यमुच्यतेऽभिधीयते लक्षणलक्ष्यीक्रियत इति।

वस्तुतो दृष्टिभेदेन सुन्दरासुन्दरत्ववत्।
विश्वं विभजते भूयो नामरूपक्रियात्मकम्॥ १४।

वस्त्विति। वस्तुतस्तत्त्वतो यथार्थतो वस्तुदृष्टया च दृष्टिभेदेन दर्शनक्रमभेदावबोधेन तत्तद्दिगुन्मेषविशेषनिमेषेण स्थूलदृशोपात्तभिदोद्बोधनेन वा सुन्दरत्वं सौन्दर्यगुणत्वमसुन्दरत्वं तदितरच्च तद्वत्, तत्सम्बन्धानुबन्धीत्यर्थः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तादृशदर्शनभेदोद्भूतसौन्दर्यासौन्दर्ययोगानुयोगेनैतद् विश्वं विष्वग्भूतं विश्वग्-व्याप्तं वा जगन्नामरूपक्रियात्मकं नामाभिधानं संज्ञात्मकं रूपं दृश्यमानं व्यक्त्यात्मकं क्रिया क्रियमाणं व्यापारात्मकं तत्त्रिधाविभक्तं सद्भूयो भूयसाऽ-संख्यभावेन विभजते, विभक्तिमापाद्यते, शतधा सहस्रधा वा विभागमुपगच्छतीति भावः। भूय इत्युभयथा योज्यम्।

तच्च शब्दमयं सर्वं नानार्थपरिकल्पितम्।
साहित्यं व्यक्तिमापन्नं सदेकान्तेन सुन्दरम्॥ १५।

तदिति। तदिति प्रक्रान्तं नामरूपक्रियात्मकं विश्वम्। सर्वं समस्तं शब्दमयं शब्दरूपं स्फोटात्मकं शब्दात्मकाभिव्यक्तिस्वरूपत्वात्। अपि च नानार्थ-परिकल्पितं नानाऽनेकविधैरर्थैर्वस्तुभिर्घटादिभिः कान्तादिभिर्वा परिकल्पितं परितः कल्पनोद्गतं परितः सर्वतोभावेन स्मृतं स्मृतिविषयीकृतं बुद्धित्वावच्छिन्न-तया प्रकाशीकृत्यावबुद्धं वा। साहित्यं शब्दार्थसहितं तदुभयपरिकल्पितं च व्यक्तिमभिव्यक्तिं वर्णनोपस्कृत्या प्रकाशपदवीमित्यर्थः। आपन्नमधिगतमभिव्य-ञ्जनयोपात्तं सत् सत्यं सम्यक् साधु संस्कारसन्निविष्टं चैकान्तेनात्यन्तिकतया निरवद्येन निरतिशयाह्लादसंवादसम्पादकत्वेनेत्याशयः। तदेतादृशं रामणीयक-सन्दर्भगर्भं साहित्यं सुन्दरं सौन्दर्यवद्गुणगरिमगरिष्ठं भवतीति शेषः।

वस्तुनि क्वचिदप्येतत्सौन्दर्यं सत्तिरोभवत्।
येनाविष्क्रियते तच्च साहित्यं कविकर्मजम्॥ १६।

वस्तुनीति। क्वचिदपि कस्मिश्चिदपि लौकिकेऽलौकिके वा पदार्थे, एत-न्निर्दिश्यमानमुपर्युक्तं च सौन्दर्यं सुन्दरत्वगुणः सद्विद्यमानमपि निगूढं सूक्ष्मं वा वर्तमानं तिरोभवत्प्रत्यक्षतोऽदृश्यमानं नाक्षिलक्ष्यीक्रियमाणं चेदनाविष्कृतं तिष्ठति, तदा च येन कमनीयकारणेन रम्यमाध्यमेन वाऽविक्रियते अभिव्यक्तिं नीयते, वर्णनविषयीकरणविधिना व्यक्तीक्रियते, तच्च तादृशं रमणीयवर्णनव्यापार-वैशिष्ट्यविशेषितं कविकर्मजं कवेः काव्यकर्तुः कर्मक्रियात्मकं काव्यमेव तस्माज्जातं कविक्रियात्मककाव्यसम्भूतं साहित्यं शब्दार्थसहभावसमूहितं काव्यस्वरूपाभिन्नं तादात्म्योपेतं कान्तासम्मितं तद्धि साहित्यं सौन्दर्यतत्त्वाविष्कारकं मन्तव्यमिति भावः।

परिणामतया सर्वं सुन्दरं काव्यसङ्गतम्।
तदसङ्गतिकं दृष्ट्या दृश्यमानमसुन्दरम्॥ १७।

परिणामेति। परिणामतया फलनिष्पत्त्या रसास्वादफलावाप्तिसम्पत्त्येति भावः। काव्यसङ्गतं कविकर्मसाङ्गत्यमवाप्तं काव्यसन्दर्भसंयुक्तं काव्यवर्णना-विषयीकृतमित्यर्थः। सर्वं सुन्दरमसुन्दरं वा लौकिकमलौकिकं वा चेतनमचेतनं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वा यत्किमपि वस्तुजातं सुन्दरं सौन्दर्यगुणधर्मसन्निवेशविशेषपेशलं भवतीति शेषः। तद्वैपरीत्येन च तदसङ्गतिकं तेन काव्येन नास्ति सङ्गतिः संयोगः साक्षात्सम्बन्ध इति तदसंयोगजम्, किञ्च दृष्ट्या स्थूलदर्शनेन चर्मचक्षुषा च दृश्यमानं निर्वर्ण्यमानं स्थूलदृष्टिसृष्टिविषयीकृत्यावलोक्यमानं सर्वमित्युभयथा योज्यम्। समग्रं सांसारिकं वस्तुजातमसुन्दरं सौन्दर्यगुणहीनं भवतीति शेषः। यद् यत्काव्यसङ्गतं तत्तत्सुन्दरम्, यन्न तथा, तदसुन्दरमिति भावः।

अनादिनिधनः साक्षात्परमात्मा कवीश्वरः।
विश्वरूपमिदं काव्यं प्रणीतं चिरसुन्दरम्॥ १८।

अनादीति। नादौ निधनं विनाशो यस्य सः अनादिनिधनः शाश्वतनित्यसत्यात्मकः, सर्वशक्तिमदनन्तब्रह्माण्डनियामकः, साक्षादव्यवहितस्वरूपेण परोक्षापरोक्षोभयविधप्रविधानमूलहेतुकत्वेनेत्यर्थः। परमात्मा परात्परतरो विभुः परमश्चासावात्मा सर्वात्मस्वरूपो जगन्नियन्ता कवीश्वरः कवीनामीश्वर ईशिता कविश्चासावीश्वरः कवीन्द्रः कविस्रष्टेत्युच्यते। "कविर्मनीषी परिभूः स्वयम्भूः" इति श्रुत्युक्तेः। इदं च पुरो दृश्यमानं नामरूपक्रियात्मकं विश्वरूपं जगदात्मकं काव्यं परमात्मकविकर्मसमुद्भूतं प्रणीतं प्रकर्षेणोन्नीतं प्रणयनपाटववैशिष्ट्येन संसृष्टं परमात्मना सता चिरसुन्दरं नित्यमनोरमं सौन्दर्यगुणोत्कृष्टः प्रतिभातीति शेषः।

तत्र साहित्यसद्भावप्रकाशनपरायणाः।
सौन्दर्यं संविचिन्वन्तः कवयन्तश्च केऽपि ते॥ १९।

तत्रेति। तत्र परमात्मप्रणीते चिरसुन्दरे विश्वरूपेऽस्मिन् काव्ये साहित्यस्य शब्दार्थसहभावसमुदितस्य काव्यात्मकस्येत्यर्थः। ये सद्भावाः सम्यग्गुम्फिता सत्त्वेन निरूपिता वा विभावादयो भावरूपाः काव्यविषयीकृतास्तेषां प्रकाशनं काव्याभिव्यक्तीकरणं वर्णनप्रकर्षेण प्रत्यक्षत्वापादनं वा परमुत्कृष्टमेकमात्रमयनं स्थानं कर्माराधनं येषां ते, अथवा साहित्येन सद्भावस्य स्नेहसौख्यसौहार्दसौमनस्य सामञ्जस्यादिसुष्ठुसृष्टेः प्रकाशनं प्रसारणेऽभिव्यञ्जने वा परायणाः सततसंलग्ना ये तादृशाः केऽपि लोकोत्तरा वागविषया विचक्षणास्ते विश्रुता वाल्मीकिव्यासभासकालिदासादयः कवयः कवयितारः काव्यकरणकुशलाः सौन्दर्यं वस्तुगतं सुन्दरत्वगुणं विश्वकाव्यानुगतं लौकिकमलौकिकं वा संविचिन्वन्तः सम्यक् परिशीलयन्तोऽनुसन्दधानाः कवयन्तः काव्यं कुर्वन्तः काव्यकर्ममर्मप्रकाशयन्तः सन्तीति शेषः।

सौन्दर्यं भावनारूपं सा चेयं भाव्यते हृदा।
तेन तन्निष्ठता तस्य रूपादौ तूपचर्यते॥ २०।

सौन्दर्यमिति। सौन्दर्यं सुन्दरत्वगुणश्च भावनारूपं भाव्यते भावतोऽनु-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भूयतेऽनयेति भावना वासना संस्कारविशेषः, तादृशं भावनात्मकं वासनारूप-संस्कारनिष्ठं सौन्दर्यमित्युक्तम्। सा चेयं सौन्दर्योद्भावनपरा भावना हृदा चेतसा चैतन्यप्रकाशितेन मनसा भाव्यते भावविषयीक्रियतेऽनुभूयते चित्तेन साक्षात्क्रियते वा। तेन हृदा भाव्यमानेन हेतुना तस्य सौन्दर्यस्य तन्निष्ठता भावनाविषयता हृद्गतवासनानिविष्टतेत्यर्थः। तदेतादृशं भावनागतं सौन्दर्यं रूपादौ रूपरसगन्ध-स्पर्शादिविषयेषु स्थूलाकारेषु त्वित्यवास्तवार्थे। उपचर्यते उपचारत आरोपित-व्यवहारतो व्यवसीयते। उपचरितक्रियया व्यवह्रियते, न तु वस्तुतोऽध्यवसीयते। रूपस्य रूपत्वं रसस्य माधुर्यं गन्धस्याघ्राणं स्पर्शस्य स्पर्शनं सुन्दरमित्यारोपित-व्यवहारो न तु वास्तविक इति भावः।

भावना वासनाऽऽख्याता सा च संस्कारसंस्कृता।
हृन्मनश्चात्मसंयोगात्तदधिष्ठानमिष्यते ॥ २१।

भावनेति। भावना भाव्यमानस्वरूपा व्यापारविशेषः क्रियात्मिकेत्यर्थः। सा च भावना, संस्कारेण सम्यक्करणव्यापारेण सम्यगाधानानुसन्धानादिकर्म-सहकृतपरिष्कारेणेत्यर्थः। संस्कृता संस्कारमापादिता सम्यक्परिष्कृता च वासना वसनानुकूलक्रियात्मिका बीजरूपेण प्राक्तनेदानीन्तनजननोपात्ता भावानु-गताभिव्यक्तिग्राह्यरूपाऽऽख्याता समन्तात्ख्यातिमागता प्रसिद्धिमिता तत्तच्छास्त्रेषु शास्त्रकृद्भिरिति शेषः। हृदिति मनो मननात्मकमित्युच्यते। चेति तदुभयानुकर्ष-कम्। तदेव हृद्रूपं मन आत्मसंयोगादात्मनश्चिदात्मकस्य चैतन्यप्रकाशरूपस्य विभोः सम्बन्धात् तदधिष्ठानं तस्या वासनापरपर्याया भावनाया अधिकृतावास-भूमिरिष्यते स्वीक्रियते तत्त्वज्ञैरिति शेषः।

ततो यन्मनुते सम्यङ्‌ मनसा संस्कृतेन तत्।
सुन्दरं भाति लोकेऽस्मिन् तत्परं स्यादतादृशम् ॥ २२।

तत इति। यतश्च भाव्यमानरूपा भावनाया आत्मसंयोगान्मनोऽधिष्ठानं ततो हेतोर्यद्वस्तु किमपि लौकिकं लोकोत्तरं वा संस्कृतेन संस्कारसंवलितेन सम्यक्परिष्कृतेन मनसा हृदा मननधर्मिणा सता सम्यक् सुष्ठु साधु समीचीनं वा मनुते मननानुकूलतया स्वीकुरुते मननादङ्गीकुरुते वा, तद् वस्तु मनोमननसङ्गीकृतं लोकेऽस्मिन् जगत्यामस्यां सुन्दरं रमणीयं सौन्दर्यगुणोत्कृष्टं भाति मानविषयी-भवति प्रतीतिपथमवतरतीत्यर्थः। अर्थाद् यत्र मनो रमते, तद् रमणीयमिति भावः। तत्परं तस्मान्मनोमननानुकूलव्यापारात्परमन्यदतादृशं तादृशसुन्दरत्वगुणहीनम-सुन्दरं वा स्याद् भवेत्। यन्मनोऽतिरिक्तं तदसुन्दरमित्याशयः।

काव्यसाहित्यसंस्काराच्चेतसैतत्सचेतसः ।
सर्वं सौन्दर्यसम्पृक्तं मन्वते सचराचरम् ॥ २३।

काव्येति। काव्यं कविकर्म तच्च कविकर्मानुकूला कृतिः, तत्कृतं तद्रूपं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तत्सम्बन्धि वा साहित्यं शब्दार्थसमप्राधान्यनिरूपितं तस्यैतादृशस्य काव्योन्मीलितमनीयशब्दार्थसमुदयसन्दर्भस्य संस्कारात्सम्यक्परिष्काराज्जन्मान्तरेदानीन्तनवासनोन्मेषाद्धेतोः सचेतसः समानं साधारणीकृतं संवादसहकृतं चेतो येषां ते तथाभूताः सहृदयाः काव्यसाहित्यतत्त्वविदः, चेतसा चेतनधर्मवता चिदुन्मुखेन मनसा, एतत् पुरोदृश्यमानं मनोबुद्धिचक्षुर्योगेन साक्षात्क्रियमाणमित्यर्थः। सर्वं लौकिकमलौकिकं वस्तुजातमयं सचराचरं चेतनाचेतनात्मकं चरेण गतिमताऽचरेणागतिकेन सहितं जडचेतनमयमित्यर्थः। तदेतादृशं जगत् सौन्दर्यसम्पृक्तं सुन्दरत्वगुणान्वितं मन्वते स्वीकुर्वते पश्यन्ति स्वानुभवगोचरीकुर्वन्ति।

साहित्यं किञ्च सौन्दर्यं द्वयमन्योन्यपूरकम्।
एकमन्यद् विना नैव प्रतिष्ठां लभतेतराम्॥ २४।

साहित्यमिति। साहित्यं सौष्ठवेन समुचितशब्दार्थसहभावभावितं काव्यात्मकं सत् किञ्चेत्युभयानुक्रमबोधनार्थम्। सौन्दर्यं सुन्दरैकदेशित्वात्सुन्दरत्वगुणः, द्वयमुभयं साहित्यं सौन्दर्यञ्चेति, अन्योन्यपूरकमन्यदन्यदित्यन्योन्यं पूरयति पूर्णं करोतीति पूरकं परस्परोपकारकत्वेन सहायकमुन्नायकमिति यावत्। एकमिति साहित्यं सौन्दर्यं वा, अन्यस्मात्पृथग्भूतसहायमनुपकृतं वा, अन्यद्विना साहित्यं सौन्दर्यमन्तरा, सौन्दर्यं च साहित्यमन्तरा, प्रतिष्ठां प्रकृष्टस्थितिमुच्चतमसम्मानभूमिं नैव लभतेतरां ध्रुवमेव न प्राप्नोति, अर्थात् साहित्योपस्कृतं सौन्दर्यं सौन्दर्यानुप्राणितं साहित्यं च लोकेऽस्मिन् प्रतिष्ठामाप्नोतीति भावः।

साहित्यपूर्वकत्वाच्च सौन्दर्यं स्थितिमश्नुते।
द्वयोस्तत्परमं लक्ष्यं तत्त्वमेकं रसात्मकम्॥ २५।

साहित्येति। साहित्यं शब्दार्थमयं पूर्वं प्रथमोपात्तं यस्य तत्साहित्यपूर्वकं तस्य भावस्तस्मात् प्रथमोपात्तसाहित्यसंयोगादिति भावः। सौन्दर्यं सुन्दरत्वगुणः स्थितिमस्तित्वं प्रतिष्ठां वाऽश्नुतेऽवाप्नोत्यधिगच्छति वा। यद्यपि साहित्यं सौन्दर्यं चेत्युभयमन्योन्यपूरकं परं सौन्दर्याधारभूतत्वात्साहित्यस्य पूर्वोपादानमिति भावः। द्वयोः साहित्यसौन्दर्ययोः परस्परोपकार्योपकारकभावेन संयुक्तयोराधाराधेयभावेन मिलितयोर्वा, तत्सुप्रसिद्धं परममुत्कृष्टं परमार्थस्वरूपं चैकमद्वितीयमेकत्वावच्छिन्नं रसात्मकं रस एवात्मा स्वरूपं यस्य तद् रस्यमानस्वरूपम्। "रसो वै सः[१]" इति श्रुत्युक्तेः। तत्त्वं तत्पदवाच्यं तद्भावरूपमाध्यात्मिकं निगूढं रहस्यं लक्ष्यं लक्षणीयं चरमस्थानमस्तीति भावः।

१. तै० उ० २।७।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पूर्वाकाराधिकतररुचा सङ्गतः कान्तयाऽसौ

डॉ० गिरधारीलालचतुर्वेदी

रिसर्च एसोसियेट; संस्कृतविभागे

लखनऊ-विश्वविद्यालयस्य

* * *

भगवत्याः सुरसरस्वत्या विलासभूतेन श्रीकालिदासेन स्वकीये रघुवंशाख्ये महाकाव्येऽष्टमसर्गे इन्दुमत्या अतर्किते निधने तत्पतेः महाराजाजस्य विलापस्य भावप्रवणं चित्रणं व्यधायीति विदन्त्येव विपश्चितः। अस्य सर्गस्यान्तिमश्लोकस्यान्तिमः पाद एव लेखेऽस्मिन् विवेच्यविषयीकृतः। लोकापवादभीत्या महाराजेनाजेन दिवङ्गता स्वदयितेन्दुमती सद्य एव नानुगता, किन्तु सौधभित्तिविदारकाश्वात्थाङ्कुरो यथा, स्वशरीरविदारकः शोकशङ्कुस्तदीयहृदयान्तराले पल्लवन्नेवासीत्, यश्च प्रियानुगमनसाधकतया स्वीयोपकारकमेवामन्यत शोकाभिभूतो महाराजः—

तस्य प्रसह्य हृदयं किल शोकशङ्कुः प्लक्षप्ररोह इव सौधतलं बिभेद।
प्राणान्तहेतुमपि तं भिषजामसाध्यं लाभं प्रियानुगमने त्वरया स मेने॥
(रघु०, ८।९३)

स च धराधिपः प्राणत्यागोद्यतः कामनयानयान्नजलमपि परित्यज्यान्ते च भागीरथी-सरयूसङ्गमे कलेवरबन्धनं विमुच्य लेखलेखतामाप, यत्र च पूर्वाधिकतरकान्तया कान्तया सार्धममरमनोमिलिन्दवृन्दनन्दने नन्दने लीलागारेषु निःशङ्कः ससुखमरमत। उक्तञ्च—

तीर्थे तोयव्यतिकरभवे जह्नुकन्यासरय्वो-
र्देहत्यागादमरगणना लेख्यमासाद्य सद्यः।
पूर्वाकाराधिकतररुचा गङ्गतः कान्तयाऽसौ
लीलागारेष्वरमत पुनर्नन्दनाभ्यन्तरेषु॥ (रघु० ८।९५)

स्थलेऽस्मिन् पाठको विस्मयाविष्टो भवत्येव, यतो हि यस्याः प्राणवल्लभाया विरहे महाराजेन स्वेच्छयैव मृत्युर्वृतः, जह्नुकन्या-सरय्वोः पवित्रे सङ्गमे विहाय तनुलतां तस्य स्वर्गस्यार्थे स्वीयः पन्थाः शस्तः; यस्मिंस्त्रिदशालयेऽस्य सैव प्रेयसी देवाङ्गनारूपेणाप्सरोरूपेण वा पूर्वमेवासीदुपस्थिता, तत्रत्ये तन्मिलनेऽस्य काऽप्युत्सुकताऽत्र प्रतीयत एव न। अस्मादप्यधिका विस्मयावहेयं वार्ताऽस्ति यदुत्कण्ठितपुनर्मिलनविषयिणी या कवेः प्रतिभास्फुरणार्थं समधिकमुपयुक्ता भूमिः, सैव

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कालिदासेन नितरां तिरस्कृता। काव्येऽत्र केवलमिदमेन प्रतीतिपथमुपयाति यद् देवत्वमनुप्राप्य महाराजोऽजस्त्रिदिवालये विलासभवनेषु पूर्वाकाराधिकतररमणीयया रमण्या सार्धं रमणतत्परोऽभूदिति। किन्तु रमणीयेयं 'केति' महाकविना विचार्यैव सुगुप्तत्वेन स्थापितम्। 'पूर्वाकाराधिकतररुचा सङ्गतः कान्तयाऽसौ' इत्यनेन नेदं सुस्पष्टं प्रतिभासते, यदसौ कान्ता रूपान्तरितेन्दुमत्येवासीदथवा काचित्तदितरा देवाङ्गनेति ?

वस्तुतः पदस्यास्य विग्रहो द्विधा सम्भाव्यते—(१) पूर्वं आकारो यस्याः सा पूर्वाकारा (इन्द्रमती), तस्या अधिकतररुग्यस्याः सा काचिदन्या रमणी, तया सङ्गतः। इन्दुमत्येतरायाः सङ्गतः इत्याशयः, (२) पूर्वस्मादा- कारादधिकतरा रुग्यस्याः, तया रमण्या इन्दुमत्या सङ्गतः। द्वितीयोऽर्थोऽसौ श्रीमल्लिनाथेन प्रदर्शितः। सा तु इन्दुमत्येतरा काचिदन्या देवाङ्गना इति प्रथमो विकल्पोऽस्मिन् निबन्धे समर्थितः। निष्कर्षस्यास्य समर्थने निम्नलिखितं विश्लेषणं प्रासङ्गिकत्वं नात्येति।

१. विवेच्यस्थले महाकविना 'कान्ता'शब्दस्य प्रयोगः सोद्देश्यमेवाकारि। यदभिलाषश्चेत् तेषां तर्हि ते शब्दस्यास्य स्थाने भार्या, इन्दुमती, हरिणी (मानुषावतरणात् प्राक्तनी आप्सरिकी संज्ञा) इत्यन्यतमं शब्दं प्रयोक्तुं समर्था एवासन्, येन च वैकल्पिकी समाख्या अनवकाशा भवेत्। किन्त्विन्दुमत्याः पुनर्मिलने पर्यवसितोऽर्थः स्वयमेव महाकवीनां कृते नाभीष्टः।

२. यत्रेन्दुमतीस्वयंवरमधिकृत्यैकः सर्ग एव पूर्णतया निर्मितस्तथा चाजविलापमधिकृत्याधिकांशरूपेणैकसर्गो विरचितस्तत्र च तस्या एवेन्दुमत्यास्तस्यैव च महाराजस्य दिव्यपुनर्मिलनमधिकृत्य नैकोऽपि श्लोकः सृष्टः। सर्वथा चैष रोचकः प्रभावोत्पादकश्च विषयः समुपेक्षितः। अतो निर्णीयते मन्मौनमिदं महाकवेः सुविचारितमेवास्ति। अत्र च किञ्चिदीदृग् घटितं यदवाच्यमेव याति मतौ कविकुलगुरोः। मौनमङ्गीकृत्य कविगुरुणा दिव्यभोगानां संसारस्य चातर्किताप्रत्याशिता च गतिरेव सङ्केतिता। प्राणवल्लभाया इन्दुमत्याः पुष्पस्पर्शमात्रेण जातो मृत्युर्मुनिवशिष्ठसन्देशेन नातर्कितो जायते; किन्तु महाराजस्याजस्य दिव्यभोगानां संसारोऽन्तपर्यन्तमेव प्रहेलिकारूपेणैव प्रतीयते। स्वर्गीयभोगानां समुत्कर्षस्य चरमसीमैव भोगेभ्यः समर्पितस्य जीवनस्य चरमा क्षुद्रता तथातर्कितपरिणतिरेव तत्रास्याजस्यावाच्येनाचरणेन ध्वन्यते।

३. यदि च 'कान्ता'-शब्देन निर्दिष्टा दिव्याङ्गनेन्दुमत्येव विद्यते, तर्हि कान्ताशब्देन सह पूर्वाकाराधिकतररुचा इति विशेषणस्य वैयर्थ्यं सिद्धमेव। स्वर्गे भोगानां प्रकर्षस्य वार्ता तु बुद्धिगम्या; परन्तु व्यक्तीनां रूपस्य प्रकर्षो नात्र

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

समुल्लेख्यो भवितुमर्हति। अजसदृशस्य समर्पितभावुकप्रेमिणः कृते दीर्घावधिक-विरहानन्तरं सर्वाधिकमभीप्सितं वस्तु त्विन्दुमत्या सार्धं पुनर्मिलनमेव भवितुं शक्यते। तद्रूपस्य प्रकर्षस्तथा च प्रकर्षोल्लेखोऽपि पूर्वप्रणयस्य पृष्ठभूमौ न केवलमप्रासङ्गिकम्; अपि तु सुरुचिप्रतिकूलमेव प्रतिभाति। अत इन्दुमत्या अपेक्षया-धिकसुन्दरी दिव्याङ्गनैवात्र कान्तापदेन निर्दिश्यते।

अयमेवाशयः किञ्चिद्भिन्नरूपेण बुद्धिगम्यो भवितुमर्हः। क्रमानुसारेण पुनर्मिलनोत्कण्ठाया उपशमनस्य पश्चादेष रूपप्रकर्षो (अपकर्षो वा) ध्यान-विषयतामेति। जीवनस्य सूक्ष्मतमानां भावच्छायानामुद्घाटने सुनिपुणया कालिदासीयकाव्यप्रतिभयाऽस्मिन् सम्बन्धे मनागपि भ्रेषोः नैव कर्तुं पार्यते। अतो मतस्यास्यानुसरणमेव युक्तियुक्तं प्रतीयते यत् प्रस्तुतस्थले पुनर्मिलनं नैवापि त्वेकाभिनवदिव्यमिलनमेव सङ्केतीकृत्य निवृत्तिरेव कवेरभीष्टेति।

इन्दुमत्यारूपप्रकर्षः स्वर्गेऽजस्य प्रणयं स्थिरीकर्तुं प्रगाढीकर्तुं वा समावश्यक इति व्याह्नियेत चेत् तदपि मतेनानेन तत्प्रेम्णः सापेक्षं विलासप्रवणञ्च रूपमेव परिपुष्यते। एतादृक् च प्रेम पूर्वस्मादधिकसुन्दरस्य भोग्यविषयस्य सम्मुखीभावे स्वीयासक्तिविषयं परिवर्तयत्येव। विलासितायाश्चरमोत्कर्षस्य चरमपतनस्य च निदर्शनरूपाया अस्याः सम्भावनाया पल्लवीभावाय स्वर्गादधिका कोपयुक्ता स्थली भवितुं शक्नोति।

अजेन्दुमतीपरिणयश्चैका सावधिका शापसमुद्भूता विडम्बनैव वर्तते। शापनिवृत्तेरनन्तरं च तन्मिलनस्य पुनरावृत्त्यर्थमवकाश एव नास्ति। त्रिकाल-दर्शिना मुनिना वशिष्ठेन दिवङ्गताया इन्दुमत्याः कृते शोकसन्तप्ताय महाराजा-जाय प्रहिते स्वसन्देशे सुस्पष्टमेवैतत् सङ्केतितं यन्नासौ देहत्यागानन्तरमपीन्दु-मतीमधिगन्तुं समर्थः। सृष्टेः परमार्थो मानवीयसंवेदनां प्रति पूर्णतया तटस्थ एव। न पुनरावृत्तिर्जायते सृष्टौ—

रुदता कुत एव सा पुनर्भवता नानुमृतापि लभ्यते।
परलोकजुषां स्वकर्मभिर्गतया भिन्नपथा हि देहिनाम्॥

(रघु० ८।८५)

मुनिर्वशिष्ठोऽजस्य भोगनिबद्धायै, अपुरुषोचितभावुकतायै च तं पथश्च्युतं निगद्य भर्त्सयत्येव। स च वशी न तस्य विलापं महनीयं मनुते, न वा तं प्रकृतिस्थं विधातुं विधीयमानं प्रयासमेवेदम्प्रथमतया स्वीकुरुते। त्रिकालदर्शी महर्षि-र्विजानात्येव यदजाय प्रबोधनं निरर्थकमेव। अत एव विज्ञस्य शिष्यस्य मुखेन संदिश्यैव स शिष्टाचारस्य निर्वाहमेव विधाय विरमति। एतदर्थमुपयुक्तनिर्वाह-स्यानुसन्धानं महाकवेः कथानकशैल्या अङ्गतामेवैति—

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

असमाप्तविधिर्यतो मुनिस्तव विद्वानपि तापकारणम् ।
न भवन्तमुपस्थितः स्वयं प्रकृतौ स्थापयितुं पथश्च्युतम् ।। इति ।
(रघु० ८।७६)

कालिदासः स्वयमेव नाजविलापं सुरुचिपूर्णं मनुते, केवलञ्च कथानकस्यैव निर्वाहं कुरुते । वार्तेयं कविना तद्दशावर्णने स्वीकृतशब्दावल्या सुस्पष्टमेव प्रतिभाति । यथा—

विलपन्निति कोशलाधिपः करुणार्थग्रथितं प्रियां प्रति ।
अकरोत् पृथिवीरुहानपि स्नुतशाखारसवाष्पदूषितान् ।। इति ।
(रघु० ८।७०)

अत्र 'कोशलाधिपो वाष्पदूषितान् अकरोत्' इति कर्तृवाच्ये स्वयमेवातितीक्ष्णमेतत्कथनम्, अनायासेनैव कालिदासस्यान्तरिकीमरुचिमभिव्यनक्ति । रघुवंशमहाकाव्यमायुषाऽनुभवेन च परिपक्वस्य तस्य कवेर्वर्तते रचना योऽमर्यादितादतिसंवेदनशीलाद् भावोन्मादप्रवणजीवनादर्शाद्विरक्त एव संजातः ।

मेघदूतखण्डकाव्यं तु कालिदासस्य प्रारम्भिकी रचनाऽस्ति, यस्मिश्च तरुणभावुकताया उन्मुक्ताभिव्यक्तिर्दृश्यते । कुमारसम्भवे च भोगाधिष्ठितादनियन्त्रिताद् भावोन्मादादसन्तुष्टो महाकविः प्रणयनिबद्धभावुकतां सृष्टेर्दिव्यव्यवस्थया संयुज्य, व्यापकायामे तत्सार्थकतानुसन्धानस्य प्रयासं प्रकरोति । शाकुन्तले च कवेरियमसन्तुष्टिरेतदपेक्षयाधिका मुखरा सञ्जाता, यत्रापरिपक्वभावुकताक्षणेषु विहितेनाविचारितनिर्णयेन शकुन्तलाया अवमाननाया त्रासस्य च चित्रणं व्यधायि महाकविनामुना ।

मेघदूतरचयिता कालिदासो रघुवंशरचनाकाले न केवलं भावनात्मकदृष्ट्याऽपि तु चिन्तनदृष्ट्यापि समधिकपरिपक्वतामुपगतः । स्वीयसमृद्धानुभवराशिरूपाधारेण स एकस्य सन्तुलितसमग्रजीवनदर्शनस्य विकासं कृतवान्, यस्मिन् कस्याप्यतिरेकस्यासन्तुलनस्य वा नास्ति मनागप्यवकाशलेशोऽपि । इदमेव च तत्कारणं येनासावजविलापेन सह भावनात्मकं तादात्म्यं स्थापयितुं न शक्नुयात् । एतावदेव न, अजस्य भावप्रवणविलापः कुलगुरुवशिष्ठमपि प्रभावयितुं नाशकत् । तस्य शोकसन्तप्ता यन्त्रणा, आत्मोत्सर्गश्च नियतेर्व्यवस्थायां कमप्युदारं व्यतिरेकमुत्पादयितुं न शशाक । स स्वयमपि स्वीयैकाङ्क्षिन्या भोगवादिन्या जीवनदृष्टेः पराभूतो दृश्यते, यत् स प्रारब्धप्रदत्तैर्दिव्यभोगैः सहैवेन्दुमत्यपेक्षयाधिकसुन्दर्या दिव्याङ्गनायाः साहचर्यं सहजरूपेणाङ्गीकरोति । अजस्यात्मघातिनो भावोन्मादस्य भोगैकान्तनिबद्धाया जीवनदृष्टेश्च नास्मादधिका कठोरा भर्त्सना भवितुमर्हति ।

अत्रायं निष्कर्षोऽपरिहार्यत्वेन प्रतिफलति यद् रुग्णभावुकतायै विलासितायै च समर्पितस्य जीवनस्य क्षुद्रतां प्रति रोमाञ्चकञ्चुकितजीवनादर्शनस्य विसंगतिं च प्रति सङ्केतप्रदानमेव महाकवेरभीष्टम् ।

●

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

व्यञ्जनाऽभिव्यञ्जनयोस्तुलनात्मकं समीक्षणम्

आचार्य्यश्रीरमाशङ्करमिश्रः, एम्० ए०

अध्यक्षः,

संस्कृतविभागे,

प्रतापगढ़स्थ-मुनीश्वरदत्त-स्नातकोत्तरमहाविद्यालये

❀ ❀ ❀

पूर्वालोकः—

व्यञ्जनावृत्तिमालम्ब्य रसाभिव्यक्तिर्जायते। सेयमभिव्यक्तिरेवाभिव्यञ्जनेति वक्तुं शक्यते। 'अभि+वि' पूर्वकाद् 'अञ्ज्' धातोर्भावे क्तिन्-प्रत्ययेन 'अभिव्यक्ति'व्युत्पत्तिः, तस्मादेव ण्यन्ताद् धातोर्भावे ल्युट्-प्रत्यये, 'अ'प्रत्यये टापि च 'अभिव्यञ्जना'शब्दस्य निष्पत्तिर्जायते। तथा च नास्ति कश्चनापि शब्दार्थकृतो भेदो व्यञ्जनाऽभिव्यञ्जनयोः; किन्तु सैद्धान्तिकदृष्टया 'व्यञ्जना' ध्वनिसिद्धान्तस्य प्राणभूता शब्दशक्तिः, 'अभिव्यञ्जना' च पाश्चात्त्यकाव्यशास्त्रिणः 'क्रोचे'-महोदयस्य 'एम्प्रेशन'शब्दस्यानुवादः, 'अभिव्यञ्जनावादश्च' 'एम्प्रेशनिज्म' शब्दस्यैवानुवादो बोद्धव्यः। यद्यपि भारतीयपुरातनकाव्यशास्त्रसमालोचकानां कृते व्यञ्जना-व्यक्त्यभिव्यक्त्यभिव्यञ्जनाशब्दाः केवलं स्वरूपतो भिन्नाः, नार्थतः; परन्त्ववर्वाचीनाः काव्यतत्त्वविदस्तु निर्विचिकित्समेव व्यञ्जनामभिव्यञ्जनां च तत्त्वतः पार्थक्यकोटिमधिरोप्यैव सिद्धान्तानालम्बन्ते।

आचार्यरामचन्द्रशुक्लमहोदयेन 'क्रोचे'-महोदयप्रतिपादितः सिद्धान्तो 'व्यक्ति-वैचित्र्यवाद'-नाम्ना व्याख्यातः[1], किन्तु 'वैचित्र्य'शब्दस्तु 'क्रोचे'महोदयस्य 'अन्तर्दर्शनसहजानुभूति' -तत्त्वाभ्यां प्रतिकूलायते, 'व्यक्ति'शब्दश्च व्यञ्जनया विगृह्य न स्वीयां स्वतन्त्रस्थितिं दृढीकर्तुमलम्। आचार्यशुक्लेन 'वैचित्र्येण' न काव्यगतोऽन्तश्चमत्कारोऽभ्युपेतः, अपि तु शुद्ध आलङ्कारिकचमत्कार एव। एवञ्च क्रोचे-महोदयस्य सिद्धान्तोऽभिव्यञ्जनेति नाम्ना स्वीकार्यः, व्यञ्जनावृत्त्या च तत् पार्थक्यमपि शब्दतोऽर्थतश्च ज्ञेयं भवति।

क्रोचे-सम्मताऽभिव्यञ्जना—

ध्वनि-सिद्धान्तानुसारेण रसिक एव रसास्वादनकेन्द्रीभूतः सन् काव्यान्तर्भावितानुभूतितत्त्वानां विचारहेतुर्भवति। क्रोचे-महोदयस्तु कविं कलाकारं वा केन्द्रीकृत्य काव्योत्पादकतत्त्वमनुसन्दधानो विलोक्यते। व्यञ्जनावादिनः पश्यन्ति यत् काव्ये केन केन कारणपुञ्जेन रसिका अमन्दानन्दलीना जायन्ते;

1. आचार्यरामचन्द्रशुक्लस्य चिन्तामणौ, पृ० १८३–१९४।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अभिव्यञ्जनावादिनश्च पश्यन्ति यत् काव्ये किं नाम तदाकर्षकं वस्तु यत् काव्य-रचनायै कवीन् निबध्नाति।

अभिव्यञ्जनाया आधारशिला तु सहजानुभूतिरेव, या कविहृदय-मधिश्रित्य वस्तुतत्त्वं बिम्बात्मकरूपतया परिणमयति। सहजानुभूतिश्च बिम्बं (Image), रूपञ्च (Form) विना न चकास्ति। यद्यपि द्वयोरपि कार्यकारण-भावः प्रतिपत्तृ-प्रतिपत्ति-विषयस्तथापि अन्वयव्यतिरेकव्याप्तिन्यायेन द्वयोरप्य-न्योन्याश्रितत्वं सुतरामभ्युपगमनीयमस्ति[१]। बिम्बमुदितं सद् रूपवद्भवति, तद्-रूपान्वयनमेव 'अभिव्यञ्जना' (Expression) एतदेव भावचक्रं सहजानुभूतिः'।

वस्तुतस्तु 'बिम्बरूपाभिव्यञ्जना-सहजानुभूति'–शब्दाः प्रतीतिक्रमाणां क्षण-भेदमनुसृत्य भिन्ना इव दृश्यन्ते। अत एव क्रोचे-महोदयेन तु 'सहजप्रज्ञाऽभिव्य-ञ्जनारूपसौन्दर्याणि' अभिन्नानि तुल्यशक्तिकानि चैव स्वीकृतानि[२]। एवञ्च सहज प्रज्ञयाऽभिन्नैवाभिव्यञ्जना कलाया अन्तरङ्गतत्त्वरूपा, या हि संलिष्ट-सौन्दर्य्यसम्पत्तिनिःस्पन्दनक्षमा। तामेवाभिव्यञ्जनां संश्लिष्टरूपेणैव कविवाग् अभिव्यनक्ति। तस्यां वाचि पदवर्णादिकृतं नानात्वं न क्रोचे-समभिमतमिति। केवलम् अभिव्यञ्जनायाः संश्लिष्टाया एव अनेकत्वविश्लेषणं कर्त्तुं शक्यते, न वाचाम्। अभिव्यञ्जनाया असंश्लिष्टत्वे तु कथङ्कारं विश्लिष्टा प्रतीति-रुत्पाद्येत ? अतश्च स्थूला शाब्दाभिव्यक्तिरपि संश्लिष्टैव[३]।

क्रोचे–महोदयः प्रत्यात्मं वस्तुनस्तामेव प्रतीतिं सहजानुभूतिं मनुते, या गुण-क्रिया-नाम-रूपादिपार्थक्यहीनाप्येकात्मिकैव वाभासते। 'शिव'-रूपे 'सुन्दर'–रूपे चाभिव्यज्यमाना सहजप्रज्ञैव 'सत्य'–रूपा। क्रोचे–महोदयस्तामेव सहजप्रज्ञां वस्तुगतामूरीकृत्य कविकृतां शब्दार्थमयीमभिव्यक्तिं तु वस्तुगताभिव्यक्तेश्छाया-मेव मन्यते। इदमपि शक्यं यत् सहजानुभूतिश्चेच्छब्दार्थमयीमभिव्यक्तिं नाध्यास्ते, तदापि आन्तरिक्या वास्तविक्या अभिव्यक्तेर्बलेन कोऽपि भावकः 'कवि'रिति वक्तुं शक्यते। एतादृश एव मानसाभिव्यक्तिशाली जनो राजशेखरमतेन 'हृदय-कवि'रिति व्याहृतः। सहजप्रज्ञा सहजानुभूतिर्वा राजशेखरेण 'कारयित्री प्रतिभा' सम्मता।

---

१. 'बिम्बोऽस्त्री मण्डलं त्रिषु' (अमरकोषे–१।३।१५), इति प्रामाण्येन बिम्बशब्दस्य क्वचन पुंस्त्वं क्वचन क्लीबत्वञ्च प्रयुक्तम्।

२. आचार्य नन्ददुलारे बाजपेयी, नया साहित्य, नये प्रश्न, पृ० ८२।

३. 'Speech is unity, not multiplicity of images and multiplicity does not explain, but indeed presupposes the expression to be explained'. (Benedetto croce, Aesthetic, P. 144)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अभिव्यञ्जनावादिनामिदं मतं यच्छब्दमयी बाह्याभिव्यक्तिस्तर्कलक्षणाया बुद्धेः प्रतिफलनमेव, यच्च सहजानुभूतेः स्थूलतमं रूपमेव। तथा च बाह्याभिव्यक्तिः कवेरान्तरिककाव्यरूपस्य आंशिकमेव प्रातिनिध्यमङ्गीकरोति। वस्तुतो बाह्याभिव्यक्तौ तु भाषायाः संश्लिष्टतां व्याकरणस्य तर्कस्य च विश्लेषण–शक्तिराच्छादयति; येन एकात्मिकाऽभिव्यक्तिरसम्भाव्येव वैकल्यमुपैति[1]।

अत एव केचन क्रोचे–समालोचनचणास्तं प्रौढिग्रस्तमतिवादिनश्च स्वीकुर्वते। क्रोचे-महोदयेन आन्तरिकी बाह्या चाभिव्यक्तिर्न तुल्यतुलामारोपिते, न वा तयोस्समाना वृत्तिः कृता। अयमेव दोषारोपः क्रोचे-कृते गुणतां परिणतः, यतो हि बाह्याभिव्यक्तिमेव महितीकृत्य तु स तस्मात् स्वसिद्धान्ताच्च्युतोऽभविष्यत्, येन सिद्धान्तेन वेद्यजगतस्सर्वाण्यपि वेदनीयतत्त्वानि प्रबोधयितुं तेन विततः प्रयत्नः। क्रोचे महोदयोऽभिधत्ते यदत्यन्तं विशदं व्यापकञ्च मनःप्राङ्गणं तत्रैव समग्रस्यापि मानवजीवनस्य जगतो वा समाहारः साधु क्रियते। मन एव जगतः प्रतिबिम्बनमादत्तेऽभिव्यनक्ति च यया कयाऽपि कलया। किञ्चेदं जगत्? मनोविवर्तभूतं हि तत्[2]।

अत एव चाणक्यनीतौ (३, १२) 'मन एव मनुष्णाणां कारणं बन्धमोक्षयोः' इति सिद्धान्तितम्।

न केवलं शब्दमात्रमेव काव्यम्, यतो हि शब्दनं तु शारीरिकचेष्टनमेवेति तस्य काव्यत्वमसङ्गतमिति[3]। अत एव च प्रत्येकं भाषा स्वभाषिणामेव कृते भावाभिव्यक्तिजननी भवति, अन्यभाषाभाषिणां कृतेऽन्यैव भाषा भावाभिव्यञ्जिकेति, नानुभववतां तिरोहितं किञ्चन[4]।

काव्यशास्त्रस्य प्राक्तनचिन्तनधारायां त्वन्तर्बाह्याभिव्यक्त्योस्समन्वयो द्रष्टुं शक्यते। तथा च कुन्तकस्यायमाशयो जृम्भणीयः—

(१) कवेश्चेतसि सर्वतः प्रथमं वस्तु वर्ण्यविषयो वा प्रतिभा-प्रतिभासमान-

---

१. The grammatical and langical articulations of intellectualised. Language are no more fundamental to language as such than the articulations of bone and lumb are fundamental to liking tissue. (R. G. Collingwood, The Principles of Art, P. 236.)

२. आचार्य नन्ददुलारे बाजपेयी : नया साहित्य, नये प्रश्न, पृष्ठ ९३।

३. Speech is after all only a system of gestures. (The priciples of Art, P. 243)

४. The English tongue will only express English..................to talk French you must adopt...............of a Frenchman,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मुदेति (इयमेव प्रतिभा पूर्वोक्ता 'सहज-प्रज्ञा', वस्तुभासनमेव पूर्वोक्तम् अन्तर्दर्शनं' बिम्बग्रहणं वा)।

(२) वस्तुनः प्रातिभप्रतीतिरबुद्धिग्राह्यत्वाद् अपरिष्कृतप्रस्तरखण्डोपममणि-तुल्या भवति (इदमेव क्रोचे-परवर्ती कोलिंगवुडमहोदयः 'क्रूडफीलिंग'शब्देन व्यनक्ति)।

(३) तदेव प्रातिभप्रतीतिवस्तुनिपुणकविजटिते वक्रवाक्ये शाणोल्लीढ-मणिवन्मनोमोहकं जायते (वक्रवाक्येन साऽभिव्यक्तिरभिप्रेता, या रसिकान् प्रातिभप्रतीतिगाम्भीर्य्यं प्रापयति)।

(४) प्रातिभप्रतीतिरेव बाह्याभिव्यक्तिमालिङ्गन्ती 'काव्य'संज्ञां व्रजति, मर्मज्ञाश्च तेनैव काव्येन रसं (आनन्दं) भजन्ते[१]।

इत्थं सूक्ष्मेक्षिकया वीक्षामहे यत् क्रोचे-कुन्तकौ प्रातिभं वस्तुप्रत्ययं प्रतीतः, किन्तु क्रोचे-महोदयेन ह्यान्तरिकीमभिव्यक्तिमुपजीव्य बाह्याभिव्यक्ति-र्न्यूनीक्रियते, कुन्तकस्तु रचनाप्रक्रियायां बाह्यां (व्यावहारिकीं शाब्दिकीञ्च) अभिव्यक्तिं समपेक्ष्य रसिकापेक्ष्यकाव्यतत्त्वस्य प्रेषणीयतानिर्वाहमनिवार्यतया स्वीकरोति। न च बाह्याभिव्यक्तिमन्तरेण प्रवर्तते कोऽपि काव्यव्यापारः, अत एव अभिनवा अभिव्यञ्जनावादिनो मतद्वयस्यापि समन्वयदिशि प्रतिष्ठमाना दरीदृश्यन्ते। ते हि शाब्दिकीमभिव्यक्तिमनुभूतिपरिधानीयां चोलिकां न मन्यन्ते; प्रत्युत प्रत्येकमनुभूत्यै भिन्नामेव शाब्दिकीमभिव्यक्तिं प्रतिष्ठापयन्ति, यया विनाऽ-मभिव्यक्तानुभूतिर्मानसधरातलस्य किमप्यपरिपक्वं वस्तुमात्रं परिष्करण-वर्जितम्। वस्तुतोऽनभिव्यक्तानुभूतेस्तत्त्वं तत्ता सत्ता वा सहृदयजनमनो-नमनीया[२]। आचार्यभर्तृहरिणाऽपि समस्तमपि ज्ञानजातं शब्दानुविद्धमेव सत् प्रतीतिरीतिगोचरतामुपैतीति प्रतिपादितम्[३]।

इत्थमत्र पौरस्त्यपाश्चात्त्यदृष्टी संक्षिप्त्याविचारिते। अस्ति द्वयोरपि तात्त्विको भेद एकः। क्रोचेमहोदयो मनस्तत्त्वनिर्माणप्रक्रियां सत्करोति, महनीया भारतीयकाव्यज्ञमनीषा तु मनस्तत्त्वसङ्गुम्फितमेव शब्दतत्त्वमपि समानतया सत्कुर्वाणा परिलक्ष्यते। निश्शङ्कमिदं मतं यत् काव्यविवेचनसन्दर्भे

---

१. 'कविचेतसि प्रथमं च प्रतिभासमानम् अघटितपाषाणशकलकल्पमणिप्रख्यमेव वस्तु विदग्धकविविरचितवक्रवाक्योपारूढं शाणोल्लीढमणिमनोहरतया तद्विदाह्लादकारि काव्यत्वमधिरोहयति।' (वक्रोक्तिजीविते, पृ० २२।)

२. The Principles of Art, P. 244.

३. 'न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते॥' (वाक्यपदीये, १।१२४)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शब्दतत्त्वस्यैव समुपबृंहणं भारतीयविचारकमस्तिष्कभूतलप्रसवः, यतो हि रसिकेष्वभिव्यज्यमाना काऽपि भावोद्यानपरिस्फुरन्त्यनुभूतिः काव्यशब्दमेवोपगूहति ।

क्रोचे-महोदयस्तु रसिकानुपेक्ष्य काव्यरचनाप्रक्रियामाधृत्य कविजनानामान्तरिकीं भूमिमेव परामृशन् पर्य्यालोचनमनुतिष्ठति । भारतीयकाव्यशास्त्रोपवनस्य कमनीयतमा भावसौरभसन्दर्भगर्भिता व्यञ्जनावल्ली 'काव्य'-शब्दकुसुमस्य 'शक्तिरेव' स्वीकृता बुधैः ।

उपरितनविवेचनानुशीलनेन वेद्यते यत् क्रोचेसम्मता 'अभिव्यञ्जना' कविगता रचनाप्रक्रियाऽस्ति, अस्मिन्नेव प्रसङ्गे प्रकृतमनुगम्य ध्वनिसिद्धान्तजीवातुभूता व्यञ्जनाऽपि द्वित्रैश्शब्दैः प्रेक्ष्यते तावत्, तदैव व्यञ्जनाऽभिव्यञ्जनयोर्भेदमभ्युपगमिष्यामः । 'व्यञ्जना' सा सहजा सारस्वती शक्तिर्या महाकवित्वसञ्चारणचर्चितचारुतरकीर्तिमरीचिका सती महाकविवाङ्मेदिनीमेवाधिशेते, सरसं प्रतिभोत्थापितं वस्तु च निःस्यन्दते, येन कोऽप्यसाधारणः कविप्रतिभाविशेषः समुद्दीप्यते[1] । अनेनेदं स्फुटीभवति यद् व्यञ्जना वाक्शक्तिः कविगतं प्रातिभं प्रत्ययं समभिव्यनक्ति । अत एव सहृदयवत्सस्नेहपरवशा वाग्धेनुः स्वयमेव 'रस'–पयोदोग्धीति भट्टनायकः प्राह[2] ।

अस्ति च कविप्रतिभैव कवि-शक्तिः, सैव च काव्यपरिस्फुरणबीजमिति मम्मट-राजशेखरादयो निजगदुः । परन्तु व्यञ्जना हि शब्दस्य शक्तिमात्रम्, तया चाभिव्यक्तोऽर्थो व्यङ्ग्य इत्याख्यायते, स एव च प्रतीयमानार्थोऽपि, यो हि ललितललनाजनाङ्गातिरिच्यमानलावण्यनीकाशः कविभारत्यां भासते[3] ।

---

१. (क) सरस्वती स्वादु तदर्थवस्तु निःस्यन्दमाना महतां कवीनाम् ।
अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम् ॥
(ध्वन्यालोके—१।६)

(ख) प्रतिपत्तॄन् प्रति सा प्रतिभा नानुमीयमाना, अपि तु तदावेशेन भासमानेत्यर्थः । यदुक्तमस्मदुपाध्यायेन भट्टतौतेन—'नायकस्य कवेः श्रोतुः समानोऽनुभवस्ततः ।' प्रतिभा अपूर्ववस्तुनिर्माणक्षमा, तस्या विशेषो रसावेशवैशद्यसौन्दर्यं काव्यनिर्माणक्षमत्वम् । यदाह मुनिः—'कवेरन्तर्गतं भावं भावयन् भाव उच्यते ।' इति । (लोचने, पृ० ९३-९४ ज०) ।

२. वाग्धेनुर्दुग्ध एतं हि रसं यद्बालतृष्णया ।
तेन नास्य समः स स्याद् दुह्यते योगिभिर्हि यः ॥ (लोचन उद्धृतम्, पृ० ९३)

३. ध्वन्यालोके, १।४ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

व्यञ्जनाऽभिव्यञ्जनयोर्भेदः—

इत्थमधुना व्यञ्जनाऽभिव्यञ्जनाभेदः स्पष्टीभवति—(क) कथं तावत् काव्यकरणकः काव्यानन्दो रसिकैस्समास्वाद्यते ? प्रश्नस्यास्योत्तरणे वक्तुं शक्यते यदस्ति काव्यपदेषु कोऽपि व्यञ्जनाख्यो व्यापारो यो हि रसिकचेतसि तावद् आनन्दबोधमुद्बोधयतीति ।

(ख) कथञ्च रसनिःस्यन्दनप्रभावकं कमनीयकाव्यं कविजनः कुरुते ? अस्य प्रश्नस्येदमुत्तरं यत् कविजनहृदयतलेष्वस्ति कोऽप्यभिव्यञ्जनाख्यो व्यापारः, यो हि कवेः प्रातिभं ज्ञानं बिम्बयन्नभिव्यक्तीकरोतीति, तदेव चाभिव्यक्तीभूतं कविप्रातिभज्ञानं 'काव्यं' कथ्यते । यथा—

नखं नखाग्रेण विघट्टयन्ती विवर्तयन्ती वलयं विलोलम् ।
आमन्द्रमाशिञ्जितनूपुरेण पादेन मन्दं भुवमालिखन्ती[1] ॥

अत्र च पद्ये लज्जाव्यञ्जनाय कवेरान्तरिकमनोव्यापारपरम्परां न प्रबोधयति व्यञ्जना; प्रत्युतैतैरेव शब्दसुमनोभिरुद्भावितं लज्जासौरभं सरसं सहृदयहृदये प्रबोध्य स्वकृतिविरता भवति । इत्थं पुनरपि सुस्पष्टीभवति यत्—

(अ) 'अभिव्यञ्जना' हि कविनिष्ठा शक्तिः, या कविमानसादुत्थाय काव्याजिरं व्रजति मन्द-मन्दम् । सा च कविहृदयतल्पशायिनीं काव्यरचनाचातुरीमुन्निद्रयति ।

(आ) 'व्यञ्जना' तु काव्यगता शक्तिः, या काव्यात् प्रस्थाय सहृदयहृदयं परिव्याप्नोति । सा च काव्यरसग्राहिका शक्तिः ।

अभिव्यञ्जनायां स्वकार्यविरतीभूय बुद्धौ चान्तरिकं वस्तुबिम्बं निधाय तिरोहितायां सत्यां बुद्ध्या चान्तरिकवस्तुबिम्बे वागाकाराकारिते कृते व्यञ्जना स्वकृत्यं विधातुं समुद्युङ्क्ते; रसिकहृदयेषु काव्यार्थं प्रहिणोति । इत्थं रचनाप्रेषणाभ्यामेवाभिव्यञ्जनाया रचना-प्रणाली सामीचीन्येन संवेद्यते, व्यञ्जनायाश्च प्रेषणाप्रक्रिया भेदितमर्म्मस्थलीभवति । क्रोचेमहोदयस्तु रचनाप्रक्रियामेव सबलमाश्रित्य प्रेषणामप्रधानीकरोति । अत एव प्रेषणीयतातत्त्वोपेक्षणात् स दोषास्पदीक्रियते समालोचकैः[2] । व्यञ्जनावादिनो मनस्विनस्तु प्रेषणीयतामेव साधु समपेक्ष्य विवेचनां पुरस्कुर्वन्ति, रचनाप्रक्रियामपि यथास्वमाश्रयन्ते, काव्यकारणनिरीक्षणक्षणे[3] । इत्थं वयं व्यञ्जनाऽभिव्यञ्जनाभेदं सरहस्यं प्राप्नुमः ।

यदि हि व्यञ्जनामभिव्यञ्जनां च संकलय्य विचिन्तयामः, तर्हि कवेः

---

१. लोचने, पृ० ९२ ज०; २. नया साहित्य, नये प्रश्न, पृ० ८३ ।
३. काव्यप्रकाशे प्रथमोल्लासे, रसगङ्गाधरे प्रथमानने च ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सहजानुभूतेः पश्चादभिव्यञ्जना प्रसरति, ततश्शाब्दिक्याभिव्यक्तिपद्धतिः, तदनन्तरञ्च व्यञ्जनावृत्तिः, ततश्च रसिकहृदये चर्वणारहस्यं परिज्ञायते। इत्थं समन्वयवादिनामालोचकानां समीक्षा-तरङ्गिणी-सङ्गमस्थलमागत्य द्वयोरपि प्रवाहैक्यं द्रक्ष्यामस्तथापि शब्दययी सारस्वत्यभिव्यक्तिरेखा द्वे अपि पृथक् करोति; यतो हि क्रोचे-महोदयो मनस्तत्त्वसमर्चकः; किन्तु भारतीयाः काव्यमाकन्दमाकरन्दबिन्दुनिःस्यन्दनार्द्रमानसास्तु काव्यसन्दर्भे शाब्दीं सरस्वतीमेव श्रद्दधति—

विविक्तवर्णाभरणा सुखश्रुतिः प्रसादयन्ती हृदयान्यपि द्विषाम् ।
प्रवर्तते नाकृतपुण्यकर्म्मणां प्रसन्नगम्भीरपदा सरस्वती[1] ॥

कस्यचिदेव कदाचिद् दयया विषयं सरस्वती विदुषः ।
घटयति कमपि तन्मयो व्रजति जनो येन वैदग्धीम्[2] ॥

निरन्तररसोद्गारगर्भसन्दर्भनिर्भराः ।
गिरः कवीनां जीवन्ति न कथामात्रमाश्रिताः[3] ॥

वन्दे कवीन्द्रवक्त्रेन्दुलास्यमन्दिरनर्तकीम् ।
देवीं सूक्तिपरिस्पन्दसुन्दराभिनयोज्ज्वलाम्[4] ॥

कवेरभिप्रायमशब्दगोचरं स्फुरन्तमार्द्रेषु पदेषु केवलम् ।
वदद्भिरङ्गैः स्फुटरोमविक्रियैर्जनस्य तूष्णीम्भवतोऽयमञ्जलिः[5] ॥

पर्य्यालोचनम्—

इत्थं वयं पश्यामो यद् अभिव्यक्तिकौशलं व्यञ्जनायामभिव्यञ्जनायामपि च समपेक्षणीयम्। अभिव्यञ्जनायाश्च त इमे सारभूतार्थाः—

(अ) आत्मनो हि द्वे क्रिये प्रथिते, विचारात्मिका व्यवहारात्मिका चेति। विचारात्मिका क्रिया च ज्ञानस्य नामान्तरमात्रमेव, तस्या भेदद्वयं वेदितव्यम्— स्वयंप्रकाश्यं ज्ञानं (सहजानुभूतिः), प्रमेयं ज्ञानञ्च। काचनापि कला स्वयम्प्रकाश्यज्ञाने न सहजानुभूत्यैव सम्पर्कमाबध्नाति, कलायाः सहजानुभूतिरूपत्वात्। द्विविधापि सहजानुभूतिरेकतः पदार्थबोधात्, अपरतश्च संवेदनात् संवेदनपुञ्जाद् वा विभिद्यते। पदार्थबोधाय तु पदार्थसंस्थितिरावश्यकी भवति, सहजानुभूतिश्च पदार्थबोधाद्विनापि सम्भवति। सहजानुभूतिर्न याथार्थ्यसम्भवयोर्भेदं पश्यति।

---

१. किरातार्जुनीये १४।३; २. धनञ्जयस्य दशरूपके, १।३।
३. वक्रोक्तिजीविते, ४।५ (अनन्तरश्लोकः—१२)।
४. वक्रोक्तिजीविते, १।१।
५, विज्जिकायाः, 'संस्कृत साहित्य का इतिहास' बलदेवोपाध्यायस्य, १९६८, पृ० ३४४।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

संवेदनं चामूर्त्तं स्पन्दनम्, आत्मनैव वेदनीयम्, न चाभिव्यञ्जनीयम्। संवेदनस्य जडत्वान्निष्क्रियत्वाच्च। यथा साधारणीकरणरसनिष्पत्त्योर्भेदे न कोऽपि रसिकदृष्टौ दवीयान् भेदः, तथैवात्र सहजानुभूत्यभिव्यञ्जनयोर्मध्ये न भेदलेशः। इयमेव सहजानुभूतिरूपाऽभिव्यञ्जना 'कला' सम्मता।

(आ) वस्तुरूपे वस्त्वभिव्यञ्जने वाऽधिकृत्य क्रोचे-मतं काव्यशास्त्रप्रवाह-भिन्नमिति प्रतीयते। क्व निविशते सौन्दर्यं नाम? वस्तुनि, अभिव्यञ्जनायाम्, द्वयोरपि वा? यदि च वस्तु तावदनभिव्यक्तं भावतत्त्वमन्तःसंस्कारं वाऽभिप्रैति, अभिव्यञ्जना च व्यक्तीकरणक्रियां सम्बध्नाति; तदा तु सौन्दर्यं न वस्तुनि, न वा वस्त्वभिव्यञ्जनयोस्संवलिते रूपे, सौन्दर्यव्यञ्जनप्रसङ्गेऽभिव्यक्तिर्न भाव-तत्त्वसम्पृक्ता; प्रत्युत भावतत्त्वमेवाभिव्यक्त्या मूर्त्तीक्रियते, भावतत्त्वमेवाभि-व्यञ्जनाकाराकारितं भवतीति यावत्, तद्ध्यभिन्नमपि भिन्नवत् प्रतीयमानम्। अत एव सौन्दर्यमेवाभिव्यञ्जना।

(इ) अभिव्यञ्जनाऽभिव्यञ्जनाभिन्नं नोद्देश्यान्तरमनुसन्धत्ते, अभिव्य-क्तिरेव हि तस्याः परमं चरममुद्देश्यम्। एवञ्च कस्याञ्चनापि कलाया नोद्देश्यं किञ्चन शिक्षणप्रसादनकीर्तिधनार्जनादिरूपम्। 'कला कला-व्यक्तिकला-ललामभूता, कलायै सकला कला मता'। आनन्दस्तु कलाकामिनीसहचरः, न गन्तव्यभूतो लक्ष्यभूतो वा। आत्मवैशद्यकरणमेव कलाया अनन्यतमं कृत्यम्। मनस्तलरिङ्गद्भावतरङ्गाभिव्यञ्जनादेवात्मा विशदीभवतीति तत्त्वम्। यथा हि जलदकर्तृकसलिलमोचनेनैव गगनतलं विमलायते। इयमेव हि कलाया अन्तिमा सिद्धिसम्पत्। अत एव कला (आन्तरिकी सहजा) न वृणोत्युपयोगिता-नैतिकतादिबन्धनानि, कलाया मूर्त्तने तु कोऽपि कलाकारः सामाजिकनियमनिघ्न एव संस्ता एव सहजानुभूतीर्मूर्त्तयितुमर्हति, या समाजव्यूहहितावहाः स्युः। क्रोचे-महोदयादनन्तरं व्यवहारक्षेत्रं संस्पृशन्नभिव्यञ्जनावादः प्रतिहतमूलरूप एव कृतस्तैस्तैः पिराण्डेलो-प्रभृतिभिरालोचकैरिति तन्मतमुपेक्ष्यम्।

(ई) कला ह्यात्मनिष्ठा क्रिया। कलाकृतिश्च तस्या मूर्तिमद् भौतिकं रूपमात्रम्, यन्नानिवार्यतया समुपतिष्ठते। कलासृष्टिश्च क्रमशः पञ्च सोपानानि समारोहति—अरूपसंवेदनम्, अभिव्यञ्जनाम् (अरूपसंवेदनानामान्तरिकीं समन्विर्ति सहजानुभूतिरूपिणीम्), आनन्दानुभूतिम् (सफलाया अभिव्यञ्जनाया आनन्दानुभूतिम्), आन्तरिक्या अभिव्यञ्जनायाः (सहजानुभूतेः) शब्दध्वनि-रङ्ग-रेखादि-भौतिकतत्त्वेषु मूर्त्तनम्, काव्यचित्रादिकलाकृतीतां भौतिकं मूर्त्तं रूपञ्च। एषु सोपानेषु द्वितीयमेव वास्तविकीं कलासृष्टिमनुबध्नाति।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

समीक्षा—

क्रोचेकृतविवेचनैर्ज्ञायते यदस्ति किमपि मौलिकमन्तरमभिव्यञ्जनावाद-ध्वनिसिद्धान्तयोः। ध्वनिसिद्धान्तैकदेशो रससिद्धान्तो भावाधृतः, किन्त्वभिव्यञ्जनावादोऽभिव्यक्तिभिन्नं तत्त्वान्तरं नोररीकरोति। अयञ्च भेदो भावनाभिव्यक्त्योर्बलाबलकृतो महत्त्वापेक्षाजनितो वेति प्रतीयते। अभिव्यञ्जनावादो भावनामहत्त्वं न च न स्वीकरोति, किन्त्वभिव्यक्तेः प्राङ् न भावना परिपक्वायते, प्रत्युत मुग्धेव नायिका साऽनभिव्यक्तसौन्दर्य्या लसतीति सम्मनुते[1]। प्रेम–क्रोधादि भावनामूलं न प्रेमक्रोधादिरेव, प्रत्युत विशिष्टमेव किञ्चन मानसं संवेदनमन्वितिमाध्यमेनाभिव्यक्तं सदेव प्रेमक्रोधादिरूपं भवति। नेयं धारणा रससिद्धान्ताद्विवदते, यतो हि ध्वनिवादेऽपि भावानुभूतिनामेव न 'रसः' इति, भावाभिव्यक्तिरेव रसे परिणमते। द्वयोरपि सिद्धान्तयोः 'अभिव्यक्ति'–शब्दस्याऽर्थमादाय भेदो जरीजागर्ति। अभिव्यञ्जनावादेऽभिधाऽभिव्यञ्जनेऽभिव्यक्तिरूपे, किन्तु ध्वनिवादे व्यञ्जनैवाभिव्यक्तिः नाभिधाया कथनादिव्यापारसन्दोहः। अयमेव खलु मौलिको भेदो ध्वनिवादाभिव्यञ्जनावादयोः।

ध्वनिवादवदभिव्यञ्जनावादोऽपि 'कलामभिव्यञ्जनात्मिकाम्' मनुते, द्वयोरपि मूलभूत आधारः कल्पनैव। कल्पनैव सौन्दर्य्यनिदानं चारुत्वबीजं वा, तदेव ध्वनिरभिव्यञ्जना वा। किन्तु ध्वन्याधारभूताया अभिव्यक्तेरभिव्यञ्जनाया वाऽर्थः 'व्यञ्जनैव', परं 'अभिव्यञ्जनावाद'-गतायामभिव्यञ्जनायामभिधाया अप्यन्तर्भाव ऊहनीयः। न चाभिव्यञ्जनायामभिधाव्यञ्जनयोः कोऽपि भेद इव परिलक्ष्यते।

वस्तुतस्तु द्वयोरपि सत्यासत्यनिर्णयावकाशो नात्र, तथापि दार्शनिकस्य तात्त्विकदृष्ट्या समालोचकस्य च व्यावहारिकदृष्ट्यैव भेदप्रकल्पनं लक्ष्यतेऽत्र। इत्थं मूलानुगमनेनाभिव्यञ्जना–व्यञ्जनयोर्न मनागपि भेदः। अभिव्यञ्जनावादस्तु व्यञ्जनावादस्यैवातिव्यापको रूपविशेष इति निर्णीयते[2]। अभिव्यञ्जनाया अतिव्याप्तं प्रसरणमेव व्यञ्जना सदोषं मन्यते। अत एव सामान्यमन्तरं द्वयोः किमपि विलोक्यते—

(१) अभिव्यञ्जनावादेऽभिव्यक्तिरान्तरिकी मुख्या महत्त्वपूर्णा च, शब्दार्थमयी बाह्याभिव्यक्तिस्तु गौणी वैकल्पिकी चेति न महत्त्वकलिता।

---

१. रसमीमांसायाम्——रामचन्द्रशुक्लस्य, पृ० १९३।

२. डॉ० नगेन्द्रकृते 'रस-सिद्धान्ते', पृ० ३४२।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(२) ध्वनिवादे रसवादे वा नेयमान्तरिक्यभिव्यक्तिरमान्या; किन्तु तत्र शब्दार्थमयी बाह्याभिव्यक्तिर्नामान्या, प्रत्युत मान्यैव ।

(३) व्यञ्जनावादे (रसवादे वा) आनन्दानुभव एव परमं प्रयोजनं रसलक्षणञ्च, स हि सद्यः परा निर्वृतिः, काव्यकवनस्य काव्यानुशीलनस्य च मौलिभूतः प्रयोजनविशेषः । किन्त्वभिव्यञ्जनावाद आनन्दानुभूतिमानुषङ्गिक-लाभं मन्यते ।

(४) अभिव्यञ्जनावादे कला-कलनस्य प्रयोजनं कलैव । कलाकारः कला-कलनं नानन्दानुभवाय परिबद्धपरिकरस्संश्चेष्टतेतराम्; किन्तु कला-कलन-कालेऽ-निवार्य्यं आनन्दानुभवस्तमालिङ्गत्येव प्रसभम् । रसवादे व्यञ्जनावादे वा कला-सृष्टिरानन्दमयीति स्वीक्रियत एवेत्यत्र न विप्रतिपत्ति-प्रतिपत्तिः; किन्तु कलागत आनन्दानुभवो नात्र भवत्यानुषङ्गिको लाभः; प्रत्युत लक्ष्यभूतो मौलिकश्चेति महिष्ठो भेदः ।

उपर्युक्तोऽयं भेदरहस्यप्रपञ्चो दृष्टिभेदमूलो न तु तत्त्वमूलः[1] , यतो हि अभिव्यञ्जनावादो व्यञ्जनावादश्च (रसो ध्वनिश्चाप्यत्रैवान्तर्गणितौ) आत्मा-न्वेषणपरौ । द्वावपि समग्रसृष्टिप्रपञ्चस्य मूलाधारमात्मानं मन्वाते । उभयत्रा-प्यात्मैवाभिव्यक्तिम् = सृष्टिम्, आनन्दञ्च आत्मसात्कृत्यैव बहिः प्रकाशयति ।

साधारणीकरणम् अभिव्यञ्जना च—

व्यञ्जनया रसनिष्पत्तिः प्रसाध्यते, रसनिष्पत्तिश्च साधारणीकरण-पूर्विकैवेति काव्यार्थवेत्तारः । अतश्च साम्प्रतं क्रोचे-सम्मताया अभिव्यञ्जनाया भारतीयसाधारणीकरणस्य च तुलनात्मकमध्ययनं द्वित्रैश्शब्दैः पुरस्सार्यते ।

अभिव्यञ्जनावादः प्रज्ञाम् (Intutions), वस्तुबिम्बनम् (Image making), अभिव्यक्ति (Expression) च क्रमशः समादाय, एतत् त्रयमप्ये-करूपं स्वीकुरुते । किन्त्वेतत् त्रितयं कविषु कलाकारेषु वा निरुक्तक्रमेण; रसिकेषु सहृदयेषु तु विपरीतक्रमेण पदं निधत्ते । एवञ्च रसिका अभिव्यक्ति-पक्षमादाय मानसिकं मूर्त्तनं (बिम्बनं) कृत्वा, अनुभूतौ (प्रज्ञायाम्) अवतरन्ति । एतद् दृष्ट्या विचारणे तु भावानां साधारणीकरणं विभावादीनाम-भिमूर्त्तनेन निष्पद्यते । अभिमूर्त्तनदशायां विभावादीनामपि साधारणीकरणं भविष्यति । भावा अपि च तथैवाप्यभिबिम्बिता भूत्वा व्यक्तीभविष्यन्ति । तथा च तत्र भावाः साधारणकृता एव भविष्यन्ति, न तु वैयक्तिकाः । इत्थञ्च

१. डॉ० नगेन्द्रकृते 'रससिद्धान्ते', पृ० ३४३ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

क्रोचे-महोदयो भारतीयसाधारणीकरणस्य तात्त्विकमाधारं ग्रह्णन्निव विभातीति, किन्तु साधारणीकरणस्य चर्चा न क्रोचे-मतायामभिव्यञ्जनायां क्वचनापि वर्तते ।

अभिव्यञ्जनाप्रणाली खल्वान्तरीकीं सहजानुभूतिमालिङ्गति । इयञ्च सहजानुभूतिरलौकिक्येव । साधारणीकरणाव्यवहितोद्भूता रसनिष्पत्तिरप्य-लौकिकी । एवं हि क्रोचे-महोदयोऽज्ञानावस्थायामपि रसविषयकं साधारणीकरणं मन्वान इव विलोक्यते । भट्टनायकाभिनवगुप्तादयो हि साधारणीकरणं 'काव्य-मुख्य-व्यापारम्' बोधयन्ति; क्रोचे-महोदयस्तु कविव्यापारं कविगतां रचना-प्रणालीं रसिकव्यापारं च रसिकगतां रसनाप्रणालीं वा मंस्यते[1] इत्यलम् ।

१. मध्यभारत्याम् (सागरविश्वविद्यालयीयपत्रिकायाम्, १९७० ई०), पृ० १४ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गुणवृत्तिविमर्शः

श्रीकमलाकान्तत्रिपाठी
अनुसन्धाता,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य, वाराणसी

***

श्रीमदानन्दवर्धनाचार्यो निजनिर्मितध्वन्यालोकाख्यग्रन्थे ध्वनेर्विप्रतिपत्तिप्रदर्शनावसरे 'भाक्तमाहुस्तमन्ये' इति भाक्तवादिनां ध्वनिविषये विप्रतिपत्तिं प्रतिज्ञाय तद्विवरणे 'अन्ये तं ध्वनिसंज्ञितं काव्यात्मानं गुणवृत्तिरित्याहुः' इत्युक्तवान्[1]। तत्रैव चाभिनवगुप्तपादाचार्याः सामानाधिकरण्यस्य 'यद्यप्यविवक्षितवाच्यध्वनिप्रभेदे 'निःश्वासान्ध इवादर्शः' इत्यादावुपचारोऽस्ति, अत एवात्र ध्वनेर्गुणवृत्तिसामानाधिकरण्यमुपपन्नं भवति; किन्तु यत्र विवक्षितान्यपरवाच्यप्रभेदादावुपचारो नास्ति, तत्रापि ध्वनेः सत्त्वान्नोपचारात्मैव ध्वनिरित्यभिप्रायमुक्त्वा गुणवृत्तिं शब्दार्थव्यापारपरकतया व्याख्यातवन्तः। तथा हि—"गुणाः सामीप्यादयो धर्मास्तैक्ष्ण्यादयश्च तैरुपायैर्वृत्तिरर्थान्तरे यस्य स शब्दो गुणवृत्तिः। तैरुपायैर्वृत्तिर्वा शब्दस्य यत्र सोऽर्थो गुणवृत्तिः। गुणद्वारेण वा वर्तनं गुणवृत्तिरमुख्योऽभिधाव्यापारः" इति। तत्पश्चाद् ध्वनतीति वा ध्वन्यत इति वा ध्वननमिति वा ध्वनिरिति ध्वनिमपि शब्दार्थव्यापारपरकतया व्याख्याय भाक्तवाद्यभिप्रायम् अमुख्य एव ध्वनिरित्युक्तवन्तः[2]। अन्यत्रापि ध्वन्यालोके लोचने च गुणवृत्तेश्चर्चा विहिता। अत एव जिज्ञास्येते—केयं गुणवृत्तिः? किमभिधारूपा? अथवा किं लक्षणारूपा? किं वा तदुभयव्यतिरिक्ता? आहोस्विद् व्यञ्जनारूपा?

मीमांसकानां मतम्—

मीमांसका विशिष्टबुद्धिनियामकत्वाभावात् सादृश्यस्य सम्बन्धत्वमेवानङ्गीकुर्वन्तोऽभिधालक्षणाभ्यां व्यतिरिक्तामेव गौणीं वृत्तिं स्वीकुर्वन्ति। मीमांसकेषु प्राचीनाः पार्थसारथिप्रभृतयः 'लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणता' इति वार्तिककारवचनानुरोधात् 'सिंहो देवदत्तः' इत्यादिस्थले सिंहपदेन शक्त्या सिंहोपस्थित्यनन्तरं लक्षणया क्रूरत्वोपस्थितिरिति वदन्ति। यथा चोक्तं पार्थसारथिना शास्त्रदीपिकायाम्—"कथमगुणवचनो गुणमभिदध्यात्? नाभिदधाति; किन्तु स्वार्थसम्बन्धेन बोधयति। यजमानशब्दो हि (यजमानः प्रस्तर इत्यत्र) स्वार्थमभिधत्ते, स चाभिहितः स्वसमवेतं स्वकार्यकरत्वंसंबन्धाद्

१. ध्वन्या० प्रथमोद्द्योते; २. ध्व० लोचने प्रथमोद्द्योते।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

बोधयति। तच्च प्रस्तरेऽप्यस्तीति प्रस्तरबोधः। एवं स्वार्थसदृशे तात्पर्यं भजमानो यजमानशब्दो गौणः सम्पद्यते, यथा लोके सिंहो देवदत्त इति[१]।"

अयं भावः—'यजमानः प्रस्तरः' इत्यत्र प्रस्तरसामानाधिकरण्येनानुपपद्यमानो यजमानशब्दः शक्त्या स्वार्थं बोधयन् लक्षणया स्वकार्यकारित्वं बोधयति। यजमानकार्यकारित्वस्य प्रस्तरेऽपि सत्त्वात् तद्गुणयोगाद् गौण्या वृत्त्या प्रस्तरबोधो भवति। नव्या खण्डदेवशंभुभट्टप्रभृतयस्तु—एकसंबन्धिदर्शनेनापरसंबन्धिस्मरणमिति स्मारकविधयैव स्वार्थसहचारिगुणोपस्थितिर्न लक्षणयेति प्रतिपादयन्ति[२]। तन्मते लक्ष्यमाणगुणैरिति वार्त्तिके 'लक्ष्यमाणा लक्षणया बोध्यमाना ये गुणा इति कर्मधारयसमासो न भवति; अपि तु सिंहत्वाग्नित्वजातिवाचकपदेन या लक्ष्यमाणा व्यक्तिः, तन्निष्ठगुणैरिति षष्ठीतत्पुरुष एव भवति। अत एव वार्त्तिके—'अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते' इत्यत्राऽभिधेयाविनाभूतसंबन्धादरः प्रदर्श्यते। एवमुत्तरार्धे मुख्यार्थसादृश्यरूपादरमात्रम्, न नु लक्षणा।

अत्र लोके 'अध्यारोपितार्थवृत्तित्वं गौणत्वम्'इति प्रसिद्धम्, सिंहत्वस्य देवदत्त आहार्यारोपात्। न च तद्वेदे संभवति, आरोपकपुरुषाभावादिति न वक्तव्यम्, विनाऽप्यारोपं सिंहशब्दस्य सादृश्यमात्रविवक्षया देवदत्ते काव्यलोकयोः प्रयोगदर्शनात् 'स्वशक्यगुणसमानजातीयगुणयोगनिमित्तत्वं गौणत्वम्'इति लक्षणं भवति। लक्षणसमन्वयश्च 'सिंहो देवदत्तः' इत्यत्र सिंहनिष्ठक्रूरत्वसमानजातीयक्रूरत्वयोगात् सिंहपदस्य देवदत्ते प्रवृत्तेर्भवति। यथा चोक्तं पार्थसारथिना शास्त्रदीपिकायाम्—"न चान्यारोपितार्थत्वं लोके गौणत्वम्, तत्संबन्धिन्यर्थान्तरे तद्भावात्। न सिंहो देवदत्त इति प्रयुञ्जानस्य सिंहत्वाद्यारोपोऽस्ति। शौर्यादिगुणविवक्षयैव प्रयुङ्क्ते। प्रतिपत्तारोऽपि सादृश्यमेव प्रतिपद्यन्ते, नाध्यारोपमिति[३]।" अत एवैतादृशगौणत्वं वेदेऽप्यस्ति।

यद्यपि रूपकादिस्थल आरोपेणापि गौणी वृत्तिर्दृश्यते; तथापि सादृश्यमात्रेणापि सोपमास्थलेऽनुभूयते। आरोपेणापि गौण्या वृत्तेर्दृश्यमानत्वाद् श्रीखण्डदेवैरुभयसाधारण्येन लक्षणं विहितम्—'स्वशक्यसमवेतवत्ता गौणी वृत्तिरिति'[४]। समवेतत्वश्च क्वचिदारोपितत्वसंम्बन्धेन, क्वचिच्च स्वसमानजातीयगुणवत्तासंबन्धेनेति भेदः।

एवं तन्मते गौण्या लक्षणातो भेदो वर्तते। यतो हि स्वशक्यगुणानामेव यत्र सम्बन्धित्वेन बोधस्तत्र लक्षणा भवति, क्रूरत्वादिना बोधे तु गौणी भवतीति

---

१. शास्त्रदी० तत्सिद्धयधिकरणे; २. भा० दी० तत्सिद्धयधिकरणे।
३. शास्त्रदीपिकायाम्, १।४।१३; ४. भाट्टदीपिका, प्रभा० टी०, पृ० ११९।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तयोर्भेदः स्फुटः। अत एव लक्षणागौण्योर्भेदादेव—"सहचरणस्थानतादर्थ्यवृत्तमानधारणसामीप्ययोगसाधनाधिपत्येभ्यो ब्राह्मणमश्वकटराजसक्तुचन्दनगङ्गाशाटकान्नपुरुषेष्वतद्भावेऽपि तदुपचारः"[1] इति सूत्रेणाक्षपादप्रभृतिभिर्लक्षणानिमित्तानामुक्तत्वाज्जैमिनिना गौणवृत्तिनिमित्तगुणाः पार्थक्येनोक्ताः। ते च गुणास्तत्कार्यकारित्वादयस्तत्रैव मीमांसाशास्त्रे द्रष्टव्याः विस्तरभयादत्र नो लिख्यन्ते।

वैयाकरणानां मतम्—

वैयाकरणास्तु लक्षणान्तर्भूतामेव गुणवृत्तिमङ्गीकुर्वन्ति। साहित्यिका यथा गौणी शुद्धेति लक्षणाया भेदद्वयं पूर्वमङ्गीकुर्वन्ति, तथैव तेऽपि तत्प्रभाविता नागेशभट्टप्रभृतयो गौणीशुद्धेति द्वैविध्यं स्वीकुर्वन्ति[2]।

तत्र गौण्या लक्षणं विहितं नागेशभट्टेन लघुमञ्जूषायाम्[3]—"स्वनिरूपितसादृश्याधिकरणत्वसम्बन्धेन शक्यसंबध्यर्थप्रतिपादिका गौणी" इति। इत्थं वैयाकरणा 'विशिष्टबुद्धियोग्यसंबन्धे सत्येव लक्षणाप्रवृत्तेर्गौणी न लक्षणान्तर्गता, यतो हि संयोगेन 'दण्डी चैत्रः' इतिवत् सादृश्येन 'सिंहवांश्चैत्रः' इति प्रतीतिर्न भवतीति मीमांसकमतमनादृत्य विशिष्टबुद्धयोग्यत्वेऽपि विपरीतलक्षणास्थले स्वनिरूपितविरोधाधिकरणत्वसंबन्धेऽप्यस्याः सत्त्वात् तां लक्षणान्तर्गतां कुर्वन्ति। नैयायिका अपि गौणीं वृत्तिमतिरिक्तां न मन्वते।

वेदान्तिषु धर्मराजाध्वरीन्द्रस्तु[4] यत्र शक्यपरम्परासंबन्धेनार्थान्तरप्रतीतिस्तत्र लक्षितलक्षणेति लक्षितलक्षणाया लक्षणं विधाय गौण्यपि लक्षितलक्षणैवेत्युक्तत्वात्। यथा 'सिंहो माणवकः' इत्यत्र सिंहशब्दवाच्यसंबन्धिक्रौर्य्यादिसंबन्धेन माणवकस्य प्रतीतिर्भवति, तथैव 'यजमानः प्रस्तरः' इत्यत्र यजमानशब्दवाच्यसंबन्ध्येककार्यकारित्वसंबन्धेन प्रस्तरस्य प्रतीतिर्भवति।

साहित्यिकानां मतम्—

साहित्यिकेष्वानन्दवर्धनात् प्राक्तना भामहदण्डिवामनप्रभृतयस्तेषां ग्रन्थे वृत्तिविवेचनस्यानुपलम्भाद् व्याकरणप्रभावितास्त इति मन्ये। अतस्ते वैयाकरणेभ्यः पृथग्भूता न सन्ति। 'शब्दाश्छन्दोऽभिधानार्थाः' इत्यभिधानस्य शब्दाद् भेदं व्याख्यातुं भट्टोद्भटोऽमुख्यवृत्तित्वेन गुणवृत्तेः संकीर्तनं करोति। तथा हि—'शब्दानामभिधानमभिधाव्यापारो मुख्यो गुणवृत्तिश्चेति'[5]। एवं तन्मतेऽभिधाव्यापार एव मुख्यामुख्यरूपतया द्विविधः। गुणवृत्तिपदेन तेनाऽमुख्यव्यापार

---

१. न्या० द०, २।२।६४;   २. वै० ल० म०, ल० नि०।
३. लघुमञ्जूषायां लक्षणानिरूपणे;   ४. वेदान्तपरिभाषायामागमपरिच्छेदे।
५. लोचनत उद्धृतम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एवोक्तः। स च लक्षणैव। अत एवोद्भटमतेन गुणवृत्तिर्लक्षणाया न पृथग्भूता। आनन्दवर्धनाचार्योऽपि सर्वत्रैव गुणवृत्त्यैव लक्षणाया व्यवहारं कृतवान्। अतस्तन्मतेऽपि गुणवृत्तिर्लक्षणैव न ततः पृथग्भूता। अभिनवगुप्तपादाचार्यास्तु पूर्वं गुणवृत्तेर्मीमांसकमतानुसारेण लक्षणं विहितवन्तः, पश्चात्तां लक्षणान्तर्भूतां कृतवन्तः। तथा हि—"केवलं शब्दस्तमर्थं लक्षयित्वा तेनैव सह सामानाधिकरण्यं भजते—'सिंहो वटुरिति'। अर्थो वाऽर्थान्तरं लक्षयित्वा स्ववाचकेन तद्वाचकं सामानाधिकरण्यं करोति। शब्दार्थौ वा युगपत्तं लक्षयित्वाऽन्याभ्यामेव शब्दार्थाभ्यां मिश्रीभवत इत्येवं लाक्षणिकाद् गौणस्य भेदः। यदाह गौणे शब्दप्रयोगः, न लक्षणायामिति"[1]।

अयं भावः—गुणतया वृत्तिर्व्यापारो गुणवृत्तिः। गुणेन क्रौर्य्यादिसाधारणगुणेन सादृश्यमहिम्नाऽर्थान्तरविषयेऽपि शब्दस्य सामानाधिकरण्यम्। यथा 'सिंहो माणवकः' इत्यत्र सिंहशब्दः स्वनिष्ठक्रौर्य्यादिगुणरूपमर्थं लक्षणया बोधयित्वा माणवकेऽपि तत्सत्त्वात्, माणवकेन सामानाधिकरण्यं भजते। एवं सिंहत्वरूपोऽर्थः क्रौर्य्यादिरूपमर्थान्तरं लक्षणया बोधयित्वा स्वगुणयोगात् स्वस्य सिंहत्वरूपार्थस्य वाचकेन सिंहेन तद्वाचकं माणवकार्थवाचकं माणवकं सामानाधिकरण्यं करोति 'सिंहो माणवकः' इति। एवं तृतीयेऽपि पक्षे योजनीयम्। इत्थं लाक्षणिकाद् गौणस्य भेदं प्रदर्श्य पुनरुक्तमग्रे—"तत्रापि लक्षणाऽस्त्येव सर्वत्र सैव व्यापिकेति" अर्थात् लक्षणातः पृथग् गौणी वृत्तिर्नाङ्गीकर्तव्या। सा च पञ्चविधा। तद्यथा—

अभिधेयेन सामीप्यात् सारूप्यात् समवायतः।
वैपरीत्यात् क्रियायोगाल्लक्षणा पञ्चधा मता[2]॥

अत्र सादृश्यापरपर्यायस्य सारूप्यस्य निवेशोऽग्निर्माणवक इत्यादौ गुणवृत्तेः संग्रहायैव। एवं सादृश्यसंबन्धेन या लक्षणा, सा गौणी, तदितरसंबन्धेन कार्यकारणभावादिना च या भवति, सा शुद्धेति साहित्यिकानां विभाग उपपन्नो भवति।

निष्कर्षः—

मीमांसकैर्यद्गौणीवृत्तिः पृथक् स्वीक्रियते, तद्विचारसोढव्यतां नार्हति। सादृश्यस्य संबन्धत्वस्वीकारात्तेन लक्षणैव निष्पद्यते। तया च लक्षणया तदुक्तगुणवृत्तेर्गतार्थत्वान्न गुणवृत्तिर्लक्षणा पृथक्त्वेनाङ्गीकरणीया। सादृश्यसंबन्धेन भवतीति वामनेनाप्युक्तम्—'सादृश्याल्लक्षणा वक्रोक्तिरिति[3]'। अत एव मम्मटाचार्येणापि काव्यप्रकाशे लिखितम्—

---

१. ध्व० लो० प्रकाशटी०, पृ० १६० ; २. तत्रैव।
३. काव्यालङ्कारे वामनः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भेदाविमौ च सादृश्यात् संबन्धान्तरतस्तथा ।
गौणौ शुद्धौ च विज्ञेयौ·················· ॥ इति[1] ।

शुद्धाया गौणीतः सादृश्यमूलक एव भेद इति तदाकूतम् । सादृश्यसंबन्धेन लक्षणा गौणी, तदितरसंबन्धेन कार्यकारणभावादिना शुद्धेति यावत् । अत एव वृत्तौ तेनैवोक्तम्—"इमावारोपाध्यवसानरूपौ सादृश्यहेतू भेदौ 'गौर्वाहीकः' इत्यत्र गौरयमि···च[2]" इति ।

गुणवृत्तेर्लक्षणान्तर्भूतत्वमेव ख्यापयितुं प्रदीपकारेण 'लक्ष्यमाणगुणैर्योगाद् वृत्तेरिष्टा तु गौणता'इति वार्त्तिकं व्याख्यातं शक्यसंबन्धरूपलक्षणापरकतयैव । तद्यथा –"लक्ष्यमाणा ये गुणा जाड्यादयस्तैरेव यदि योगः शक्यसंबन्धस्तदा गौणी वृत्तिः[3] । इति । गुणलक्ष्यतावच्छेदिका लक्षणा गौणी वृत्तिरिति यावत् । तत्रैवोद्द्योतकारो नागेशोऽपि "लक्ष्यमाणगुणैरित्यस्य ज्ञायमानगुणैरित्यर्थः । यद्गुणज्ञानपूर्वकं वाहीके गोशब्दप्रयोगस्तद्गुणरूपात् संबन्धादिति यावद्" इत्याह ।

लक्ष्यमाणगुणैरित्यस्य ज्ञायमानगुणैरित्यर्थकरणाज् ज्ञायते यद् नागेशोऽपि स्वार्थसहचारिजाड्यादिगुणे लक्षणां नाङ्गीकरोति । एकसंबन्धिदर्शनेनापरसंबन्धिस्मरणमिति स्मारकविधयैव जाड्यादिगुणोपस्थितिं मनुते । अन्ये मुकुलभट्टविश्वनाथाप्पयदीक्षितप्रभृतयः सर्वेऽपि साहित्यिका इमामेव सरणिमवलम्बयाञ्चक्रुः ।

तथा हि—मुकुलभट्टः स्वकीयग्रन्थाभिधावृत्तिमातृकायाम्—"शुद्धोपचारमिश्रत्वाल्लक्षणा द्विविधा मता" इत्युक्त्वा लक्षणाया द्विप्रकारत्वं गौणविषये प्रतिपादितवान्—"उपचारमिश्रा तु यत्र वस्त्वन्तरं वस्त्वन्तर उपचर्यते, यथा 'गौर्वाहीकः' इति । अत्र हि गोशब्दो वाहीकशब्देनानुपपद्यमानसामानाधिकरण्याद् बाधितमुख्यार्थः सन् गोगता ये जाड्यमान्द्यादयो गुणाः, तत्सदृशवाहीकगतजाड्यमान्द्यादिगुणलक्षणाद्वारेण गोगतजाड्यमान्द्यादिगुणसदृशजाड्यमान्द्यादिगुणोपेते वाहीक उपचारितः । तेनेयमुपचारमिश्रा लक्षणा[4]" इति ।

अत्रेदं विवेचनम्—

मुकुलभट्टेन यदुक्तम्—गोत्वसहचारिजाड्यमान्द्यादिगुणा वाहीकेऽपि सन्ति, अतो वाहीकगतजाड्यमान्द्यादिगुणा लक्ष्यन्ते । एवं गोशब्दः स्वार्थनिष्ठगुणसदृशगुणोपेते वाहीक उपचरित इति तन्न रमणीयम्, लक्षणाद्वयापत्तेः । पूर्वं तावद् गोशब्दस्य गोत्वनिष्ठजाड्यमान्द्यादौ लक्षणा, पश्चात् स्वार्थसहचारिगुणा-

---

१. का० प्र० वाम० टी०, पृ० ४८; २. तत्रैव ।
३. काव्यप्रदीपे, पृ० ३३ प्रभाटी० ; ४. अभिधावृत्तिमातृकायाम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भेदेन वाहिकनिष्ठजाडचादौ लक्षणा। लक्षितलक्षणायाश्चानवस्थापातात् साहित्यि-कैर्निराक्रियमाणत्वात्तदभ्युपगमो न रोचतेतराम्।

यच्चुच्यते—'एकसंबन्धिदर्शनेनापरसम्बन्धिस्मरणम्' इति स्मारकविधयैव गोगतजाडचमान्द्यादेरुपस्थितिरिति न लक्षितलक्षणा, तदैकधर्मिबोधकत्वाभावाद् 'गौर्वाहीकः' इति सामानाधिकरण्यानुपपत्तिरूपदोषः। न च जातिशक्ताविवानु-मानसहकृतपदेन व्यक्तिबोधान्नानुपपत्तिरिति वाच्यम्, अन्वयानुपपत्त्या प्रसरन्त्या लक्षणायाः साक्षादन्वययोग्यार्थबोधकतैवोचिता, नो चेद् धर्मिणोऽलक्ष्यत्वे तीरादे-रपि गङ्गापदलक्ष्यतानापत्तिः स्यात्। अत एव मम्मटाचार्येण[1] "स्वार्थसहचारि-गुणाभेदेन परार्थगता गुणा एव लक्ष्यन्ते, न परार्थोऽभिधीयत इत्यन्ये" इत्यस्वरसो-द्भावनपूर्वकम् 'साधारणगुणाश्रयत्वेन परार्थ एव लक्ष्यते" इत्युक्त्वा स्वाभिमतं सूचितम्। साधारणगुणा ये जाडचमान्द्यादयस्तदाश्रयत्वेन वाहीक एव लक्षणा भवतीति तदर्थः।

अप्पय्यदीक्षितेनापि[2] 'मुख्यार्थसम्बन्धेन शब्दस्य प्रतिपादकत्वं लक्षणा' इति लक्षणाया लक्षणं विधाय 'तत्सादृश्येन प्रतिपादकत्वरूपा गौण्यपि लक्षणा-प्रभेद एव' इत्युक्तम्। तत्सदृशेऽपि तन्निरूपितसादृश्याधिकरणत्वरूपपरम्परा-सम्बन्धसत्त्वात्। नहि साक्षात् सम्बन्धे विशिष्टबुद्धियोग्यसम्बन्धे वा सत्येव लक्षणेति नियमः। चक्षुरादेर्घटनैल्यादिषु संयुक्तसमवायादिवद् विशिष्टबुद्धय-योग्यस्य परम्परासम्बन्धस्यापि प्रत्यासत्तित्वोपपत्तेः। व्यतिरेकलक्षणास्थले तन्निरूपितविरोधाधिकरणत्वादिपरम्परासम्बन्धमात्रेण तादृशेन लक्षणाक्लृप्तेश्च। एतेन सादृश्यं न सम्बन्ध इति गौणी लक्षणातो भिन्ना, विशिष्टधीयोग्यस्यैव सम्बन्धत्वात्। संयोगे सति 'दण्डी देवदत्तः' इतिवत् सत्यपि सादृश्ये 'सिंहवान् देवदत्तः' इति विशिष्टबुद्धेरदर्शनादिति निरस्तम्' इति वचनानि गौण्या लक्षणान्त-र्भूतत्वे पर्याप्तानि।

धर्मराजाध्वरीन्द्राणां गुणवृत्त्या लक्षितलक्षणायां यदन्तर्भावपक्षः, सोऽपि न सम्यक्। अनवस्थापाताल्लक्षितलक्षणाया निराकरिष्यमाणत्वात्। तत्र (वेदान्त-परिभाषायां मुक्तावल्यां वा) 'द्विरेफः' इत्यादिस्थले रेफद्वयशक्तस्य भ्रमरपदे लक्षणा। पुनर्भ्रमरपदस्य षट्पदरूपार्थे लक्षणोक्ता। अभिनवगुप्तेन त्वेवं व्याख्यातम्—'अभिधेयेन संयोगात्, द्विरेफशब्दस्य हि योऽभिधेयो भ्रमरशब्दः द्वौ रेफौ यस्येति कृत्वा तेन भ्रमरशब्देन यस्य संयोगः सम्बन्धः षट्पदलक्षणस्यार्थस्य, सोऽर्थो द्विरेफशब्देन लक्ष्यते, अभिधेयसम्बन्धं निमित्तीकृत्य" इति[3]। अप्पय्य-

१. काव्यप्रकाशद्वितीयोल्लासे; २. वृत्तिवार्तिके।
३. ध्व० लो० प्रकाशटी० पृ० १६०।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दीक्षितेनाप्ययमेव पक्षः स्वीकृतः[1]। इयं गुणवृत्तिर्नाभिधारूपा; यतो हि मुख्यार्थ एवाभिधायाः प्रवृत्तिर्नामुख्येऽर्थे।

अयम्भावः–साक्षात्संकेतितार्थविषयव्यापारोऽभिधेति तल्लक्षणादव्यवहितोऽव्यवधानेन गृहीतः सङ्केतो यस्मिन्नर्थे तत्रैवाभिधास्ति। यत्र तु व्यवहितसंकेतोऽस्ति, तत्र तद्बाधेनोत्थानाद् गुणवृत्तिः। अमुख्येऽर्थेऽमुख्यतया सङ्केतो भवतीति प्रतिपादितं लोचनकारैः -"तेनाभिधैव मुख्येऽर्थे बाधकेन प्रविवित्सुर्निरुध्यमाना सती तावदचरितार्थत्वादन्यत्र प्रसरति। अत एवामुख्योऽस्यायमर्थं इति व्यवहारः, तथैव चामुख्यतया सङ्केतग्रहणमपि तत्रास्तीत्यभिधापुच्छभूतैव लक्षणा। यतोऽभिधापुच्छभूतैव लक्षणा, ततो हेतोर्वाचकत्वमभिधाव्यापारमाश्रिता तद्बाधेनोत्थात्तत्पुच्छभूतत्वाच्च गुणवृत्तिः। गौणलाक्षणिकप्रकार इत्यर्थः" इति।

नापि व्यञ्जनारूपा, भिन्नविषयत्वाद् रूपभेदाच्च। व्यञ्जनाया रसादयोऽलङ्कारविशेषा व्यङ्ग्यरूपावच्छिन्नं वस्तु च व्यङ्ग्यस्य वस्त्वलङ्काररसादिभेदेन त्रैविध्याद् विषयत्रैविध्यम्। तत्र मुख्यार्थबाधादिगुणवृत्तिसामग्रीणामभावाद् रसादिप्रतीतिरेत्र गुणवृत्तिरिति न वक्तुं शक्यम्। तथैव वस्त्वलङ्काररूपव्यङ्ग्ये न गुणवृत्तियुक्ता। व्यङ्ग्यत्वं नाम वस्तुचारुत्वप्रतीतये स्वशब्दानभिधेयत्वेन प्रतिपाद्यत्वम्। तच्च सर्वं न गुणवृत्तेर्विषयः, यतो हि प्रयोजनमन्तरेणापि प्रसिद्धितोऽपि गौणशब्दप्रयोगो दृश्यते। यथा चोक्तम्—

रूढा ये विषयेऽन्यत्र शब्दाः स्वविषयादपि।
लावण्याद्याः प्रयुक्तास्ते न भवन्ति पदं ध्वनेः[2] ॥ इति ॥

अत्र लावण्याद्याः शब्दाः स्वविषयाल्लवणरसयुक्त्यादेः स्वार्थादन्यत्र हृद्यत्वादौ रूढा दृश्यन्ते। तत्र प्रयोजनानुद्देशेन लक्षणायाः प्रवृत्तत्वान्न तद्विषयध्वननव्यापारः। एतत् सर्वमुक्तं लोचने।[3] रूपभेदस्तु गुणवृत्तिव्यञ्जनयोरमुख्यव्यापारत्वाद् भवति। यतो हि गुणवृत्तिरमुख्यतया व्यापारः, व्यञ्जना तु मुख्यतयैव शब्दस्य व्यापारः। अपि च गुणवृत्तिरमुख्योऽभिधाव्यापार एवोच्यते, व्यञ्जना तु अभिधाया अत्यन्तभेदवती, वाच्यव्यङ्ग्ययोर्भेदादेव। यथा चोक्तं तयोर्भिन्नत्वं दर्पणे—"बोद्धृस्वरूपसंख्यानिमित्तकार्यप्रतीतिकालानाम् आश्रयविषयादीनां भेदाद्भिन्नोऽभिधेयतो व्यङ्ग्यः" इति।

व्यञ्जना न गुणवृत्तिः, यतो हि विवक्षितान्यपरवाच्यध्वनौ गुणवृत्तित्वं

---

१. वृत्तिवार्तिके, अत्र द्विरेफशब्दस्य द्वौ रेफौ विद्येते यस्येति व्युत्पत्त्या भ्रमरशब्दवृत्तेस्तद्वाच्ये रूढिलक्षणा' इत्यादिना।

२. ध्व० प्र० उ०, का० १६;

३. तत्रैव।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नास्ति। वाच्यवाचकपूर्विका यत्रार्थान्तरप्रतिपत्तिस्तत्र गुणवृत्तिव्यवहाराभावात्। अविवक्षितवाच्यध्वनिप्रभेद एव गुणवृत्तिता दृश्यते। तत्रापि न गुणवृत्तिरूपता। यतो हि सा व्यञ्जकत्व-(व्यञ्जना) शून्यापि दृश्यते। व्यञ्जना तु चमत्कृति-जनकव्यङ्ग्यं विना न सम्भवति। गुणवृत्तिस्तु तादृशव्यङ्ग्यप्रतीतिं विनापि सम्भवति 'अग्निर्माणवकः' इत्यत्र 'मञ्चाः क्रोशन्ति' इत्यत्र च। यत्र तु तादृश-व्यङ्ग्यप्रतीतिमनुरुन्धानैव गुणवृत्तिस्तत्रापि व्यञ्जकत्वानुप्रवेशेनैव। एवं व्यञ्ज-नाव्यापारसम्पत्तये क्षणमात्रमवलम्बितायामपि गुणवृत्तौ व्यञ्जनाव्यापार एव प्रधानभूतो नारोपव्यवहारः।

ननु प्रयोजनसंप्रतिपत्तावपि न व्यञ्जनाव्यापारः, गुणवृत्तिरूपारोपव्यापारेणैव तदर्थलाभादिति चेत्, न; गुणवृत्तिसामग्रीणामभावात्। यथा चोक्तम्—

मुख्यावृत्तिं परित्यज्य गुणवृत्त्याऽर्थदर्शनम्।
यदुद्दिश्य फलं तत्र शब्दो नैव स्खलद्गतिः[१]॥ इति।

अर्थादभिधाव्यापारं परिसमाप्य लक्षणारूपगुणवृत्त्याऽमुख्यस्यार्थस्य प्रत्यायना यत्प्रयोजनमुद्दिश्य क्रियते, तत्र न लक्षणाव्यापारः, मुख्यार्थबाधाद्यभावात्। न च प्रयोजनमवगमयतः शब्दस्य बाधकयोगः। सत्यपि बाधके तत्रापि प्रयोजना-न्तरस्यान्वेषणेनानवस्थापातात्। यथा चोक्तं प्रकाशे—

"एवमप्यनवस्था स्याद् या मूलक्षयकारिणी[२]"॥ इति।

एतत् सर्वमभिप्रेत्योक्तं लोचनकारेण—'यद्व्यापारान्तरमभिधालक्षणातिरिक्तं स ध्वननव्यापार इति'[३]।

उपसंहारः—

इत्थमभिधाव्यञ्जनाभ्यामन्यैव गुणवृत्तिः प्रसिद्धा। सा च लक्षणया न पृथग्भूता। अत एवानन्दवर्धनाचार्यस्तां गौणशुद्धरूपलक्षणासामान्ये प्रयुङ्क्ते। अभिनवगुप्तपादाचार्या अपि 'गुणाः सामीप्यादयो धर्मास्तैक्ष्ण्यादयश्चेति गुण-पदेन लक्षणागुणवृत्त्योरुभयोरपि निमित्तं संगृह्य लक्षणासामान्यरूपेणैव तां स्वीचक्रुः। तात्पर्याख्यवृत्तेः पदार्थानामन्वय एवोपक्षीणत्वात् तृतीयकक्ष्यानिवेशि-गुणवृत्तेर्भिन्नत्वमेव स्पष्टत्वान्नोक्तमित्यलम्।

●

१. ध्व० प्र० उ० का० १७; २. काव्यप्रकाशद्वितीयोल्लासे।
३. लो० प्रकाशटी०, पृ० १५९।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

धर्मसमुच्चयोक्तो

धर्मस्य प्रायोगिकः पक्षः

डॉ० विजयशंकरचौबे

प्राध्यापकः, धर्मदर्शनविभागे

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य, वाराणसी

❀ ❀ ❀

भगवान् मनुः धर्मस्य लक्षणमाह—

वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम् ॥

धारणाद् धर्म इत्याहुः। इदं च कालत्रयेऽप्यबाधं वचः। तत्र वास्तविको धर्मः सर्वकालेषु सर्वदेशेषु च समानः। 'धृतिः क्षमा दमोऽस्तेयं सत्यम्' इत्यादिरूपो धर्मो वास्तविको धर्मोऽस्ति। बौद्धधर्मस्य धर्मसमुच्चयनामके ग्रन्थेऽपि सदाचारस्य विधिवद् वर्णनमस्ति। तद्यथा–सर्वतः प्रथमं मोक्षस्य षड् आयतनान्युक्तानि। तानि यथा – सत्कर्मस्वप्रमादः, गुरौ शास्त्रे च श्रद्धा, कुशलकर्मणि वीर्यारम्भः, धैर्यम्, ज्ञानाभ्यासः, सत्सङ्गश्चेति। ततो दानशीलादयः शान्तिसम्प्राप्तिहेतव उक्ताः। चापल्य-पापसंश्लेषादिकानि नरकगामीनि प्रयोजनान्युक्तानि। प्रसङ्गप्राप्तानि प्रेतेषु तिर्यक्षु च उद्भवसाधकानि कारणान्युक्तानि। एवं देशकालविधिज्ञस्य साध्यासाध्ये च जानतः शक्योपायविधानतत्परस्यैव कार्यं सिद्ध्यति। तद्यथा—

अक्रोधेन हतः क्रोधः क्षमया क्रूरता जिता।
धर्मेण निर्जितोऽधर्मः प्रभया विजितं तमः ॥ (धर्मसमु० १।१९)

एवं स्वगुणोत्कर्षमाहात्म्येन बुद्धेन भगवता सर्वे कुटिलवादिनस्तीर्थ्या जिताः, यथा सुरैरसुरा जिता आसन्निति।

सद्धर्मश्रवणं कृत्वा वृद्धांश्चोपास्य पण्डितो जनोऽन्ते जरामरणवर्जितं पदं प्राप्नोति। तद्यथा—

श्रुतिदृष्टिविनिर्मुक्तम् अर्थमाहुर्विचक्षणाः।
न चक्षुर्भ्यां विनिर्मुक्तम् अर्थमित्यभिधीयते ॥ (धर्मसमु० २।३०)

धर्मानुसारिणी श्रद्धा चास्थेयेत्यन्ते श्रद्धामाहात्म्यं तेनोक्तम्। इयं श्रद्धा तमसि प्रदीपकल्पा, व्याधितानामौषधमिव, अर्थानां ज्ञानदात्री दरिद्राणां अकिञ्चनानां च महद् बलमिति। किमधिकम्, प्रमादमत्तानां सा प्रमादविघातिका।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एतादृशस्य श्रद्धालोर्गुरुभक्तस्य धर्मे प्रमादरतस्य च माहात्म्यं दरीदृश्यते। तद्यथा—

स हि यत्तत् पदं शान्तं निर्वाणमुनिभिर्वृतम्।
तत् प्रापयत्यखेदेन सम्यग्ज्ञानपुरःसरम्[1] ॥ इति।

वस्तुत इदं शरीरं प्राप्य मानवेन ज्ञानप्लवमारुह्य भवसागरस्तरणीयः, यतो हीदं शरीरं विद्युदलातसदृशं क्षणभङ्गुरं चपलं जरामरणयुतं च। अतो मानवेन ज्ञानशीलदयादानैरेतच्छरीरं सफलं करणीयम्। यो हि शरीरधातुं परित्यज्य हिरण्यादिधातुषु रक्तो भवति, स धातूनां ज्ञानेऽज्ञ एव। हिरण्यादि-धातवो दुःखावृत्ता एवेति दुःखाद् दुःखोदय एव भवति, तस्मादनर्थकं तद् दूरतः परिवर्जयेत्। यतो हि तेषां स्वलक्षणं ज्ञात्वैव प्राणिनो निर्वाणं प्राप्नुवन्ति। पण्डितेनैकान्तमनसा नित्यं शुभं कार्यं प्रयत्नतः, अशुभं च सदा वर्ज्यम्। यथा गृहपञ्जरे शूलिकेन बद्धाः पशव एकैकशो विनश्यन्ति, एवमियं भूमिः कामिनां नश्वरसुखायैवास्ति, ते हि बालिशाश्च्युता उपपन्नाश्च भवन्ति बारम्बारम्। ते च विषयोन्मुखा अवश्यम्भावि मरणमपि न पश्यन्ति। अन्ते च तेषां तादृशानां कामवशङ्गतानां पश्चात्तापेन दाह एवावशिष्यते, यतो हि संयोगो विप्रयोगान्त एव भवति। अतो विवेकिना मरणं सञ्चिन्त्य कर्त्तव्यं निर्धारणीयम्। यतो हि निष्कामा वीतरागा एव शाश्वतीं शान्तिमधिगच्छन्ति। मृत्योरर्थमनुसृत्य स्वकीयं मनो निर्दुष्टं शान्तं च करणीयमप्रमादपरम्। सुखमोहिता एवेमं लोकमजरामरणवत् पश्यति। तृष्णावशात् सुखस्य पतनान्तत्वं च नावगच्छन्ति। त्रैधातुकमिदं जगत् कालपाशयोजितमस्ति; परन्तु तृष्णाविमुग्धा लोकास्तं न पश्यन्ति। प्रमादमद-मोहिताः सुरा अपि नाशमाप्नुवन्ति। यतः पतनान्ता हि विभूतयो भवन्ति गन्धर्व-नगरोपमाः फेनबुद्बुदसन्निभाश्च। सर्वस्यापि सुखस्य कालवशात् संयोगोऽपि विनाशमाप्स्यति। तथा च—

जातिदुःखा जरादुःखा मरणं दुःखमेव च।
प्रियैश्च सह विश्लेषो दुःखस्यैषा परम्परा॥ (धर्मसमु० ।८७)

सद्धर्माचरणं भूतेषु करुणा च श्रेयसे जायते। मृत्युकाले संप्राप्ते दुःखानि दृढानि भवन्तीति श्रेयोऽर्थिभिः प्रमादरहितैर्भाव्यम्। सन्तोष एव च निर्वाण-साधनम्, सर्वकामविरागश्च श्रेयः साधनम्। अनागतविधिज्ञो निर्बन्धो भवति। अप्रमादरतो निर्वाणस्यान्तिके स्थितः। प्रमादास्तु सर्वेषां पश्वादीनामपि समान इति मोक्षचर्यामूलं धर्माचरणं विधेयम्, यतो हि प्रमादशून्या धर्मरता एव जना देवत्वं प्राप्नुवन्ति। तद्यथा—

---

१. धर्मसमु० २।३१।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रमादः परमं दुःखमप्रमादः परं सुखम् ।
समासाल्लक्षणं प्रोक्तमप्रमादप्रमादयोः ।। (धर्मसमु० ६।१९।)

आध्यात्मिकसुखापेक्षया कामजं सुखं सर्वथा हीनम् । तथा चोक्तम्—

यच्च कामसुखं लोके यच्च तृष्णोद्भवं सुखम् ।
एकस्याध्यात्मिकस्येदं कलां नार्हति षोडशीम् ।। (धर्मसमु० ७।९३)

तृष्णावशानुगा जना विविधा योनिर्लभन्ते । परिकाङ्क्षिणो नित्यं दुःखभाजो भवन्ति । लोभाभिभूतस्य विनिपातः पदे पदे । धनतृष्णारता आजीवनं धनोपार्जनतत्परा जीवन्ति । ते मृत्युकाले विवशा एव धनं त्यजन्ति । अतः प्राज्ञो लोभममित्रमपि मित्ररूपेण वर्तमानं परित्यजेत् । यतो हि तृष्णाशयविमुक्तिरेव जनानां श्रेयस्करी । आकाङ्क्षाशून्यतैव कल्याणकरी । अमुग्धा एव यतिजीवनस्य महत्त्वमवगच्छन्ति । तृष्णया विरहिताः शुभाशुभपरित्यागिनश्चैवान्ते जरामरणरहिता भवन्ति । अतो ज्ञानेन तृष्णावृक्षस्य च्छेदनं कर्त्तव्यम् । तथा चोक्तम्—

तृष्णानदीं त्रिपथगां प्रमादावर्तदुस्तराम् ।
प्रज्ञानावं समाश्रित्य पारं गच्छत्यनामयम् ।। (धर्मसमु० १।९७)

महेच्छतैव जनहृदयव्रणभूता । अल्पेच्छता च सुखम् । अत एवोक्तम्—

हेया तृष्णा प्रयत्नेन इदमुक्तं परीक्षकैः ।
एष पन्थाः शिवः श्रेष्ठो येन तृष्णा वशीकृता ।। (धर्मसमु० ८।१०४)

स्त्रीमयं बन्धनम् अप्रमाणमनभिज्ञेयं च भवति । अनेनापातरम्येण पाशेन बद्धाः पुरुषा भवार्णवान्न मुच्यन्ते । भ्रान्तवचनैर्विभ्रान्तं भूषणानां स्वनैः वञ्चनाकुशलाः स्त्रियः पुरुषं क्षिप्रं हरन्ति । अर्थादानेषु कुशलास्ता एकं नरं वञ्चयित्वाऽन्यं नरं प्रयान्ति । इमा उपायशतैरपि न शक्या रक्षितुं नरैः । नार्योऽनर्थव्याधिमृत्यूनां दुष्कृतानां कर्मणां च परं हेतुभूताः सन्ति ।

सर्वं सुखं दुःखं वा चित्तपरिणाम एव । चित्तस्य कर्मण्येव संसारः, यतो हि चित्ताधीनः पापमाप्नोति, पापेन च संसारः। अतः केनापि चित्तवशगेन न भवितव्यम्, अपि तु धर्मवशगेन भवितव्यम् । यतो हि—

धर्मचारी सुखी नित्यं पापचारी न शर्मभाक् ।
तृष्णया मोहिताः सत्त्वाः चित्तस्य वशमागताः ।। इति ।

भित्तिचित्रवत् चित्त एव शोभनाशोभनकर्माणि विद्यन्ते । चित्ताधीनानि कर्माण्यतश्चित्तं दान्तं कुर्यात् । यतो हि चित्तस्य दमनं सुखावहम् । सर्वं दुःखं चित्तस्य लघुचेष्टितम् । अन्यथा बालिशानां चित्तं दुर्गतिं प्रति धावति । व्यसनेषु च नरं पातयति । उक्तञ्चापि—

विजयं चपलं तीव्रमविषह्यं महाबलम् ।
यैश्चित्तं निर्जितं धीरैस्ते लोके सुखिनो मताः ।। (धर्मसमु०; ११।१०७)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सत्यवादी सदा इन्द्रियनिग्रही भूत्वा देवताभिः पुरस्कृतो भवति, लोकस्य च प्रियो भवति, अन्ते च देवैः सह देवलोकेषु मोदते। मृषावाक् च सद्भूतगुणनाशिकाऽस्ति[1]।

इह लोके कृतं यत् किमपि शुभाशुभं कर्म प्राणिनं परलोके गच्छन्तमनुगच्छति। तथा च प्राणी सुकृतैः देवलोकान्, दुष्कृतैश्च नरकान् प्रति गच्छति। अशुभकर्मफलजं कटुकोदयं दुःखं भवति। सर्वमपि कर्महेतुप्रत्ययसमुत्थं भवति। त्रिविधं कर्म भवति—शुभफलदम्, अशुभफलदम्, जलताडनवन्निरर्थकं च। त्रिविधस्याप्यस्य कर्मणः फलं तत्कर्त्रैव भुज्यते, नान्येन। येनं सुखोदयं दुःखास्वादं दुश्चरितं कृतं तेनैव कर्मवायुना तथा प्रेरितो लोके चरति। मनसा वञ्चिता विप्रमोहिताश्च सत्त्वा दुष्कर्म कृत्वा तमस्तमःपरायणा भवन्ति। तमसावृते हि संसारे चरतो बुद्धशासनं दुर्लभम्। अथ च येभ्यो धर्मो न रोचते, ते दुःखाद्दुःखतरं यान्ति। तथा च—

> अनादिमति संसारे कर्मजालप्रवृताः प्रजाः।
> जायते म्रियते चैव स्वकर्मफलहेतुना॥ (धर्मसमु०, १३।१८)

पापस्याल्पतापि नरकदायिका भवतीत्यल्पमपि पापं न करणीयम्। अल्पो वह्निरत्र दृष्टान्तः। पापचारी पुरुषो न क्वचित् सुखमेधते। पापस्य वेदना कष्टप्रदा भवति। शस्त्राग्निप्रयोगेभ्यो यादृशं दुःखं भवति, ततोऽप्यधिकं पापाचरणेन भवतीति दुःखहान्यै पापानि नाचरणीयानि। अथ च—

> विनिर्वर्जितपापस्य नित्यं च शुभचेतसः।
> देहिनः शान्तवक्त्रस्य निर्वाणं नातिदूरतः॥

ज्ञानी च अनागताद् दुःखान्न बिभेति। अपापभीरुता तस्मात् कर्त्तव्या सुखमिच्छता[2]।

परेषां सम्पदं दृष्ट्वा 'मम स्यात्' इति यश्चिन्तयेत्, तस्य मिथ्यासमुत्थस्य विषस्य नरकरूपमेव फलं प्राप्यते। अधर्मो धर्मरूपेण यदि कथ्यते, तर्हि तस्यापि फलं नरक एव। धर्मं वर्जयित्वा साधूंश्च विनिन्द्य यदुपार्जितम्, तस्यापि विपाको नरकपात एव। उक्तञ्च—

> आर्यापवादका ये च ये च कर्मफलद्विषः।
> ते मृत्वा नरकं यान्ति ये च मिथ्याविनीतकाः॥ (धर्मसमु०, १६।१३१)

---

१. जिह्वासंग्रथितैः पाशैर्नरकस्याग्रहेतुकैः।
छेत्ता च धर्महेतूनां मृषावादः प्रवर्तते॥ इति। (धर्मसमु०, १२।६२)

२. सत्यं दानं तथा क्षान्तिः सदा चापापमित्रता।
मैत्री सदाभिभूतेषु प्रस्थानं त्रिदिवस्य हि॥ (धर्मसमु०, १५।७४)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तस्मात् साधुमतिः पुमान्—

नावद्येषु च कार्येषु मतिं कुर्यात् कथञ्चन ।
हीनान्यवद्यकार्याणि नरके पातयन्ति च ।। (धर्मसमु०, १६।१३४)

इह लोकेऽशुभानि कर्माणि कृत्वा मनुष्यः प्रेतलोकमेव गच्छति, न तु स्वर्गमिति भावः[1] ।

शुभकारकाः पुरुषा देवयोनावुत्पद्यन्ते, शुभाशुभमिश्रकर्मकारकाश्च मनुष्ययोनावुत्पद्यन्ते। अशुभकर्मकारकाश्च प्रेतयोनौ तिर्यग्योनौ वोत्पद्यन्त इति। जगति प्रायशो त्रैधातुकं क्षुधामयं दुःखं भवति। अशुभकर्मकारिणो जनास्तत्फलभूताद् वित्ताभावाद् अन्यकारणाद् वा बुभुक्षिताः सन्तो दुःखिता भवन्तीत्याकूतम्। एष हि बुभुक्षादोषो द्रुमान् कल्पानल इव लोकान् दहति। अथाप्येवं वक्तव्यम्—नानलस्य तद्वीर्यम्, यादृशं क्षुधाया इति[2] ।

दया-कृपा-करुणेत्यनर्थान्तरं कोशप्रसिद्धम्। सर्वेषु भूतेषु करुणा मातेव हितकारिणी भवति, पुरुषा यां समाश्रित्योत्तमं सुखं प्राप्नुवन्ति। देवा अप्येतादृशं दयावन्तं सदावृत्तं सर्वभूतहिते रतं जनं प्रणमन्ति। अतः सुखार्थिना करुणाभावना सेवितव्या। एतदेव प्रशंसति ग्रन्थकारः—

मृद्वाशया हि ये मर्त्याः साधुवत् काञ्चनोपमाः ।
कारुण्यमक्षयं येषां सदा मनसि वर्तते ।।
ते च सत्त्वाः सदोद्युक्ता नित्यं धर्मपरायणाः ।
येषां कारुण्यदीपेन हृदयं सम्प्रकाशितम् ।। (धर्मसमु०, २१।९-१०)

दानी भवार्णवं तरति। दानं सुखानुगन्ता मार्गः, यतो हि दानेन शीले ज्ञाने च मतिर्भवति। अतः शीलरक्षायै ज्ञानप्राप्त्यै तृष्णानाशाय च साधकेन रतिः कार्या[3]। शीलं संसारोत्तरणाय प्लवभूतः। शीलाचरणस्य परिणामो निर्वाणसुखम्; परन्तु यः कश्चित् स्वर्गाकाङ्क्षयैव शीलमाचरति, तर्हि तस्य तृष्णाक्षयो न भवति, तेन निर्वाणं ततो दूरमेव स्यात्। अतो भौतिकसुखं प्रतिनिरपेक्षेण निर्वाणाकाङ्क्षयैव शीलमाचरणीयम्। क्षान्तिः क्षमा तितिक्षा चेत्यनर्थान्तरम्। तितिक्षाऽपि निर्वाणगामिनोऽत्यावश्यकी साधना। तदेव विवृणोति—

१. अत्र यत् कुकृतं दग्धा. प्रेतलोकेष्ववास्थिताः ।
क्षुत्पिपासामये नेह वह्निना परिदीपिताः ।। (धर्मसमु०, १७।५)

२. मोहयेद् विविधाश्चिन्ता लोके मनुजसंभवाः ।
ताः सर्वा भोजनार्थाय भवन्ति त्रिभवार्णवे ।। (धर्मसमु०, १९।५)

३. शीलवानपि कालज्ञोऽज्ञानाद्वा परिमुच्यते ।
दुःखनैर्याणिको मार्गः शस्तोऽयं मुनिपुङ्गवैः ।। (धर्मसमु०, २२।२५)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

क्षमावान् पुरुषः सर्वप्रियो भवति देहिनाम् ।
पूज्यते दैवतैर्नित्यं तस्मात् क्षान्तिः परं तपः ।। (धर्मसमु०, २३।८२)

क्षमा हि परमं तप इति भावः । क्षान्त्या यथा भूषितो भवति पुमान्, तथा नेतरैर्धनैरिति क्षान्तिधनं सर्वधनप्रधानम् ।

न्यायदेशक्रियाहीना अधर्मेण विवर्जिताः । वीर्येण परिवर्जिताः पुरुषस्य कार्यनिकराः सीदन्ति । आरब्धवीर्यश्च निर्वाणरूपं भवजालमोक्षमधिगच्छन्ति । वीर्यवान् पुरुषो यानि कार्याण्यारभते, तानि समृद्धानि भवन्ति, पूर्णानि च । लोकसम्मता लोकोत्तराश्चार्था वीर्येणैव साधयितुं शक्यन्ते; परन्तु[1] स एव नरो यदि वीर्यधनो महोत्साहश्च भूत्वार्याष्टाङ्गमार्गेण ज्ञानं परिपालयति, सोऽन्ते परमां गतिं प्राप्नोति । अत उत्तमस्थानप्राप्त्यर्थं वीर्यारम्भे मतिः कार्या साधकेन । अत एवोक्तम्—

वीर्यार्थे यः स्मृतिमांश्च नरो ज्ञानपरायणः ।
प्रयात्युच्चतमं स्थानं जरामरणवर्जितम् ।। (धर्मसमु०, २५।१०)

ध्यानजं समाधिजं च चित्तम् एकाग्रता—सुखं लभते । एकान्तमनसा संक्षिप्तेन्द्रियश्च पुरुषो दोषनिचयविनिर्मुक्तो भवति । बुधो हि ज्ञानाम्भसा तृष्णाग्निनातिवृद्धं दोषजालं हन्ति । ध्यानं निर्वाणपुरगामी श्रेष्ठो मार्गः । अतो योगी मनोनिगृह्यैव ध्यानजं सुखं लब्धुं शक्नोति । तदेव कथयति—

निर्विषस्य च तुष्टस्य निरामयस्य नियामतः ।
यत् सुखं ध्यानजं होति कुतस्तस्योपमा स्मृता ।।
एतत्सारं सुधीराणां योगिनां पारगामिनाम् ।
यदेवेदं मनः श्रुत्वा प्रयान्ति पदमच्युतम् ।। (धर्मसमु० २६।१२-१३)

समाधिना प्रज्ञां लब्ध्वा भवसागरं तरति ज्ञानी । ज्ञानं च (प्रज्ञा) दानशीलतपोध्यानं श्रेष्ठमुच्यते । महायाने प्रसिद्धेष्वष्टसु मार्गेषु प्रज्ञा (सम्यग्ज्ञानम्) मोक्षप्रदा श्रेष्ठोऽष्टमो मार्ग उक्तः । सत्यचतुष्टये दुःखनिरोधो दुःखनिरोधगामिनी प्रतिपच्चेति द्वे सत्ये उत्तरे स्तः । सर्वापि जन्मपद्धतिः सर्वोऽपि दोषनिवहश्च ज्ञानशास्त्रेण छेत्तुं शक्यः । नास्ति लोके ज्ञानात् परः सहायवान् बन्धुभूतः । अतो ज्ञानशीलयुता वीतरागा गतस्पृहा वृद्धास्तत्त्वमार्गनिदर्शकाः सदैव सेव्याः[2] । आर्यसत्यचतुष्टयस्थो विधिज्ञो रागद्वेषमोहापहारकश्चेन्द्रियनिग्रही जनोऽवश्यं निर्वाणमधिगच्छति । सुखदुःखमयैर्बन्धनैर्यो न बद्धो भवति, स दोषभयनिर्मुक्तो भूत्वा निर्वाणगामी भवति । तथा चोक्तम् —

१. मन्दवीर्यश्चिरोत्साहं सद्धर्मेण विवर्जितम् ।
नरं प्रविशते लोके शशाङ्कमिव कल्मषम् ।। (धर्मसमु० २५।६)

२. प्रज्ञावज्रेण तीक्ष्णेन महादयबलेन च ।
महायोगरथारूढः क्लेशादीन् प्रविदारयेत् ।। (धर्मसमु० २७।११)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पुरुषोऽपायभीरुश्च प्रमादबलवर्जकः ।
शुभकारी शुभान्वेषी निर्वाणमधिगच्छति ।। (धर्मसमु० २९।१)

एतदार्यमार्गचतुष्टयम् अन्योऽन्यफलसम्भूतमस्ति । यो हीदमार्यचतुष्टयं न जानाति, स विषयेषु संघुष्टो जगति चक्रवद् भ्रमति । अयं सत्यचतुष्टयमार्गो निर्वाणस्य प्रापयिता, अत एव शिवः पन्थाः । अनेनैव मार्गेण प्राचीना मनीषिण उदयं याताः । तस्यैव जीवनं श्रेष्ठम्, यस्य बुद्धोपदिष्टे मार्गे मनस्तिष्ठति । बुद्धोपदिष्टं मार्गं विहाय यातुः पुरुषस्य जीवनं न श्रेष्ठम् । एवमेव सङ्घं कल्याणमित्रं मन्यमानस्यैव जीवनं सुखं जीवनम् । अर्थात् त्रिशरणगन्तैव, सत्यमार्गानुयायी चैव प्रशस्तं जीवनं जीवति । अत एवोक्तम्—

निर्वाणगमने यस्य नित्यं बुद्धिरवस्थिता ।
स दोषेभ्यो विनिर्मुक्तो देवलोके महीयते ।।
सुखादीनीह सत्यानि यदा दान्तेन विन्दति ।
तदा क्षेमं शिवं स्थानं प्राप्नोति पुरुषोत्तमः ।। (धर्मसमु० २९।२१-२३)

भिक्षोर्गुणानां माहात्म्यं प्रोच्यते—यो भिक्षुर्दर्शनतत्त्वविद् दोषान् प्रहाय रूपादिस्कन्धतत्त्वज्ञो भूत्वा सततं मोक्षाय यतते, यश्च धर्मावबोधाभिरतो ध्यानारामविहारवान्, मैत्र्यारामः सततं धर्मगोचर उद्युक्तो भवति, तादृशो भिक्षुर्लोके प्रशस्यते । सर्वभूतरतो दृढः शान्तः सर्वसङ्गविवर्जितः कनकवन्निर्मलः सर्वबन्धननिर्मुक्तश्च सन्तुष्टो भिक्षुः सर्वत्र प्रशस्तो भवति । वनारण्यविहारेषु श्मशाने तृणसंस्तरे च यस्य समानं चित्तम्, हतकिल्बिषकान्तारः, जितेन्द्रियः पुनर्भवविधिज्ञो शान्तमना भिक्षुर्लोके प्रशस्यते । तद्यथा—

न परार्थं न लोभार्थं यशोऽर्थं कुरुते न तु ।
सङ्घकार्ये मतिर्यस्य स मुक्तः सर्वबन्धनैः ।। (धर्मसमु०, ३०।८८)

पुण्यं हि शुभकर्मणां शुभं फलं कथ्यते । पुण्यं कृत्वैव मानवा देवा भूत्वा देवलोकेषु सुखेन मोदन्ते । इहापि च ते यावज्जीवं सुखेनैव विहरन्ति तत्प्रभाप्रभावेण । पुण्येन लोकत्रयहितकरो भवति जनः । पुण्यं हि छायावदनुगामिकं पुरुषस्य । ये तु नित्यं कुगतिगन्तारो दुर्दान्ताः सन्ति, कुतस्तेषां सुखं दृष्टम् ? यस्य चात्मा प्रियो यश्च सौख्यमभिवाञ्छति, स वेदलोकोपपत्तये पुण्यं करोतु । पुण्यैर्विना न हि कोऽपि भवति समीहितार्थः । यथा यादृशं शुभं कर्म क्रियते, तथा तादृशमेव तस्य पुण्यं लभ्यते । अतः पुण्यलाभाय धर्माचरणमत्यावश्यकम् ।

सर्वं लौकिकं सुखं धूममिश्रं काष्ठमिव, विष्ठामिश्रितमोदनमिति वा जानीयात् । वास्तविकं सुख तु वितृष्णानामेकान्तसुखचारिणां निर्मोहिणामरागाणां चैव भवति, तदात्यन्तिकसुखं श्रयो यत्र मृत्युर्न विद्यते । यत्तु कामजन्यं कामजनकं वा सुखं न तत् सतां सम्मतम् । भिक्षूणां वन एकान्तवास एव

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सुखावहः। विपरीतं रागचारिणां चित्तं वने न रमते। अतो यैर्मनसा नित्यं ध्याननियोगः कृतस्तेषां कृते वनमेव रम्यम्, न तु रागगवेषिणां कृते[1]। ज्ञानशील-निर्मुक्ता जनाः पण्डिता अपि कुशलं न प्राप्नुवन्ति। ज्ञानवन्तः शीलवन्त एवा-ग्रिमजन्मनि महति कुल उत्पद्यन्ते। दानशीलतपोध्यानैर्युताः सत्यैश्वर्यपराक्रमिण एव पुरुषाः कुलीना भवन्ति। कुलीनान्येव मित्राणि कुर्यादिति वर्गं संक्षिपति। तद्यथा —

नैश्वर्यज्ञानहीनस्य न कुलं नापि सङ्गतिः।
तस्मात् कुलं ज्ञानमयं ज्ञानहीनं न तत् कुलम्॥ (धर्मसमु० ३४।२१)

राज्ञोऽपवादो राजापवाद इति पदार्थः। अस्मिन् कुशलस्य राज्ञो गुणान् बोधयति। धार्मिको राजा प्रजायै श्रेयस्करो भवति[2]। गुणी राजैव देवानामधिपो भवति। अत एभिर्गुणै राजा पूजितो भवति—क्षमा, प्रियवचनम्, क्रोधहर्षादि-निगृहीतः। एतादृश एव राजा महीं पालयितुं शक्नोति, देवलोकाय च कल्पते। यो न स्त्रीणां वशगः साधूनां च वशीभूय प्रजाः पालयति, सोऽमृतः, तत्त्वदर्शी च राजा नावमेवाधिरोहति। यो हि निन्दामलविनिर्मुक्तः सङ्गदोषेण च विवर्जि-तोऽस्ति, स ज्ञानी राजैव देवलोकेषु पूज्यते। स मन्त्रिभिः संमित्रैश्च परिवारित एव देवानामधिपो भवति। अथ च यः सुनिश्चितं चिन्तयति, यश्च धर्मेषु वर्तते, स तेन दृष्टेन धर्मोदयेन त्रिविष्टपे मोदते। धर्मेण प्रजापालक एव राजा स्वर्गसुखं लब्धुं शक्नोति। किमधिकम्, सत्कर्मनिरतस्य भृत्योऽपि लोके महीयत आकाशे शरच्चन्द्र इवेति।

इत्थं प्रकारेणास्मिन् ग्रन्थे मोहान्धकारनिवारको विद्वेषरहितलोके संप्रथितो विराजते। अत एतदनुकूलमाचरणं कर्त्तव्यमिति परमोपदेशः। अत्र च पूर्ववर्तिना सर्वेषां बौद्धाचार्याणां तदनुकूलानाञ्च ब्राह्मणधर्माणां सारांशः संगृहीतः, कर्त्तव्य-त्वेन च सन्निर्दिष्टः, अत्र न सम्प्रदायाग्रहो न वा काचिद् धर्मविशेष आसक्तिः। उदारश्च विचारोऽत्र संग्रथितो विराजते। नूनमेष ग्रन्थः सकलजनहिताय सकल-जनसुखबोधाय कर्त्तव्यमार्गनिर्देशायैवेत्यलं विस्तरेण। एतादृशाचरणेन बुद्धत्व-प्राप्तिः पुरुषोत्तमत्वलाभश्चावश्यमेव स्यातामिति शम्।

---

१. वनेषु भावितं चित्तं नगरेषु न लिप्यते।
तस्मात् वनं सदा सेव्यं नगरं नैव शस्यते॥ (धर्मसमु० ३३।२५)

२ भुवं परिजनोत्पश्यी धर्मचारी जितेन्द्रियः।
स राजा धार्मिको धीमान् स्वर्गलोकोपपत्तये॥ (धर्मसमु० ३५।१)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तदत्र किञ्चित् प्रस्तूयते

परमेशितुः परमेश्वरस्य कृपया ग्रन्थोऽयं प्रतिज्ञापरिशिष्टनामकः समाप्तिमगात्। वैदिकसमाजेऽस्य महतो समाख्या। शुक्लयजुषः शास्त्रिपरीक्षायां निर्धारितोऽपि मुद्रणाभावाद् दुर्लभ आसीत्। सूत्रत्रयमेव प्रतिज्ञासूत्रनाम्ना प्रसिद्धम्। ग्रन्थोऽयं मयाऽधुनातनानुसन्धानसञ्चालकमहोदयानां श्रीवागीशशास्त्रिणामुपदेशेन सम्पादितो व्याख्यातश्च। सोऽयं ग्रन्थो वैदिकविद्यार्थिनामन्येषाञ्च विदुषां वेदविशिष्टस्वरजिज्ञासूनाञ्च कियदुपकरिष्यतीति त एवात्र प्रमाणम्। अत्र प्रामाणिकहस्तचालनप्रक्रियोपदिष्टाऽस्ति। यद्यप्याधुनिकवैदिका हस्तस्वरचालनं कुर्वते ततोऽधिकप्रामाणिकतामधितिष्ठतेऽयं ग्रन्थः। अनुस्वारस्य ॡँइत्यादेशः सम्यक् प्रतिपादितः। स्वरिताष्टभेदोपप्रदर्शनञ्चापि सप्रमाणोदाहरणद्वारा प्रदर्शितम्। यकारस्य जकारोच्चारणं कस्यां स्थितौ भवतीति विशेषेणावबोधितम्। रकारस्य लकारस्य च एकारसहितोच्चारणं कुत्र कुत्र क्रियत इति विचारो दर्शितः। षकारस्य खकारोच्चारणं शुक्लयजुष्येव भवतीति नान्यवेदेषु। तस्य षकारस्य अर्थवेलायां लौकिकप्रयोगे च सकारोच्चारणमेव भवति। अनुस्वारस्य ॡँ इत्यादेशस्य त्रैविध्यमाख्यातम्। एवं विशिष्टोच्चारणमेव शुक्लयजुष्वेवानिवार्यतयावलोक्यते। अन्ते पराम्बां श्रीअन्नपूर्णां मुहुरभिवन्द्यायं विरमति भवदीयः पाठकः।

कोऽसौ कात्यायनः—

स्वयं कात्यायनाचार्येणान्यैरप्याचार्यैश्च व्याकरणप्रातिशाख्यशिक्षादिग्रन्थेषु वर्णानामुच्चारणप्रकारः सामान्येन वर्णितः। तेषां वर्णानां विशिष्टोच्चारणं वर्णनीयमस्तीति। वर्णानांविषयेऽत्र प्रतिज्ञापरिशिष्टे सूत्रत्रयरूपेण विचारोऽभिहितः। प्रतिज्ञातञ्च वर्णानामुच्चारणं परिशिष्टे, अत एव प्रतिज्ञापरिशिष्टमिति प्रतिज्ञासूत्रमिति वा संज्ञा। कोऽसौ कात्यायनः कात्यायनश्रौतसूत्रकारः, पाणिनिसूत्रवार्त्तिककारः, शुक्लयजुषः प्रतिशाख्यकारो वा। मीमांसाबहुलश्रौतसूत्रप्रणयनेन जैमिनिकालिको विभाति। जैमिनेर्मीमांसाकर्त्तुः काल एवास्यापि भवितुमर्हति। श्रीचिन्नस्वामिना मीमांसाकेसरिणा आपस्तम्बश्रौतसूत्रका-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

रस्यापस्तम्बमहर्षेः कालः—विक्रमसंवत्सरात् पूर्वमेकादशशताब्दी द्वादशशताब्दी-कालोऽस्तीति निर्णीतः। कात्यायनश्रौतसूत्रभूमिकायां श्री० म० म० विद्याधर-शास्त्रिणा लिखितः। भाण्डारकरविल्वलकरप्रभृतिभिः सम्मिलय विचारितः निर्णीतश्च, यद् विक्रमसंवत्सरपूर्वं चतुर्थशताब्दी पञ्चमशताब्दी वा कात्यायन-श्रौतसूत्ररचनाकालः। तर्हि वररुचिना सह महर्षेः कात्यायनस्य कथं सम्बन्धः स्यात्। अतोऽयं महर्षेः कात्यायनस्य कालः त्रिसहस्रसंवत्सरपूर्वं विक्रमाब्दाद् आसीदिति निर्णीतः श्री म० म० विद्याधरशास्त्रिणा। तदानीं प्रस्थानत्रयेण निर्मिता ग्रन्था भवन्ति स्म श्रौतसूत्राणि, गृह्यसूत्राणि, धर्मसूत्राणि च। महर्षिणा कात्यायनेन कात्यायनश्रौतसूत्रं रचितम्। गृह्यसूत्रं कात्यायनप्रणीतं तन्नाम्ना प्रसिद्धं न मिलति। किन्तु पारस्करगृह्यसूत्रे प्रथमकाण्डे प्रथमसूत्रे पारस्कराचार्यो लिखति—'अथातो गृह्यस्थालीपाकानां कर्म। अस्य सूत्रस्य हरिहरभाष्ये भाष्य-मिदं लिखितमस्ति—अथशब्देन श्रौतकर्मविधानानन्तरं गृह्यकर्मेदानीं विधास्यते'। अनेन ज्ञायते यदियं पारस्करसंज्ञा कात्यायनश्रौतसूत्रकारस्यैव भवितुमर्हति, यतः प्रस्थानत्रयरचनाव्यापारस्तदानीन्तनानामासीदिति। श्रौतसूत्राणामन्तिमेऽध्याये प्रवराध्याये कतप्रवरो लिखितोऽस्ति। अतस्तस्यात्ययत्वेन कात्यायनशब्दः सिध्यति।

कात्यायनगोत्रिणो विप्रा उत्तरे भारते सन्ति, अतोऽयमुत्तरप्रदेशीयो महर्षिः कात्यायनः। तन्निर्मिता ग्रन्थाः—

१. कात्यायनश्रौतसूत्रम्; २. शुक्लयजुःप्रातिशाख्यम्।
३. ऋक्सर्वानुक्रमसूत्रम्; ४. शुक्लयजुःसर्वानुक्रमसूत्रम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

५. छागलक्षणसूत्रम्; ६. कूर्मलक्षणसूत्रम्।
७. प्रतिज्ञापरिशिष्टम्; ८. अनुवाकसूत्रम्।
९. सामसर्वानुक्रमसूत्रम्; १०. अथर्वसर्वानुक्रमसूत्रम्।
११. त्रिकण्डिकासूत्रम्; १२. मूलाध्यायः (स्नानसूत्रम्)।
१३. वार्त्तिकपाठः; १४. कर्मप्रदोपः (छन्दोगपरिशिष्टम्)।
१५. कत्यायनस्मृतिः; १६. गृह्यपरिशिष्टम्।
१७. श्राद्धसूत्रम्; १८. रुद्रसूत्रम्।
१९. प्राकृतमञ्जरी; २०. यूपलक्षणपरिशिष्टम्।
२१. उपग्रन्थसूत्रम्; २२. चरणव्यूहपरिशिष्टम्।
२३. शुल्बसूत्रम्; २४. पार्षदसूत्रम्।
२५. ऋग्यजुःपरिशिष्टम्; २६. इष्टकापूरणसूत्रम्।
२७. प्रवराध्यायः; २८. उक्थशास्त्रम्।
२९. क्रतुसंख्यापरिशिष्टम्; ३०. निगमपरिशिष्टम्।
३१. यज्ञपार्श्वपरिशिष्टम्; ३२. हौत्रपरिशिष्टम्।
३३. प्रसवोत्थानम्; ३४. भाषिकपरिशिष्टम्।

महर्षिकात्यायनप्रणोता इमे ग्रन्थाः।

अथात्र योऽयं प्रतिज्ञापरिशिष्टनामको ग्रन्थः शुक्लयजुर्वेदसंहितायां महीधरोवटभाष्योपेतायां परिशिष्टे मुद्रितः सूत्रत्रयरूपः प्रतिज्ञापरिशिष्टम्, प्रतिज्ञासूत्रं वा। अस्मादन्यः प्रतिज्ञापरिशिष्टनाम्ना प्रसिद्धः कश्चिद् ग्रन्थो नास्ति। अयमेव ग्रन्थोऽस्ति। अस्मिन् ग्रन्थे शुक्लयजुषो मूलसंहितायामप्यवलोकनेन कश्चिद् भेदो नोपात्तः। निर्णयसागराख्यमुद्रणालययन्त्रालये श्रीवासुदेवशर्मणा ख्रिष्ताब्दे १९२९ एकोनत्रिंशदधिकैकोनविंशतिशततमेऽब्दे श्रीमद्वाजसनेयिमाध्यन्दिनशुक्लयजुर्वेदसंहितासंशोध्य मुद्रापिता। तत्र काचिद् व्याख्या नोपलब्धा। ग्रन्थस्यास्य वैशिष्ट्यं मन्त्रोच्चारणे वर्णानामुच्चारणं कथङ्कारं स्यादिति निर्दिष्टम्। तदेव कौबेरी व्याख्यया सनाथीकृतमिति शम्।

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः।

वाराणस्याम्,
कार्तिकपूर्णिमायाम्
वि० सं० २०४५

भवदीयो वशंवदः,
कुबेरनाथपाठकः
प्राध्यापकः,
वेदविभागे,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विषयानुक्रमणी

विषयाः	पृष्ठाङ्काः
मङ्गलाचरणम्	१
अथ प्रतिज्ञाशब्दविचारः	
मन्त्रब्राह्मणभेदोपपादनञ्च	
वेदव्युत्पत्तिप्रदर्शनम्	२
ऋगादिमन्त्राणां लक्षणानि	
ब्राह्मणभेदप्रदर्शनम्	
अर्थवादविचारः	३
स्वरस्थानविमर्शः	
स्वरितभेदगणना च	
जात्याभिनिहितक्षैप्रविचारः ।	४
ह्रस्वग्रहणे दीर्घप्लुतयोर्ग्रहणम्	५
तैरोव्यञ्जनतैरोविरामपादवृत्तस्वरविमर्शश्च	
ताथाभाव्यविचारः	६
भाषिकस्वरतानस्वर-एकश्रुतिस्वराणां विचारश्च	
यकारस्य जकारोच्चारणम्	७
श ष स ह्रेफेषु—अनुस्वारस्य ॐ इत्यादेशः तस्य गुंशब्देनोच्चारणमिति विचारः	
यकारस्य द्वित्वेऽपि द्वयोर्यकारयोर्जकारोच्चाणम्	८
रकारस्य श ष स ह--ऋकारेषु परभूतेषु रेकारोच्चारणम्	
षकारस्य टवर्गसंयुक्ताभावयुतस्य खकारोच्चारणम्	९
अन्यत्र सकारोच्चारणम्, अनुस्वारस्य ॐ इत्यादेशः सप्तमपृष्ठे विचारितः ।	
ॐ इत्यस्य ह्रस्वदीर्घविचारः	१०
अभ्यासार्थंप्रयुक्तस्य शब्दस्य वृद्धयर्थताविचारः	११

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

लघु-ग्रन्थमाला

[४४]

महर्षिकात्यायनप्रणीतं

प्रतिज्ञापरिशिष्टम्

सम्पादकः

डॉ० कुबेरनाथपाठकः

प्राध्यापकः,

वेदविभागे

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

वाराणसी

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

वि० सं० २०४५

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

महर्षिकात्यायनप्रणीतं

प्रतिज्ञापरिशिष्टम्

(प्रतिज्ञासूत्रम्)

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलञ्जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थं महेश्वरम् ॥
वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥
पितृदेवमनुष्याणां वेदश्चक्षुः सनातनम् ।
अशक्यञ्चाप्रमेयञ्च वेदशास्त्रमिति स्थितिः ॥
सर्ववेदेषु वैशिष्ट्यं यजुषां यदिदमीरितम् ।
तत्सर्वं सङ्गृह्यात्र वर्ण्यते शास्त्रदर्शिना ॥
यद्यप्यतिगम्भीरे विचारे शास्त्रसम्मते ।
बहूनां शास्त्रकर्तॄणां सम्मतं यदिदमुच्यते ॥

अथ प्रतिज्ञा, [ख० सू० १।१]

अथशब्दो मङ्गलार्थः शास्त्रान्तरवचनं वा, ओङ्काराथकारौ, ओङ्कारो वेदेषु, अथकारो भाष्येषु । अथशब्देन शब्दान्तरं शास्त्रान्तरं वा द्योत्यते । शिक्षाग्रन्थानामध्ययने वर्णाक्षराणामुभयविधानामुच्चारण-प्रक्रिया प्रज्ञायते; किन्त्वत्र वैदिकलौकिकोभयविधत्वाद् भेदो दृश्यते, अत एव भेदप्रदर्शनार्थं प्रतिज्ञासूत्रमकारि कात्यायनेन । तत्र यानि त्रीणि सूत्राणि लिखितानि लम्बायमानानि, तानि खण्डं खण्डं विधाय विचार्यन्ते, प्रतिज्ञेयम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मन्त्रब्राह्मणयोर्वेदनामधेयम् [ख० सूत्रम्—१।२]

मन्त्रो मननादिति यास्कः। मन्त्रि-गुप्तपरिभाषण इति धातोर्निष्पन्नोऽयम्मन्त्रशब्दः। ब्राह्मणम्, बृंहणाद् वर्धनाद्वा। अत एव वेदव्याख्यानरूपं ब्राह्मणम्। तयोर्वेदत्व स्वीकृतमापस्तम्बेन। इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयत्यसौ वेदः। धर्मब्रह्मप्रतिपादकमपौरुषेय प्रमाणवाक्यं वेद इति मधुसूदनः सर्वदर्शनसङ्ग्रहे।

कर्मकाण्डोपासनाज्ञानकाण्डात्मको हि वेदः, स च मन्त्रब्राह्मणात्मकः, तत्र मन्त्रास्तावद् यज्ञाद्यनुष्ठानकारणभूतद्रव्यदेवताप्रकाशकेनाम्नाताः। निर्दिष्टा वेदः प्रयोगत्रयेण यज्ञनिर्वाहार्थमृग्यजुःसामभेदेन भिन्नस्त्रयोसंज्ञितः। तत्र हौत्रप्रयोगः ऋग्वेदेन, आध्वर्यवप्रयोगो यजुर्वेदेन, औद्गात्रप्रयोगः सामवेदेन, ब्राह्मयाजमानप्रयोगौ त्वत्रैवान्तर्भूतौ। अथववेदस्तु शान्तिपौष्टिकाभिचारिकादिकर्मप्रतिपादकत्वेन अत्यन्तविलक्षणः। सर्वेषां वेदानां कर्मकाण्ड-उपासना-ज्ञानकाण्डात्मकानां मूलैक्यम्; किन्तु शाखाभेदः संहितायाः कर्तॄणां भेदादेव, अत एव तत्तन्नाम्ना संहितासमाख्या। तत्र ऋगादिमन्त्राणां लक्षणानि पादबद्धगायत्र्यादिच्छन्दोविशिष्टा ऋचः। अग्निमीडे पुरोहितमित्याद्या ऋचः। ता एव गीतिविशिष्टा सामानि, तदुभयविलक्षणानि यजूंषि। अग्नीदग्नीन् विहर, सम्बोधनरूपा निगदमन्त्रा अपि यजुष्यन्तर्भूता एव।

ब्राह्मणानि

ब्राह्मणं तु त्रिविधं विधिरूपमर्थवादरूपमुभयविलक्षणञ्च। तत्र शब्दभावनाविधिरिति भाट्टाः। नियोगो विधिरिति प्राभाकराः। इष्टसाधनता विधिरिति तार्किकादयः। सर्वोऽपि विधिश्चतुर्विधः, उत्पत्त्यधिकारविनियोगप्रयोगभेदात्। तत्र देवताकर्मस्वरूपमात्रबोधको

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विधिरुत्पत्तिविधिः । आग्नेयोऽष्टाकपालो भवतीत्यादिः । सेतिकर्त्तव्यताकस्य करणस्य यागादेः फलसम्बन्धबोधको विधिरधिकारविधिः । दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यादिः । अङ्गसम्बन्धबोधको विधिरिति विनियोगविधिः । व्रीहिभिर्यजेत, समिधो यजतीत्यादिः । साङ्गप्रधानकर्मप्रयोगैक्यबोधकः पूर्वविधित्रयमेलनरूपः प्रयोगविधिः ।

विधिशेषोऽर्थवादः

प्राशस्त्यनिन्दान्यतरलक्षणया विधिशेषभूतं वाक्यमर्थवादः । स च त्रिविधः–गुणवादोऽनुवादो भूतार्थवादश्च, प्रमाणान्तरविरुद्धार्थबोधको गुणवादः, आदित्यो यूप इत्यादिः । प्रमाणान्तरप्राप्तार्थबोधकोऽनुवादः, अग्निर्हिमस्य भेषजमित्यादिः । प्रमाणान्तरविरोधतत्प्राप्तिरहितार्थबोधको भूतार्थवादः, इन्द्रो वृत्राय वज्रमुद्यच्छदित्यादिः ।

तस्मिञ्छुक्ले याजुषाम्नाये माध्यन्दिनीयके मन्त्रे स्वरप्रक्रिया [ख० सूत्रम्—१।३]

एतस्मिञ्छुक्लयजुर्वेदे माध्यन्दिनर्षिसंहृते । तत् संहितायां स्वराणामुदात्तादीनां प्रक्रिया प्रकारश्चोच्चारणस्योच्यते ।

हृद्यनुदात्तः [ख० सूत्रम्—१।४]

हृद्देशे यदा हस्तचालनं विधीयते, तदानुदात्तः स्वरो ज्ञातव्यः ।

मूर्द्ध्न्युदात्तः [ख० सूत्रम्—१।५]

मूर्द्धनि यदा हस्तो नीयते, तदोदात्तः स्वरः प्रत्येतव्यः ।

श्रुतिमूले स्वरितः [ख० सूत्रम्—१।६]

दक्षिणकर्णमूले यदा हस्तो जायते, तदा स्वरितः स्वरो ज्ञातव्यः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रसङ्गाद् यथाह याज्ञवल्क्यशिक्षायां स्वरचालनप्रदेशम्, यथा–

अङ्गुष्ठस्योत्तरे पर्वणि तर्जन्योपरि यद् भवेत् ।
प्रादेशस्य तु सोद्देशस्तन्मात्रं चालयेत्करम् ॥
स्वरिते त्र्यङ्गुलं विद्यान्निघाते तु षडङ्गुलम् ।
उत्थाने तु नवाङ्गुल्यमेतत्स्वारस्य लक्षणम् ॥

इदानीं स्वारस्वभेदा अष्टौ जात्यादयश्चोच्यन्ते–

अष्टौ स्वरान् प्रवक्ष्यामि तेषामेतत्तु लक्षणम् ।
जात्योऽभिनिहितः क्षैप्रः प्रश्लिष्टश्च तथापरः ॥
तैरोव्यञ्जनमाख्यातमेवं तैरोविरामकः ।
पादवृत्तथाभाव्याविति स्वारा मयेरिताः ॥

तत्र जात्यः

एकपदे नीचपूर्वः सयवो जात्यः (शु० यजुःप्रा० १।१११) एकस्मिन् पदे नीचपूर्वोऽनुदात्तपूर्वो यकारवकारसहितः स्वरो जात्यः स्वरो भवति, यथा–धान्य॒मसि (वा० १।२०) क॒ न्या॒इव (वा० १७।१७)

अभिनिहितः

ए ओ अभ्यामुदात्ताभ्यामकारो रिफितश्च यः ।
अकारो यत्र लुप्येत तच्चाभिनिहितं विदुः ॥

एदोद्भ्यामकारो लुगभिनिहितः (वा० प्रा० १।११४)। 'एङः पदान्तादति' (पा० सू० ६।१।१०९) । यदा एदोद्भ्यामकारोऽनुदात्तो लुप्यते, तदाभिनिहितः स्वरः प्रत्येतव्यः । यथा एकारस्य ते॒ऽवन्त्व॒स्मान् (वा० १९।५८), ओकारस्य यथा वेदो॒ऽसि॒ (वा० २।२१), तुथो॒ऽसि॒ (वा० ५।३१), नमो॑ऽस्त्व॒द्य (वा० १९।६८)।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

क्षैप्रः

इ उ वर्णौ यदोदात्तावापद्येते यवौ क्वचित् ।
अनुदात्ते पदे नित्यं विन्द्यात्क्षैप्रस्य लक्षणम् ॥
युवर्णौ यवौ क्षैप्रः [प्रा० १।११५]

इको यणचि (पा० ६।१।७७) इकार उकारश्च वर्णौ यवौ यकारवकारौ सम्पद्येते, तदा क्षैप्रः स्वरो भवति । इकारस्य यथा—त्र्यम्बकम् (वा ३।६०), वाज्यर्वन् (वा० ११।४४), उवर्णस्य यथा—द्रूवन्नः (वा० ११।७०), योजान्विन्द्र ते हरी (वा० ३।५१) ।

प्रश्लिष्टः

इकारो यत्र दृश्येत इकारेणैव संयुतः ।
उदात्तश्चानुदात्तेन प्रश्लिष्टो भवति स्वरः ॥
इवर्ण उभयतो ह्रस्वः प्रश्लिष्टः (वा० १।१२६)
अकः सवर्णे दीर्घः (पा० सू. ६।१।१०१) ।

ह्रस्वग्रहणे दीर्घप्लुतौ प्रतीयात् (इति परिभाषासूत्रम्) । पूर्वो वर्णो ह्रस्वोदात्तः परश्चानुदात्तो ह्रस्वश्च यदा भवतस्तदा प्रश्लिष्टस्वरो ज्ञातव्यः । यथा अभीमं महिमा (वा० ३८।१७) ।

तैरोव्यञ्जनस्वरः

उदात्तपूर्वं यत्किञ्चिच्छन्दसि स्वरितं पदम् ।
एष सर्वबहुस्वारस्तैरोव्यञ्जन उच्यते ॥

स्वरो व्यञ्जनयुतस्तैरोव्यञ्जनः (प्रा० १।११७) उदात्तपूर्वो यः स्वरो भवति परश्च व्यञ्जनयुतः स्वरो भवत्यसौ तैरोव्यञ्जननामकः स्वरितो ज्ञातव्यः । यथा इडे रन्ते हव्ये काम्ये (वा० ८।४३) ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तैरोविरामः

अवग्रहात्परो यस्तु स्वरितः स्यादनन्तरम् ।
तैरोविरामं तं विन्द्यादुदात्तो यद्यवग्रहः ॥

उदवग्रहस्तैरोविरामः (प्रा० १।११८) उदात्तावग्रहः स्वरस्तैरोविरामसंज्ञकः स्वरः प्रत्येतव्यः । यथा—गोपताविति गोपतौ (वा० १।१), प्रयातमिति प्रयातम् (वा० १।१५) ।

पादवृत्तः

स्वरयोरुभयोर्मध्ये विवृतिर्यत्र दृश्यते ।
पादवृत्तो भवेत्स्वारः शिवत्र आदित्यदर्शनम् ॥

विवृत्तलक्षणः पादवृत्तः (प्रा० १।११९) । विवृत्यालक्षितः स्वरः पादवृत्तस्वरो भवति, विवृत्याऽव्यवहित इत्यर्थः । यथा—ध्रुवा असदन् (वा० २।६), का ईमरे (वा० २३।५५), सूर्य एकाकी चरति (वा० २३।१०) ।

अकारोपधो यकारम् (प्रा० ३।१४२), यवयोः पदान्तयोः स्वरमध्ये लोपः (प्रा० ४।१२७), भोभगोअघोअपूर्वस्य योऽसि (पा० ८।३।१७), लोपः शाकल्यस्य (पा० ८।३।१९) ।

ताथाभाव्यः

उदात्ताक्षरयोर्मध्ये भवेन्नीचस्त्ववग्रहः ।
ताथाभाव्यं भवेत्क पस्तनूनप्त्रेति दर्शनम् ॥

उदाद्यन्तो न्यवग्रहस्ताथाभाव्यः (प्रा० १।१२०), उदात्तादिरुदात्तान्तो नीचावग्रहस्ताथाभाव्यस्वरो भवति, यथा—तनूनप्त्र इति तनूनप्त्रे (वा० ५।५), तनूनपादिति तनूनपात् (वा० २१।१०) ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एवं जात्यादयोऽभिहिताः [ख० सू० १।८]

इत्थं पूर्वोक्तप्रकारेण जात्यादीनां स्वरितभेदानां लक्षणानि कथितानि।

ब्राह्मणेषूदात्तानुदात्तौ भाषिकस्वारौ [ख० सू० १।८ [

ब्राह्मणग्रन्थेषूदात्तानुदात्तौ भाषिकस्वरौ ज्ञातव्यौ। शरीरे उदात्तस्य स्थानद्वयम्, एकमुपरि द्वितीयं वामे च भवति। एवमनुदात्तस्यापि स्थानद्वयमधस्ताद्दक्षिणे च भवति। अतो यथासम्प्रदायमुच्चारणमभिमतम्। 'विभाषा च्छन्दसि' (पा० सू० १।२।३६)। एकश्रुतिः बह्वृचानामन्येषा यथासम्प्रदायं व्यवस्था।

तानस्वराणि छन्दोवत्सूत्राणि [ख० सू० १।९]

इमानि सूत्राणि व्याकरणशास्त्रस्य कीदृशानीति छन्दोवत्सूत्राणि, छन्दोभिस्तुल्यानि, तान एकश्रुतिः अविकारीति स्वरो ज्ञातव्यः। ते च स्वराः सम्बोधनेऽनुज्ञायाञ्च प्रवर्त्तन्ते। यथा—एकश्रुतिः दूरात्सम्बुद्धौ—(पा० सू० १।२।३३), संहितायां त्रैस्वर्यम्। अन्यत्र तु सम्बोधने—आगच्छ भो माणवकः। यज्ञकर्मण्यजपन्यूङ्खसामसु (पा० सू० १।२।३४), यज्ञकर्मणि—एकश्रुतिर्भवति, जपादीन् वर्जयित्वा। स्वाध्यायकाले त्रैस्वर्यमेव, न्यूङ्खो नाम षोडश ओङ्काराः।

अथ यकारस्य जकारोच्चारणविधिरुच्यते।

अथान्तस्थानामाद्यस्य पदादिस्थस्यान्यहलसंयुक्तस्य संयुक्तस्यापि रेफोष्मान्त्याभ्यामृकारेण चाविशेषणादिमध्यस्थानेषूच्चारणे जकारोच्चारणम् [ख०सू०२।१]

अथात्राथशब्दो न मङ्गलार्थावबोधकः; किन्तु प्रकरणान्तरद्योतक इति, अन्तस्थाः—यवरलाः, तेष्वाद्यस्य यकारस्य कीदृशस्य पदादिस्थस्यान्यहलसंयुक्तस्य संयुक्तस्यापि रेफः, हकारः, ऋकारश्च

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तैरविशेषेण संयुक्तस्य व्यवहितस्य यकारस्यादौ मध्येऽवसाने च वर्तमानस्य यदा योगो जायेत, तदा यकारस्य जकारोच्चारणं कार्यम्। यथा पदादिस्तस्य [यज्ञेन यज्ञमयजन्त देवाः (वा० : १।१६), मध्ये वर्त्तमानस्य यथा—वीर्यम् (वा० १ ।९३) अवसाने हकारस्य यथा—सि ꣳ ह्यसि (वा० ५।१२), ऋकारयुतस्य यकारस्य यथा ऋतस्य। हकारयुतस्य यथा—प्रोह्यमाणाः (वा० ८।५६ ।

प्रसङ्गादिदमुच्यते—ग्रामं गच्छन् तृणं स्पृशतीतिवद् अनुस्वारं रोष्मसु मकारः प्रा० ४।१) ।

रकारसहिता उष्माणः शषसहा उष्माण इत्येषु वर्णेषु परभूतेषु मकारोऽनुस्वारं लभते, अनुस्वाररूप ꣳ इति वैदिकाना सम्प्रदाये बेदे। यथा रकारपरभूते अपा ꣳ रसम् (वा० १९।९४)शकारपरभूते-पद्भ्या ꣳ शूद्रो अजायत (वा० ३ ।११) षकारपरभूते यथा तपू ꣳषि (वा० १३।१०) सकारपरभूते यथा देव ꣳ सवितारमण्योः (वा० ४।२५), हकारपरभूते यथा उरु ꣳ हि राजा (वा० ८।२३)।

द्विर्भावेऽप्येवम् [ख० सू० २।२]

यकारस्य द्विर्भावे जातेऽपि यकारद्वयस्य जकारोच्चारणं कर्त्तव्यम्, यथा—वीर्य्यम् (वा० १२।९३) ।

अथापारान्तस्थस्यायुक्तान्यहलसंयुक्तस्योष्म-
ऋकारैरेकारसहितोच्चारणम् [ख० सू० २।३]

अथानन्तर रकारस्यान्यहलसंयुक्तस्य संयुक्तस्यापि शषसहाः, उष्माणः, ऋकारश्च तैः सह रेकारोच्चारणं भवति। यथा—शकारे परभूते रकारस्य रकारलकारयोरैक्यं रलयोरभेदः। शतवल्शाः (वा० १२।१००), षकारे परभूते—सहस्रं शीर्षा (वा० ११।१), सकारपरभूते शु० यजुषि नोपलभ्येत, ऋकारपरभूते योनिर्ऋत्वियः (वा० ३।१४), हकारपरभूते यथा—बर्हिषदः (वा० १९।५) ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एवं तृतीयान्तस्थस्य क्वचिदृकारस्य तु संयुक्तासंयुक्तस्या-विशेषेण सर्वत्र । (ख. सूत्र २।४)

एवं हि तृतीयान्तस्थस्य क्वचिदृकारस्य रेकारोच्चारणम् भवति यथा-बृहस्पतिः [वा० १२।९८] सम्भृतं पृषदाज्यम् । [वा० ३१।६]

एवमथान्तस्थान्तस्थानां पदादिमध्यान्तस्थस्य त्रिविधं गुरुमध्यमलघु प्रवृत्तिभिरुच्चारणम् । (ख. सू. २।५)

एवमन्त्यस्यापि लक रस्य लेकारोच्चारणम् तत्त्रिविधं कार्यम् गुरुमध्यमलघुवृत्तिभिरित्ति ।

अथो मूर्धन्योष्मणोऽसंयुक्तस्य टुमृते संयुक्तस्य च खकारोच्चारण-मध्ययनादिकर्मसु । (ख. सू. २ ६)

अथानन्तरमध्ययनादिकर्मसु [स्वाध्यायकाल एवषकारस्य खकारोच्चारणम्] मूर्धन्योष्मणोऽसंयुक्तस्य संयुक्तस्य च टुमृते टवर्ग संयोगरहिते खकारोच्चारयाम् भवति। यथासंयुक्तस्य पुरुषः [वा० ३१।१] संयुक्तस्य देवेष्वस्ति टुमृत इति किम् शीर्ष्णो द्यौः [वा०३१।१३] अत्र षकार टवर्गयोगात् सकारोच्चारणम् ।

अर्थवेलायाम् प्रकृत्या (ख.सू.२।७)

अर्थवेलायाम् स्वाध्यायातिरिक्तकाले षकारस्य सकारोच्चारणम् भवति

अथानुस्वारस्य ॵँ इत्यादेशः शषसहरेफेषु । ख. सू. ३।१)

अनुस्वारं रोष्मसुमकारः [प्रा० ४।१] शषसहरेफेषु पर भूतेषु अनुस्वारस्य ॵँ इत्यादेशो जायते । अस्मिन्विषये पूर्वोक्तम् सप्तमपृष्ठे प्रसङ्गादिदमुच्यत इत्यतः ।

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY
Jangamwadi Math, Varanasi
ACC No.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तस्य त्रैविध्यमाख्यातम् (ख. सू. ३।२)।

तस्य ँ इत्यादेशस्य त्रैविध्यमाख्यातम्

ह्रस्वदीर्घगुरुभेदैर्दीर्घात्परो ह्रस्वः (ख. सू. ३।३)

पूर्वेणान्वयः कैर्ह्रस्वदीर्घगुरुभेदैरिति, यथा दीर्घात्परः ह्रस्वः– अयाँरसम् [वा० ९।३] वा ँ सरुथिना, [वा० २६।७]

ह्स्वात्परोदीर्घः (ख. सू. ३।४)

ह्रस्वात्परोऽनुस्वारो दीर्घो भवति, यथा गुणपति ँ हवामहे (वा० २३।१९) देव ँ सवितारम् [वा० ४।२५] गुरौ परेऽनुस्वारो गुरुर्भवति, यथा आयुष्यं वर्चस्य ँ रायस्पोषम् [वा० ३४।५०]

गुरौपरेगुरुः (ख. सू. ३।५)

गुरौपरेगुरुर्भवतीति-आयुष्यं वर्चस्य ँ रायस्पोषम् [वा० ३४।५०]

परसवर्णेषत्प्रकृत्या च (ख. सू. ३।६)

परसवर्णे प्राप्ते ईषत्प्रकृत्या भवति । यथा वर्चस्य ँ रायस्पोषम् [वा० ३४।५०]

अन्यत्र विसर्गेष्वीषद्विरामः (ख. सू. ३।७)

अन्य विसर्गेषु ईषद्विरामो भवति ।

पदाद्यस्य संयुक्ताकारस्येषद्दीर्घता च भवतीषद्दीर्घता च भवतीति (ख. सू. ३।८)

पदाद्यस्य संयुक्ताकारस्येषद्दीर्घता च भवति अभ्यासः पाठसमाप्ति सूचकः; वृद्ध्यर्थो वा

।। इति कात्यायनपरिशिष्टप्रतिज्ञासूत्रं कौबेरीव्याख्यासनाथं समाप्तम् ।।

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY
Jangamwadi Math, Varanasi
ACC No. 8373

CC-0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

महत्त्वपूर्णानि प्रकाशनानि

१. **ऋग्वेदप्रातिशाख्यम्**—ग्रन्थरत्नमिदं विविधैः पाठान्तरैः संशोध्य उवटाचार्यकृतभाष्यसहितं प्रकाशितम्— ५६-००

२. **संस्कारसारः**—श्रीदलपतिमहाराजप्रणीतोऽयं धर्मशास्त्रीयो ग्रन्थो विभिन्नैः परिशिष्टैः सम्भूष्य प्रकाशितः— ५०-००

३. **अद्वैतदीपिका**—श्रीनृसिंहाश्रमविरचितेयमद्वैतदीपिका श्रीनारायणाश्रमविरचिताद्वैतदीपिकाविवरणाख्यटीकया सनाथीकृत्य प्रकाशिता-द्वयोर्भागयोः— १०३-००

४. **न्यायमञ्जरी**—श्रीमज्जयन्तभट्टप्रणीतेयं न्यायमञ्जरी श्रीचक्रधरविरचितया 'ग्रन्थिभङ्ग' व्याख्यया समलङ्कृत्य प्रकाशिता—त्रयाणां भागानाम्— १५२-००

५. **व्योमवती**—व्योमशिवाचार्यविरचितमिदं ग्रन्थरत्नं विविधैः पाठभेद-परिशिष्टादिभिः सह प्रकाशितम्— प्रथमभागस्य – २७-००
द्वितीयभागस्य — ५०-००

६. **तत्त्वचिन्तामणौ प्रामाण्यवादः**—तत्त्वचिन्तामणेः प्रामाण्यवादपर्यन्तोऽयं ग्रन्थः श्रीगौरीनाथशास्त्रिविरचितया 'प्रभा'ख्यव्याख्यया युतः सन् प्रकाशितः – १५-००

७. **प्रगल्भी**—तत्त्वचिन्तामणिग्रन्थस्योपमानखण्डात्मकमिदं पुस्तकं श्रीप्रगल्भाचार्यप्रणीतया 'प्रगल्भी'व्याख्यया समलङ्कृत्य प्रकाशितम्— १५-००

८. **अभावविमर्शः**—श्रीदीपकघोषप्रणीतमिदं ग्रन्थरत्नं नानाशास्त्रनिष्कर्षभूतं चकास्ति – १६-००

९ **दीधितिकारोपज्ञविचाराणामालोचनम्**—अनुसन्धानप्रबन्धोऽयं दीधितिकारसिद्धान्तानां भृशं समालोचनां विदधाति— ५०-००

१०. **नित्याषोडशिकार्णवः**-तन्त्रशास्त्रस्य प्राणभूतमिदं ग्रन्थरत्नं शिवानन्दकृतया 'ऋजुविमर्शिन्या', विद्यानन्दकृतया 'अर्थरत्नावल्या' च टीकया सनाथीकृत्य प्रकाशितम्— ७६-००

११. **परमानन्दतन्त्रम्**—तन्त्रशास्त्रीयोऽयं ग्रन्थो विविधैः पाठभेद-परिशिष्टादिभिरानुसन्धानिकफलश्रुतिभिः सम्भूष्य प्रकाशितः – ९५-००

१२. **शिवमहिम्नस्तोत्रम्**—स्तोत्रमिदं 'मधुसूदनी', 'नारायणी' प्रभृतिभिः संस्कृतटीकाभिः, अथ च हिन्दीपद्यानुवाद हिन्दीव्याख्यादिभिः सनाथीकृत्य प्रकाशितम्-२०-००

१३. **अग्निपुराणोक्तं काव्यालङ्कारशास्त्रम्**—अग्निपुराणस्य काव्यालङ्कारभागपर्यन्तमिदं ग्रन्थरत्नं 'काव्यप्रभावृत्ति'संस्कृतटीकयाऽथ च हिन्दीव्याख्यया सम्भूष्य प्रकाशितम्— ५६-००

१४. **पाणिनीयधातुपाठसमीक्षा**—(द्वितीयं संस्करणम्) व्याकरणशास्त्रीयोऽयं ग्रन्थः स्त्रीयैर्गवेषणाभरितत्त्वैः कामं बिभर्ति महनीयामभिख्याम्। प्रथमभागस्य — ८५-००

१५. **वाल्मीकिरचनामृत**—वाल्मीकिरामायणस्य विविधान् प्रसङ्गान् उपजीव्यत्वेनाङ्गीकृत्य विदुषा पण्डितश्रीकुबेरनाथशुक्लेन मार्मिकं तात्त्विकञ्ज विवेचनमनुष्ठितम्— ५६-००

प्राप्तिस्थानम्— विक्रयविभागः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य, वाराणसी–२२१ ००२

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi